काशीविद्यासुधानिधिः

श्रीगणेशाय नमः।

श्रीमद्विजयिनीदेवीपाठशालादयोदितः।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कररश्मिः स्फुटयतु काशीविद्यासुधानिधिः।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE

NEW SERIES.

Nos. 1-3] Jan. to March 1913. [VOL. XXXV.

BENARES:

PRINTED AND PUBLISHED BY ALOPI PRASAD FOR
E. J. LAZARUS & Co., AT THE MEDICAL HALL PRESS,
BENARES CANT.

Pric Rs. 9 per annum.

ङिश्योर्वा ॥ १।२।१५० ॥

अपदसंज्ञकावयस्य अन्नित्येतस्य ङौ श्यादेशे च परे ऽनो भवति वा ॥ न चेत्सोऽन्शब्दः हल्वमात्परो भवति ॥ राज्ञि राजनि साम्नि सामनि। अह्नि। अहनि दिने ॥

आतोऽनाङः श्लुक् ॥ १।२।१५१ ॥

अपदस्याकारस्य श्यसुट्छियादौ सुपि परे श्लुग् भवति ॥ आङन्तं वर्जयित्वा। अम्बु पिबतीति अम्बुपः। अम्बुपा। शुभंयः। शुभंया। अनाङ इति किं? शालाः मालाः पश्य ॥

डतिष्णां संख्यानां जश्शसः ॥ १।२।१५२ ॥

डति षकारनकारान्ताया: संख्यायाः सम्बन्धिनः जश्शस इत्येतस्य सुपः श्लुग्भवति ॥ कति तिष्ठन्ति। कति पश्य। एवं षट्। पञ्च। सप्त। नव। दश। परमषट्। परमपञ्च। तत्सम्बन्धिविज्ञानादिह न भवति। प्रियषषस्तिष्ठन्ति। प्रियपञ्चनः तिष्ठन्ति। प्रियषषः पश्य। प्रियपञ्चः पश्य।

अष्ट औश् ॥ १।२।१५३ ॥

अष्ट इति कृताकारस्याष्टन् इत्येतस्य सम्बन्धिनोर्जश्शसोरौश् इत्याकारादेशो भवति ॥ अष्टौ तिष्ठन्ति। अष्टौ पश्य। परमाष्टौ ॥ आकारान्तपरिग्रहादिह न भवति। अष्ट तिष्ठन्ति ॥ तत्सम्बन्धिविज्ञानादिह न भवति ॥ प्रियाः अष्टौ येषां ते प्रियाष्टास्तिष्ठन्ति। प्रियाष्टाः पश्य ॥

अव्ययस्य ॥ १।२।१५४ ॥

अव्ययस्य सम्बन्धिनः सुपः श्लुग्भवति। स्वः। उच्चैः। नीचैः। परमनीचैः। तत्सम्बन्धिविज्ञानादिह न भवति ॥ अत्युच्चैसौ। अत्युच्चैसः ॥

अव्ययीभावस्य ॥ १।२।१५५ ॥

अव्ययीभावस्य सम्बन्धिनः सुपः श्लुग्भवति । अधिस्त्रि । उपवधु ॥

नातः ॥ १ । २ । १५६ ॥

अकारान्तस्याऽव्ययीभावस्य सुपः श्लुग्न भवति । उपकुम्भेन । उपकुम्भात् । उपकुम्भे ।

अमपञ्चम्याः ॥ १ । २ । १५७ ॥

अकारान्तस्याऽव्ययीभावस्य सम्बन्धिनः सुपः अम् इत्यादेशो भवति पञ्चमीं वर्जयित्वा ॥ उपकुम्भं तिष्ठति पश्य देहि । अपञ्चम्या इति किं ? उपकुम्भात् ॥

तृतीयाया वा ॥ १ । २ । १५८ ॥

अकारान्तस्याव्ययीभावस्य तृतीयायाः अम् वा भवति ॥ उपकुम्भेन, उपकुम्भं, कृतम् ॥

सप्तम्याः ॥ १ । २ । १५९ ॥

अकारान्तस्याऽव्ययीभावस्य सप्तम्या अम् वा भवति ॥ उपकुम्भे, उपकुम्भं निधेहि ॥

नद्यृद्धवंश्यस्य ॥ १ । २ । १६० ॥

नद्यन्तस्य ऋद्धान्तस्य वंश्यस्यान्तस्य चाकारास्याव्ययीभावस्य सप्तम्या नित्यमम्भवति । उन्मत्तगंगम् । सप्तगोदावरं वसति । सुमद्रम् । सुमगधं वसति ॥ एकविंशति भारद्वाजम् । त्रिकोसलं वसति ॥ प्रतिपदोक्तग्रहणादिह न भवति । उपगंगे ॥

परस्परान्योऽन्येतरेतरस्यां सुपो वा पुंसि ॥ १ । २ । १६१ ॥

परस्पर अन्योन्य इतरेतर इत्येतेषामपुंसि स्त्रियां नपुंसके च प्रयुज्यमानानां सम्बन्धिनः सुपः स्थाने आमित्यादेशो भवति वा ॥ इमे सख्यौ परस्परां भोजयतः । परस्परं भोजयतः । आभिः सखीभिः परस्परेण भोज्यते । परस्परां भोज्यते ।

इमाः सख्यः परस्परां प्रयच्छन्ति । परस्परस्मै प्रयच्छन्ति । एव-मन्योन्याम् । अन्योन्यम् । इतरेतराम् । इतरेतरम् । नपुंसके—इमे कुले परस्परां परस्परं वा भोजयतः । एवं सर्वत्रापि । अपुंसीति किं ? परस्परमिमे जनाः भोजयन्ति । अमित्यन्ये । पुंसीत्यपरे । इमे परस्परादयः शब्दाः कर्मव्यतिहारैकत्वविषयाः सर्वत्र पुंस्त्वोपादानाः अस्मादेव निपातनात् परादयः सर्वादयः कृतद्विर्वचनादयो विज्ञेयाः ।

भ्यत्याः ॥ १ । २ । १६२ ॥

भकारयकारादौ अकारादौ जसि शसि च सुपि परे अका-रस्य आकारो भवति ॥ देवाभ्याम् । देवाय । देवाः । देवान् । नित्यत्वात्-अमुङसिङस्सु "मो णो मः" इत्यादि । देवम् । देवात् । देवस्य ॥

बह्वोसि स्भ्येत् ॥ १ । २ । १६३ ॥

सकारभकारादौ बहुविषये ओसि च सुपि परे अकारस्य एकारो भवति । देवेषु । सर्वेषाम् । देवयोः ॥

ऐस् भिसोऽद्भशः ॥ १ । २ । १६४ ॥

अकारात्परस्य सुपो भिसः स्थाने ऐसादेशो भवति अद्भशः—दकारादेशो यो भकारस्तदन्तरादकारात् इदमादेशा-च्चाशः परस्य तु न भवति । देवैः । अतिजरसैः । अद्भश इति किं ? अमीभिः । एभिः ॥

ङसास्येस्स्येनाद्यम् ॥ १ । २ । १६५ ॥

अकारात्परेषां ङस्-आ-असि-ए-इत्येतेषां सुपां स्य-इन्-आत्-य इत्येते यथाक्रममादेशा भवन्ति । धनस्य । धनेन । धनात् । धनाय । अतिजरसस्य । अतिजरसेन । अतिजरसात् ॥

सर्वादेङर्थ्स्येः स्मिन्स्मात्स्मै ॥ १ । २ । १६६ ॥

अकारान्तस्य सर्वादेर्गणस्य सम्बन्धिनां ङि- ङसि-ए इत्येतेषां सुपां यथाक्रमं स्मिन्- स्मात्- स्मै- इत्येते आदेशा भवन्ति। सर्वस्मिन्। सर्वस्मात्। सर्वस्मै। तस्मिन्। तस्मात्। तस्मै। परमसर्वस्मिन्। अतत्संबंधिनाम्—प्रियसर्वे। प्रियसर्वात्। प्रियसर्वाय॥

जसश्शिः॥ १। २। १६७॥

अकारान्तस्य सर्वादेः संबंधिनो जसः स्थाने शि इत्यादेशो भवति। सर्वे। विश्वे। त्ये। ते॥

नेमार्धप्रथमचरमाल्पकतिपयतयस्य वा १। २। १६८ ॥

नेमादीनां तय इत्येतत्प्रत्ययान्तानां चाकारान्तानां सम्बन्धिनो जसश्शिर्भवति वा॥ नेमे। नेमाः। अर्धे। अर्धाः। प्रथमे। प्रथमाः। चरमे। चरमाः। अल्पे। अल्पाः। कतिपये। कतिपयाः। द्वितये। द्वितयाः। त्रितये। त्रितयाः। द्वये। द्वयाः। परमनेमे। परमनेमाः॥

द्वन्द्वे॥ १। २। १६९॥

द्वन्द्वसमासे वर्तमानानामकारान्तानां सम्बन्धिनो जसः स्थाने शिर्भवति वा॥ कतरकतमे। कतरकतमाः। परमकतरकतमे। परमकतरकतमाः॥

न सर्वादिः॥ १। २। १७०॥

द्वन्द्वसमासे सर्वादिः सर्वादिर्न भवति॥ पूर्वापराय। पूर्वापरात्। पूर्वापराणाम्। अधरोत्तराय। अधरोत्तरात्। अधरोत्तराणाम्। कतरकतमकः।

पूर्वावरं तृतीयायोगे॥ १। २। १७१॥

पूर्व अवर इत्येतौ सर्वादी तृतीयान्तेन योगे सम्बन्धे सर्वादी न भवतः॥ मासेन पूर्वाय मासपूर्वाय। संवत्सरेणा-

वराय संवत्सरावराय । योगग्रहणं किं ? आगमिष्यति वटुः मासेन पूर्वस्मै दीयतां कम्बलः ॥

नव पूर्वा वादौ ॥ १ । २ । १७२ ॥

पूर्वादयो नव सर्वादयः अकारादाविकारादौ च सुपि परे सर्वादयो वा भवन्ति ॥ पूर्वे । पूर्वाः । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । परे । पराः । परस्मात् । परात् । परस्मिन् । परे ॥

तीयं ङिति ॥ १ । २ । १७३ ॥

तीयप्रत्ययान्तं ङिति-ङित्कार्ये कर्तव्ये सर्वादिर्वा भवति ॥ द्वितीयस्मै । द्वितीयाय । द्वितीयस्यै । द्वितीयायै । तृतीयस्मात् । तृतीयात् । तृतीयस्याः । तृतीयायाः ।

विदिक् च ॥ १ । २ । १७४ ॥

विदिग्वाची सर्वादिः सर्वादिर्वा भवति । उत्तरपूर्वस्यै उत्तरपूर्वायै । उत्तरपूर्वासाम् । उत्तरपूर्वाणाम् । चेन वाऽनुकृष्यते ॥

ङस्यात्यस्य ॥ १ । २ । १७५ ॥

अवर्णान्तानां सर्वादीनां तत्सम्बन्धिनि याडादौ सुपि परे ङस् इत्यादेशो भवति ॥ सर्वस्यै । सर्वस्याः । सर्वस्याम् । परमसर्वस्यै॥ तत्सम्बन्धिविज्ञानादिह न भवति । अतिसर्वायै ।

सामामः ॥ १ । २ । १७६ ॥

अवर्णान्तानां सर्वादीनां सम्बन्धिन आमः षष्ठीबहुवचनस्य स्थाने साम् भवति ॥ सर्वेषाम् । सर्वासाम् । तेषाम् । तासाम् । परमसर्वेषाम् । परमसर्वासाम् । अतत्सम्बन्धिनः— प्रियसर्वाणाम् ॥

युष्मदस्मद्भ्यामाकम् ॥ १ । २ । १७७ ॥

युष्मद् अस्मद् इत्येताभ्यां परस्य आमः तत्सम्बन्धि-

नोऽन्यसम्बन्धिनो वा स्थाने आकमित्यादेशो भवति। युष्माकम्। अस्माकम्। प्रिययुष्माकम्। प्रियास्माकम्। आकमित्याकारो यत्नार्थः-युष्मानाचक्षाणानाम् युष्माकम्। अस्माकम्। अन्यथा युष्मकम्, अस्मकमिति स्यात्।

ङस्शसोभ्यसोऽश्नाभ्यम् ॥ १। २। १७८ ॥

युष्मदस्मद्भ्यामुत्तरेषां तत्सम्बन्धिनामन्यसम्बन्धिनां वा ङस्-शस्-भ्यस् इत्येतेषां सुपामश-न-अभ्यं च यथाक्रममादेशा भवन्ति। तव। मम। अतितव। अतिमम। युष्मान्। अस्मान्। प्रिययुष्मान्। प्रियास्मान्। युष्मभ्यम्। अस्मभ्यम्। प्रिययुष्मभ्यम्। प्रियास्मभ्यम् ॥

भ्योऽसोऽद् ॥ १। २। १७९ ॥

युष्मदस्मद्भ्यामुत्तरस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो व अस्सहचरितस्य भ्यसः पञ्चमीबहुवचनस्यासश्च पंचम्येकवचनस्य अदित्यादेशो भवति। त्वत्। त्वद्। मत्। मद्। अतित्वत् (द्) अतिमत् (द्)। युष्मद्। अस्मद्। अतियुष्मद्। अत्यस्मद् ॥

ङेसुटोऽम् ॥ १। २। १८० ॥

युष्मदस्मद्भ्यां परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा ङे इत्येतस्य सुटश्च सुपः स्थाने अमित्यादेशो भवति। तुभ्यम् मह्यम्। अतितुभ्यम्। अतिमह्यम्। त्वम्। अहम्। युवाम्। आव यूयम्। वयम्। त्वाम्। माम्। युवां। आवाम् ॥

दोर्लुक् ॥ १। २। १८१ ॥

दकारान्तयोर्युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे लुग्भवति। युष्मभ्यम्। अस्मभ्यम्। त्वद्। मद्। युष्मद्। अस्मद्। युष्माकम्। अस्माकम्। अतियुष्माकम् ॥ अत्यस्माकम्। दोरिति किं? मोरुत्तरो विकल्पः ॥

वा । १ । २ । १८२ ॥

मकारान्तयोर्युष्मदस्मदोः तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे वा लुग्भवति ॥ युष्मानाचक्षाणेभ्यः युष्मभ्यम् युषभ्यम् । अस्मभ्यम् असभ्यम् । युष्मद् युषद् । अस्मद् । असद् । युष्माकम् । युषाकम् । अस्माकम् । असाकम् ॥

अमौद्दत्याः । १ । २ । १८३ ॥

युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा अमि द्वितीयैकवचने औकारादयोर्हलादौ च सुपि परे आकारो भवति । त्वाम् । माम् । अतित्वाम् । अतिमाम् । युवाम् । आवाम् । युष्मान् । अस्मान् । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु ।

यौस्वि यः ॥ १ । २ । १८४ ॥

युष्मदस्मदोस्तत्सम्बन्धिष्वन्यसम्बन्धिषु वा इ आ ओस् इत्येतेषु सुप्सु परतः यकारो भवति । त्वयि । मयि । त्वया । मया । युवयोः । आवयोः । प्रियत्वयि । प्रियमयि ।

मन्तस्य युवावौ द्वयोः १ । २ । १८५ ॥

द्वित्वविशिष्टेऽर्थे वर्तमानयोः युष्मदस्मदोर्मकारावसानयोरवयवस्तस्य तत्सम्बन्धिनि वा सुपि परे यथासंख्यं युव, आव इत्यादेशौ भवतः । युवाम् । आवाम् । युवाभ्याम् । आवाभ्याम् । युवयोः । आवयोः । अतिक्रान्तौ युवाम् अतियुवाम् । अत्यावाम् । अतिक्रान्तं युवाम् अतियुवाम् । अत्यावाम् । अतिक्रान्तान् युवाम् अतियुवान् । अत्यावान् । एवमतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवाभिः । अत्यावाभिः । इत्यादि नेयम् । सुजस्ङेङस्सु परत्वात् त्वाहादयः । मन्तस्येति किं ? सर्वस्य मा भूत् ॥ युवकयोः । युवकाभ्याम् ॥

त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ॥ १।२।१८६ ॥

एकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मपर्यन्तस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि प्रत्ययोत्तरपदयोश्च परतो यथासंख्यं त्व म इत्यादेशौ भवतः। त्वाम्। माम्। त्वया। मया। त्वद्। मद्। त्वयि। मयि। अतिक्रान्तौ त्वाम् अतित्वाम्। अतिमाम्। अतिक्रान्तं त्वां अतित्वाम्। अतिमाम्। अतिक्रान्तौ त्वाम् अतित्वाम्। अतिमाम्। अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्याम्। अतिमाभ्याम्। एवं नेयम्। त्वदीयः। मदीयः। त्वद्यति। मद्यति। त्वत्कृतम्। मत्कृतम्। त्वत्प्रधानः। मत्प्रधानः। त्वत्पुत्रः। मत्पुत्रः। प्रत्ययोत्तरपदे चेति किं? अधियुष्मद्। अध्यस्मद्। एकस्मिन्निति किं? युष्माकम्। अस्माकम्। युष्मदस्मद्विशेषणादिह न भवति। युष्मानतिक्रातमतियुष्माम्। अत्यस्माम्। अतियुष्मया। अत्यस्मया।

त्वाहौ सौ ॥ १।२।१८७ ॥

युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सौ परे यथासंख्यं त्व अह इत्यादेशौ भवतः। त्वम्। अहम्। अतिक्रान्तस्त्वाम् अतित्वम्। अत्यहम्। अतिक्रान्तो युवाम्। अतित्वम्। अत्यहम्। अतिक्रान्तो युष्मान्। अतित्वम्। अत्यहम्।

यूयवयौ जसि ॥ १।२।१८८ ॥

युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा जसि परे यथासंख्यं यूय वय इत्यादेशौ भवतः। यूयम्। वयम्। प्रियस्त्वं येषां ते प्रिययूयम्। प्रियवयम्। प्रियौ युवां येषां ते प्रिययूयम्, प्रियवयम्।

तुभ्यमह्यौ ङयि ॥ १।२।१८९ ॥

युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा ङयि परे

युष्मदस्मदोरन्यसम्बन्धिन्यन्यसम्बन्धिनि वा ङयि परे यथासंख्यं तुभ्य मह्य इत्यादेशौ भवतः ।। तुभ्यम् । मह्यम् । प्रियस्त्वं यस्य प्रियतुभ्यम् । प्रियमह्यम् । प्रियौ युवाम् प्रिया यूयम् यस्य तस्मै प्रियतुभ्यम् । प्रियमह्यम् ।

तव ममौ ङसि ॥ १ । २ । १८० ॥

युष्मदस्मदोस्तत्संबन्धिन्यन्यसंबन्धिनि वा ङसि परे यथासंख्यं तव मम इत्यादेशौ भवतः ॥ तव । मम । प्रियस्त्वं यस्य तस्य प्रियतव । प्रियमम । प्रियौ युवां यस्य तस्य प्रियतव । प्रियमम । प्रिया यूयं यस्य तस्य प्रियतव । प्रियमम ॥

पदाद्वाक्यस्य वस्नसौ युग्विभक्तेः ॥ १ । २ । १८१ ।

वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोः युष्मदस्मदोर्युग्विभक्त्यन्तयोर्यथासंख्यं वस् नस् इत्यादेशौ भवतः । धर्मो वो रक्षतु । धर्मो नो रक्षतु । दानं वो दीयते । दानं नो दीयते । शीलं वः स्वम् । शीलं नः स्वम् ॥ पदादिति किं ? युष्मान् धर्मो रक्षतु । अस्मान् धर्मो रक्षतु । वाक्यस्येति किं ? ओदनं पचत युष्माकं भविष्यति । अस्माकं भविष्यति । वाक्यस्येति षष्ठी पदावयवयोर्मा भूदिति । इति युष्मदुपाध्यायो ब्रूते । अत्यस्मान् पश्यन्ति

वांनावौ द्वित्वे ॥ १ । २ । १८२ ॥

वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोर्द्वित्वविषययोर्युग्विभक्त्यन्तयोर्यथासंख्यं वाम् नौ इत्यादेशौ भवतः । धर्मो वां रक्षतु । धर्मो नौ रक्षतु । दानं वां दीयते । दानं नौ दीयते । शीलं वां स्वम् । शीलं नौ स्वम् ॥

तेमयावेकत्वे ॥ १ । २ । १८३ ॥

वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्म-

दस्मदोरेकत्वविषये युग्विभक्त्यन्तयोर्यथासंख्यं ते मे इत्यादेशौ भवतः। दानं ते दीयते। दानं मे दीयते। शीलं ते स्वम्। शीलं मे स्वम्॥

त्वामौ द्वितीयायाः॥ १। २। १८४॥

वाक्यस्यावयवात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदो द्वितीयैकवचनान्तयोर्यथासंख्यं त्वा मा इत्यादेशौ भवतः। धर्मस्त्वा रक्षतु। धर्मो मा रक्षतु॥

नेवा मन्त्र्यं पूर्वम्॥ १। २। १८५॥

यदा (था) मन्त्र्यते सम्बोध्यते तत्पदं युष्मदस्मद्भ्यां पूर्वं नेवा सदिव भवति॥ भो देवदत्त युष्मान् रक्षतु धर्मः। भो देवदत्त अस्मान् रक्षतु धर्मः॥ देवदत्त युवाभ्यां दानं दीयते। देवदत्त आवाभ्यां दानं दीयते। देवदत्त तव शीलं स्वम्। देवदत्त मम शीलं स्वम्॥

जस्विशेष्यं वाऽमन्त्र्ये॥ १। २। १८६॥

जसन्तमामन्त्र्यपदं विशेष्यं युष्मदस्मद्भ्यां पूर्वं तद्विशेषणे आमन्त्र्यपदे परे नेव भवति वा। नेत्येतस्याऽपवादः॥ देवाः शरण्याः युष्मानथो शरणं प्रपद्ये। देवाः शरण्याः वोथो शरणं प्रपद्ये। देवाः शरण्याः अस्मानथो रक्षतु। देवाः शरण्याःनोथो रक्षतु॥

न। ॥ १। २। १८७॥

आमन्त्र्यपदं विशेष्यं युष्मदस्मद्भ्यां पूर्वमामन्त्र्यपदे तद्विशेषणे परे न नेवा विद्यमानवन्न भवति। साधू सुविहितौ वां शरण्यं प्रपद्ये। साधो सुविहित त्वा शरण्यं प्रपद्ये। साधू सुविहितौ नौ रक्षतम्। साधो सुविहित मा रक्ष।

पादाद्योः॥ १ २। १८८॥

पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तत्पादस्यादिभूतयोर्न भवति ॥

॥ वीरो विश्वेश्वरो देवो युष्माकं कुल देवता ॥
॥ स एव नाथो भगवानस्माकं पापनाशनः ॥ १ ॥

मनसीक्षार्थैः ॥ १ । २ । १९९ ॥

ईक्षा दर्शनं तदर्थैर्धातुभिः सह तद्वद्यद्वाक्यं तस्य पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति ॥ सा चेदीक्षा मनसि मनो विषया भवति ॥ जनो युष्मान्समीक्ष्य गतः । जनस्त्वामुपेक्षते । दानं युवाभ्यां देयमालोच्य गतः । जनस्तव कार्यमालोचयति । एवमस्मदः ॥ मनसीति किं ? जनो वः पश्यति । जनो नः पश्यति चक्षुषेत्यर्थः ॥

चवाहहैव योगे ॥ १ । २ । २०० ॥

च वा अह ह एव इत्येतैर्योगे सम्बन्धे पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति ॥ जनो युष्माँश्च । जनोयुष्मान्वा । जनो युष्मानह । जनो युष्मान्ह । जनो युष्मानेव पश्यति । ज्ञानं युष्मभ्यं च दीयते । शीलं युष्माकं च स्वम् । जनो युवां च जनो त्वां च पश्यति ॥ एवमस्मदः ॥ योग इति किं ? ज्ञानं च शीलं च वः स्वम् ॥

नित्यमन्वादेशे ॥ १ । २ । २०१ ॥

कथितस्यानुकथनमन्वादेशः । तद्विषये पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्नित्यं भवति । यूयं विनीतास्तद्वो गुरवः, वयं विनीतास्तन्नो गुरवः, युवां शीलवन्तौ तद्वां गुरवः, आवां शीलवन्तौ तन्नौ गुरवः, मानयन्ति । त्वं शीलवानथो क्षमा श्रवणैः तत्ते ज्ञानं दीयते । अहं शीलवानथो क्षमा श्रवणैः तन्मे ज्ञानं दीयते । धनवाँस्त्वमथो त्वालोकः, धनवानहमथो

मालोकः, मानयति ॥ अन्वादेशे नित्यवचनादन्यत्र विकल्पः धर्मो वः धर्मो युष्मान्, धर्मो नः धर्मोऽस्मान्, रक्षत्वित्यादि ॥

पदात्प्रथमायाया वा ॥ १ । २ । २०२ ॥

पदात्परं यत्प्रथमान्तं पदं तस्मात्परयोर्युष्मदस्मदोरन्वादेशे यदुक्तं वस्नसादि तद्वा भवति ॥ यूयं विनीतास्तद्गुरवो वः, यूयं विनीतास्तद्गुरवो युष्मान्, वयं विनीतास्तद्गुरवो नः, वयं विनीतास्तद्गुरवोऽस्मान्, युवां सुशीलौ तद्गुरवो वाम्, तद्गुरवो युवाम्, आवां सुशीलौ तद्गुरवो नौ, तद्गुरव आवां मानयन्ति । अथो क्षमा तत् श्रमणास्ते, अथो क्षमा तत् श्रमणास्तुभ्यं, अथो क्षमा तत् श्रमणा मे, अथो क्षमा तत् श्रामणा मह्यम्, ज्ञानं प्रयच्छन्ति । धनवाँस्त्वं तल्लोकस्त्वा, तल्लोकस्त्वाम्, धनवानहं तल्लोको मा, तल्लोको मां मानयति ॥

त्यदां द्वितीयाटौस्येनदेतदः ॥ १ । २ । २०३ ॥

एतदित्येतस्य त्यदादीनां सम्बन्धिनि द्वितीयायां टायामोसि च सुपि परे अन्वादेशे एनदित्यादेशो भवति ॥ अधीतमेतत्सूत्रमथो एनन्नो व्याचढ्वम् । एतमावश्यकमध्यापय, अथो एनं यथाक्रमं सूत्रम् । सुशीलौ एतौ अथो एनौ गुरवो मानयन्ति । सुस्थितास्सुपराक्रान्ता एते तद्दृष्ट्वा अप्येतान्न मस्यन्ति । एतेन रात्रिरधीता अथो एतेनाहरप्यधीतम् । एतयोः शोभनं शीलम् अथो एनयोर्महतीयं कीर्तिः । एनच्छ्रितकः इत्यत्र अर्थात्प्रकरणाद्वाऽपेक्ष्य निर्ज्ञाने इदमुदाहरणम् । त्यदामिति किं ? एतदं संगृहाण अथो एतदमध्यापय । संज्ञा, न त्यदादिः सुब्विशेषणं किं ? एतं संगृहाण प्रियैतदमध्यापय । अन्वादेशेति किं ? देवदत्तमध्यापय । एतञ्च गुरुदत्तम् । न पश्चात्कथनमात्रमन्वादेशः ॥

इदमः ॥ १ । २ । २०४ ॥

इदमित्येतस्य त्यदादीनां सम्बन्धिनि द्वितीयायां टायामोसि च सुपि परे अन्वादेशे एतद् भवति ॥ अधीतमिदं सूत्रम् अथो एतत् नो व्याचढ्वम् । इदमावश्यकमध्यापय । अथो एनं यथाक्रमं सूत्रम् । सुशीलाविमौ अथो एनौ गुरवो मानयन्ति । सुस्थिताः सुपराक्रान्ता इमे अथो देवा अप्येनान्न मस्यन्ति अनेन रात्रिरधीता अथो एनेनाहारप्यधीतम् । अनयोः शोभनं शीलम् अथो एनयोर्महतीयं कीर्तिः ॥ योगविभाग उत्तरार्थः ॥

रभ्येऽश् ॥ १ । २ । २०५ ॥

इदमः सकारभकारयकारादिके त्यदादिसम्बन्धिनि सुपि परे अन्वादेशे अश् इत्ययमादेशो भवति ॥ शैक्षोऽयकमध्येता अथोऽस्मै साधु दीयतां सूत्रम् । शैक्षकाविमकावध्येतारौ अथो आभ्यां साधु दीयतां सूत्रम् । बालिकेयकं याचते अथो अस्यै दीयतां मोदकः ॥ रभ्ये इति किं ? इमे । इमके । परत्वात्त्वादि भवति ॥ अन्वादेशविधिः सुपा प्रकृतिं विशेष्य विधीयत इति ॥ परमेतम् । परमेनम् । परमेमकस्मै इत्येनदादि न भवति ॥ शकारः सर्वादेशार्थः सककारार्थं वचनम् ॥

अकः ॥ १ । २ । २०६ ॥

इदमः ककाररहितस्य सकारभकारयकारादिके त्यदादिसम्बन्धिनि सुपि परे अश् भवति ॥ अस्मै । अस्मात् । अस्य । एषाम् । आसाम् । अस्मिन् । एषु । आसु । आभ्याम् । एभिः । एभ्यः । आभ्यः । अस्यै । अस्याः । अस्याम् । अक इति किं ? इमकस्मै । इमकाभ्याम् । इमकस्य ॥ त्यदादिसम्बन्धिविज्ञानादिह न भवति ॥ प्रियेदंसु । प्रियेदम्भ्याम् ॥ इह तु भवति । परमास्मै । परमाभ्याम् ॥

टौस्यनः ॥ १ । २ । २०७ ॥

इदमः ककाररहितस्य त्यदादिसम्बन्धिनि टायामोसि च सुपि अन इत्यादेशो भवति ॥ अनेन । अनया । अनयोः । अनयोः । परमानेन । परमानयोः ॥ त्यदादिसम्बन्धिविज्ञानादिह न भवति । प्रियेदमा । अतीदमा ॥ अक इति किम् ? इमकेन ॥

दो मः ॥ १ । २ । २०८ ॥

इदमस्त्यदादिसम्बन्धिनि सुपि परे दकारस्य मकारो भवति ॥ इमौ । इमे । इमम् । इमौ । इमान् । इमकौ परमेमौ ॥ त्यदादिसम्बन्धिविज्ञानादिह न भवति ॥ प्रियेदमौ ॥

सौ ॥ १ । २ । २०९ ॥

इदमस्त्यदादिसम्बन्धिनि सौ प्रथमैकवचने परे मकारो भवति ॥ अत्वापवादः ॥ अयम् । परमायम् । इयम् । परमेयम् ।

पुंसीदोऽय् ॥ १ । २ । २१० ॥

पुंसि वर्तमानस्येदमः त्यदादिसम्बन्धिनि सौ इद्रूपस्याय भवति ॥ इयोपवादः ॥ अयम् । परमायम् देवदत्तः ॥ त्यदादिसम्बन्धिविज्ञानादिह न भवति ॥ प्रियेदं देवदत्तः ॥

इय् ॥ १ । २ । २११ ॥

इदमस्त्यदादिसम्बन्धिनि सौ इद्रूपस्य इय भवति ॥ इयम् । परमेयम् ॥ पारिशेष्यात्स्त्रियमयमादेशः ॥ नपि तु नित्यत्वात्प्रथमेव श्लुक भवति-इदं कुण्डम् ॥

औस्सुलुक् चादसोऽनोः ॥ १ । २ । २१२ ॥

अनुकारस्यादसः सौ औकारो भवति । अत्वापवादः ॥ तस्य च सोर्लुक् भवति ॥ असौ । असकौ । हे असौ । हे असकौ स्त्रीपुमान्वा ॥ अनोरिति किं ? अमुकः ॥ साविति किं ? अदः । अमू ॥

वा क्रोऽस्येोः ॥ १ । २ । २१३ ॥

अदसो योऽक् तस्याकारस्य सौ उकारो वा भवति ॥ असुकः । असुकौ । हे असुक । हे असकौ ॥

दस्सः ॥ १ । २ । २१४ ॥

अदसो दकारस्य सौ सकारो भवति ॥ असौ । असकौ ॥

तोऽष्टानाम् ॥ १ । २ । २१५ ॥

त्यदादीनामष्टानां तकारस्य त्यदादिसम्बन्धिनि सौ सकारो भवति ॥ स्यः । स्या । स्यकः । सः । सा । सकः । एषः । एषा । एषकः । परमस्यः । परमसः । परमैषः ॥ साविति किं ? त्यद् । त्यौ ॥ त्यदादिसम्बन्धिविज्ञानादिह न भवति ॥ प्रियैतद् ।

एतसौ चात् ॥ १ । २ । २१६ ॥

त्यदादीनामष्टानां त्यदादिसम्बन्धिनि सुपि एतसौ च परे अकारो भवति ॥ ततः । तत्रः । तदा । यतः । यत्र । यदा । स्यः । इमे । एते । एकः । द्वौ । त्यकौ । परमत्यकौ ॥ त्यदादिसम्बन्धिविज्ञानादिह न भवति ॥ प्रियत्यदौ ॥

किमः कः ॥ १ ॥ २ ॥ २१७ ॥

किमः त्यदादिसम्बन्धिनि सुपि एतसौ च परे ककारादेशो भवति ॥ कदा । कः । कौ । के । परमकौ ॥ त्यदादि सम्बन्धिविज्ञानादिह न भवति ॥ प्रियकिमौ ॥ एतसौ चेति किं ? तकिम् । नित्यत्वात्सेोश्श्लुक् । न च लक्षणान्तरबाधनेनानित्यत्वम् ॥

भेऽपोऽद् ॥ १ । २ । २१८ ॥

अपः भकारादौ तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि

परे अद्दिरयमादेशो भवति ॥ अद्भिः । अद्भ्यः । स्वद्भिः । अत्यद्भिः ॥ सुपीति किं ? अब्भक्षुः ॥

वाष्टन आः ॥ १ । २ । २१९ ॥

अष्टन् इत्येतस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे आकारो वा भवति ॥ अष्टाभिः । अष्टभिः । प्रियाष्टाः । "आकारान्तः । प्रियाष्टानान्तः प्रियाष्टौ ॥ प्रियाष्टानौ" प्रियाष्टाभ्यः । प्रियाष्टभ्यः ॥ सुपीति किं ? अष्टसूत्री ॥

रायः स्भिः ॥ १ । २ ॥ २३० ॥

रै इत्येतस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सकारादः भकारादौ च सुपि परे आकारो भवति ॥ राः । राभ्याम् । अतिराभ्याम् । कुलाभ्याम् ॥ सुपीति किं ? रैसूत्रम् ।

त्रिचतुरः स्त्रियां तिसृचतसृ ॥ १ । २ । २२१ ॥

त्रिचतुरोः स्त्रीलिंगेऽर्थे वर्तमानयोः तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि यथासंख्यं तिसृ, चतसृ, इत्येतावादेशौ भवतः ॥ तिस्रः, चतस्रः तिष्ठन्ति पश्य वा ॥ तिसृभिः । चतसृभिः । प्रियतिसा । प्रियचतसा पुमान् । प्रियतिसृणि । प्रियचतसृणि ॥ स्त्रियामिति किं ? त्रयः । चत्वारः । प्रियाः त्रयोऽस्याः प्रियत्रिः ॥

रोऽनपोऽचृः ॥ १ ॥ २ ॥ २२२ ॥

तिसृ, चतसृ, इत्येतयोः ऋकारस्य नपुंसकस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा अजादौ सुपि परे रेफो भवति ॥ तिस्रः । चतस्रः । प्रियतिस्रः ॥ प्रियचतस्रः आगतं । प्रियतिस्रः स्वः । प्रियचतस्रः स्वम् । अनप इति किं ? प्रियतिसृणि । प्रियनचतसृणि । शेस्यक् इत्यादेरयमपवादः ॥

ङ्योटि नीचो वा ॥ १ । २ । २२३ ॥

तिसृचतस्रोरुपसर्जनयोः ऋकारस्य ङौ औटि च सुपि परे रेफो वा भवति ॥ प्रियतिस्रौ । प्रियचतस्रौ । प्रियतिसरौ प्रियचतसरौ । प्रियतिस्रः । प्रियचतस्रः । प्रियतिसरः । प्रियचतसरः । प्रियतिस्रम् । प्रियचतस्रम् । प्रियतिसरम् । प्रियचतसरम् । प्रियतिस्रौ । प्रियचतस्रौ । प्रियतिसरौ । प्रियचतसरौ । प्रियतिस्रि । प्रियचतस्रि । प्रियतिसरि ॥ प्रियचतसरि । नीच इति किम् ? तिस्रः । परमतिस्रः । चतस्रः । परमचतस्रः ॥ अनप इति किम् ? प्रियतिसृणी । प्रियचसृणी । प्रियतिसृणि । प्रियचतसृणि ॥ अचीति किम् ? प्रियतिसृ कुलं पश्य ॥

इति श्री श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने चिन्तामणौ वृत्तौ प्रथमस्याऽध्यायस्य द्वितीयः पादः ॥

क्रोष्टोरृ ॥ १ । ३ । १ ॥

स्त्रियामिति वर्तते । क्रोष्टुशब्दस्य स्त्रियां वर्तमानस्य ऋकारादेशो भवति ॥ क्रोष्ट्री । क्रोष्ट्र्या क्रोष्ट्री भक्तिः ॥

गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः ष्यङ् ॥ १ । ३ । २ ॥

अनार्षेऽपत्ये स्त्रियां विहितावणिञौ प्रत्ययौ तदन्तस्य शब्दस्य गुरूपोत्तमस्य ष्यङादेशो भवति ॥ उत्तमशब्दोऽत्युत्पन्नस्त्रिप्रभृतीनामन्त्यमाह ॥ करीषगन्धेरपत्यं स्त्री कारीषगन्ध्या । कौमुदगन्ध्या । दैवदत्त्या । औदमेघ्या । वाराह्या । शातलोम्या ॥ ङित्वादणिञोरेवादेशः ॥ गुरूपोत्तमस्येति किं ? औपगवी । दाक्षी । वात्सी ॥ अनार्ष इति किम् ? वासिष्ठी ॥ अपत्य इति किम् ? अहिच्छत्रे जाता आहिच्छत्री । षकारो "न्यक्षयत् ॥ १ । १ । ५९ ॥" इति विशेषणार्थः

गोत्रावयवे वृद्धे ॥ १ । ३ । ३ ॥

प्रकाशैकादि (बु) पुरुषाभिधानस्तदपत्यसन्तानो गोत्रम् अप्रधानं गोत्रं गोत्रावयवः ॥ स्त्रियामनार्षे वृद्धसंज्ञके गोत्रावयवेऽपत्ये विहितयोरणिञोः ष्यङ् भवति ॥ पुणिकस्यापत्यं वृद्धं स्त्री पौणिक्या । भौणिक्या । गौप्त्या । मौखर्या । वृद्ध इति किम् ? अनन्तरापत्ये न भवति ॥ पौणिकी । अनार्ष इति किम् ? गौतमी ॥ अगुरूपोत्तमार्थं वचनम् ॥

रूढादिभ्यः ॥ २ । ३ । ४ ॥

रूढ इत्येवमादिभ्योऽपत्यमात्रे विहितयोरणिञोः स्त्रियां ष्यङ् भवति ॥ रूढस्यापत्यं स्त्री इञः-रौढ्या । क्रौड्या । आपिशल्या । चोपयतोऽपत्यमणः—चौपयत्या । चैटत्या । शैकयत्या ॥

देवयज्ञशुचिवृक्षसत्यमुग्रकण्ठेविद्धाद्वा ॥ १ । ३ । ५ ॥

देवयज्ञादिभ्यश्चतुर्भ्यः इञः स्त्रियामपत्ये ष्यङ् वा भवति ॥ दैवयज्ञ्या । दैवयज्ञी । शौचिवृक्ष्या । शौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । काण्ठेविद्ध्या । काण्ठेविद्धी ।

सूत्याभोज्ये युवतिक्षत्रिये ॥ १ । ३ । ६ ॥

सूत्याभोज्येति शब्दौ यथाक्रमं युवतौ क्षत्रियायां च स्त्रियां ष्यङन्तौ निपात्येते । सूत्या प्राप्तयौवना स्त्री । सूतान्या । भोज्या भोजवंशजा क्षत्रिया । भोजान्या ॥

नृदुगिदञ्चोऽस्वस्रादेर्ङी ॥ १ । ३ । ७ ॥

नकारान्तात् अस्वस्राद्यवयवऋकारान्तात् उगिदन्तात् अञ्चत्यंताच्च स्त्रियां वर्तमानात् ङी प्रत्ययो भवति ॥ न—राज्ञी । छत्रिणी । ऋत्—कर्त्री । हर्त्री ॥ उगित्—भवती । पचंती । अतिपुंसी । निर्गोमती ॥ अञ्चः—प्राची । प्रतीची । उदीची । अस्वस्रादेरिति किम् ? स्वसा । अतिस्वसा । दुहिता । माता ।

न हषेोऽनुर्वनः ॥ १ । ३ । ८ ॥

हषः परो यो वन् प्रत्ययस्ततः स्त्रियां ङी प्रत्ययो न भवति ॥ न चेत्स हष् ऋवर्णादेशावयवः । यज्वा । अतियज्वा । राजयुद्ध्वा स्त्री ॥ हष इति किम् ? धीवरी । राजकृत्वरी । अनुरिति किम् ? शर्वरी ॥

पादो वा ॥ १ । ३ । ९ ॥

पाद इत्येतदन्ताच्छब्दरूपात्स्त्रियां ङी प्रत्ययो वा भवति ॥ द्विपदी । द्विपात् । त्रिपदी । त्रिपात् ।

कुम्भपद्यादौ ॥ १ । ३ । १० ॥

कुम्भपदीत्येवमादौ पाच्छब्दान्तात् स्त्रियां नित्यं ङी भवति ॥ कुम्भपदी । कलशपदी । शतपदी ।

ऋच्याङ् ॥ १ । ३ । ११ ॥

पादन्ताच्छब्दात् ऋचि स्त्रियामाङ् प्रत्ययो भवति ॥ त्रिपदा । चतुष्पदा ऋक् । परत्वादंत्याजादि लुचं बाधित्वा पद्भावः । ङकार उत्तरार्थः । अन्यत्र-द्विपदी देवदत्ता ॥

मन्नन्बहुव्रीहेर्न्न च ॥ १ । ३ । १२ ॥

मन्नन्ताच्छब्दरूपादन्नन्ताच्च बहुव्रीहेः स्त्रियामाङ् भवति । यश्च प्रत्ययः प्राप्नोति स च न भवति ॥ एवं द्वैरूप्यम् । दामे । दामाः । दामानौ । दामानः । अतिमहिमे । अतिमहिमाः । अतिमहिमानौ । अतिमहिमानः । अनिनस्मन्ग्रहणान्यर्थवतोऽनर्थकस्य च । अन्बहुव्रीहेः-प्रियश्वे । प्रियश्वाः । प्रियश्वानौ । प्रियश्वानः । प्रियचर्मे । प्रियचर्माः । प्रियचर्माणौ । प्रियचर्माणः । बहुराजे । बहुराजाः । बहुराजानौ । बहुराजानः ॥

अजाद्यताम् ॥ १ । ३ । १३ ॥

अज इत्येवमादीनामकारान्तानाञ्च शब्दानां वाक्यायां

स्त्रियां द्योत्यायां तत आप् प्रत्ययो भवति ॥ अजा । महाजा । अश्वा । कोकिला । बाला । कन्या । त्रिफला । क्रुञ्चा । उष्णिहा । अतः-कारीषगन्ध्या । खट्वा । देवदत्ता ॥ तकारः किम् ? क्षीरपाः कन्या ॥ षष्ठ्यास्तत्सम्बन्धिन्या एव स्त्रियां भवति ॥ पंचानामजानां समाहारः पञ्चाजी ॥ अतः परं तत्सम्बन्धिन्यामेव प्रत्ययः ॥

टिड्ढञणञ्गौरादिभ्यः ॥ १ । ३ । १४ ॥

अत इति वर्तते ॥ टितः ठण् ढ इत्येताभ्यामिकारो य इञ् अणो योऽकारः ततः अञश्च प्रत्ययात् गौरादिभ्यश्च स्त्रियां वर्तमानेभ्यो ङी प्रत्ययो भवति ॥ टित्—कुरुचरी । मद्रचरी । ठण्-आक्षिकी । शालाकिकी । ढण् सुपर्णस्यापत्यं स्त्री सौपर्णेयी । एवं वैनतेयी । इञ्-सौतंगमी । मौनिचित्ती ॥ इकारग्रहणेन: किम्? वाराह्या । शालाक्या । अण्-औपगवी । कुम्भकारी ॥ कारीषगन्ध्या, गौतमस्याध्येत्री-गौतमा कन्या इत्यत्राणोऽकारस्य ग्रहणान्न भवति । प्रोक्तेऽण् न स्त्रियाम् । गौतमेनाधीतेरध्येत्री गौतमेत्यत्र प्रोक्तेऽणो ङी लुग्विषये न जायते ॥ अञ्-औत्सी । औदपानी । गौरादिभ्यः-गौरी । मत्सी । मनुषी । देवी ॥

॥ यञोऽषावटात् ॥ १ । ३ । १५ ॥

यञ्प्रत्ययान्तात्स्त्रियां वर्तमानात् ङी प्रत्ययो भवति ॥ न चेत्स यञ् षकारादवटशब्दाच्च परो भवति ॥ गार्गी । वात्सी ॥ अषावटादिति किम् ? गौतष्या । पौतिमाष्या ॥ आवट्या ॥

यङ्यञ्लोहितादिशकलान्तकौरव्यासुरिमाण्डूकाड्-ङ्फट् १ । ३ । १६ ॥

यञो यञन्तेभ्यः लोहितादिभ्यः शकलपर्यन्तेभ्यः कौरव्य आसुरि माण्डूक इत्येतेभ्यश्च स्त्रियां ङ्फट् प्रत्ययो भवति ॥

यञ्-गार्ग्यायणी । वात्स्यायनी । गौतमायणी । पौतिमाष्या-यणी । आवट्यायनी॥ यञ्लोहितादिशकलान्तः—लौहित्यायनी। बाभ्रव्यायणी । शाकल्यायनी ॥ कौरव्यादि—कौरव्यायणी, आसुरायणी । माण्डूकायनी ॥ यञः पूर्वोऽयं च विधिरिति द्वैरूप्यम् ॥ लोहितादेरयमेवेत्युपादानम् । इकार आसुरेरिका-रस्य लुगर्थः । टकारो ङ्यर्थः ॥ श्लोकः—

पदान्तरेण तेनान्यानन्यापेक्षेण विक्रिया ॥

॥ सान्तरेतरनान्यैकप्रत्ययैर्लिंगदर्शनम् ॥ १ ॥

॥ वयस्यनन्त्ये ॥ १ । ३ । १७ ॥

वयो बाल्यादि तस्मिन्ननन्त्येऽचरमे वर्तमानादकारान्तात् स्त्रियां ङी भवति ॥ कुमारी । किशोरी । बधूटी । चिरंटी । वृद्धकुमारीत्युपमानात् ॥ अनन्त्य इति किम् ? वृद्धा । स्थविरा ॥ अत इति किम् ? शिशुः ॥

बहुव्रीहेस्संख्यादेर्हायनात् ॥ १ । ३ । १८ ॥

संख्यादेर्हायनशब्दांतात् बहुव्रीहेः स्त्रियां वयसि गम्यमाने ङी भवति ॥ द्विहायनी । त्रिहायणी ॥ वयसीति किम् ? त्रिहा-यना । चतुर्हायना शाला ॥

दाम्नः ॥ १ । ३ । १९ ॥

दामन्नित्येतदन्तात् संख्यादेः बहुव्रीहेः स्त्रियां ङी भवति॥ द्विदाम्नी । त्रिदाम्नी । संख्यादेरिति किम् ? उद्दामां, उद्दामानं, उद्दाम्नां वा बाडवां पश्य, अनुड्हीं पश्य ॥

ऊध्नः ॥ १ । ३ । २० ॥

ऊधन्नित्येवमन्तात् बहुव्रीहेः स्त्रियां ङी भवति ॥ घटोघ्नी । पीवरोघ्नी । "श्नवतो वा ॥ १ । ३ । २२ ॥" इति विकल्पे सूत्रद्वयम् ॥

अशिशोः ॥ १ । ३ । २१ ॥

अशिशु इत्येतस्माद्बहुव्रीहेः स्त्रियां ङी भवति ॥ न विद्यते शिशुर्यस्यास्सा अशिश्वी ॥ बहुव्रीहेरिति किम् ? न शिशुः अशिशुः ॥

श्नवतो वा ॥ १ । ३ २२ ॥

यस्य क्वचित् श्नादेशो भवति तस्मान्नदन्ताद्बहुव्रीहेः स्त्रियां ङी वा भवति ॥ तेन मुक्ते निषेधाड्प्रत्ययौ भवतः ॥ बहुराज्ञी । बहुराज्ञ्यौ । बहुराज्ञ्यः । बहुराजानौ । बहुराजानः । बहुराजे । बहुराजाः । श्नवत इति किम् ? प्रियश्वानः ॥

नाम्नि ॥ १ । ३ । २३ ॥

संज्ञायां विषये श्नवतो बहुव्रीहेः स्त्रियां नित्यं ङी भवति ॥ अधिराज्ञी, सुराज्ञी नामग्रामौ ॥

अनाच्छादनाज्जातेः पूर्वपदात् क्तादजातकृतमित-प्रतिपन्नात् ॥ १ । ३ । २४ ॥

अनाच्छादना या जातिस्तद्वाचिनः पूर्वपदात्परो यः क्तान्तः जातकृतमितप्रतिपन्नवर्जितः तदन्ताद्बहुव्रीहेः स्त्रियां ङी भवति ॥ शंखौ भिन्नौ यस्याः असौ शंखभिन्नी । ऊरुच्छिन्नी । केशलूनी ॥ अनाच्छादनादिति किम् ? वस्त्रच्छन्ना । जातेरिति किं ? मासो यातो यस्याः सा मासयाता । संवत्सरयाता ॥ पूर्वपदादिति किम् ? प्रियशंखभिन्ना ॥ जातादिनिषेधः किम् ? दन्तजाता दन्ता जाता यस्याः सा । दन्तमिता । दन्तकृता । दन्तप्रत्तिपन्ना ।

॥ पाणिगृहीतीति पत्नी ॥ १ । ३ । २५ ॥

पाणिगृहीतीत्येवं प्रकारो ङ्यन्तो बहुव्रीहौ साधुर्भवति । पत्नी—भार्या चेत् वाच्या भवति ॥ पाणी हस्तौ गृहीतौ यस्याः

मा पाणिगृहीती । करगृहीती । पाणयत्ती । करात्ती । अन्या—पाणिगृहीता ॥ पत्नीत्यस्मादेव निपातनात् पतिशब्दस्य भार्यायां नकारादेशः ।

वाऽस्वाङ्गात् ॥ १ । ३ । २६ ॥

अनाच्छादनमस्वाङ्गं या जातिस्तद्वाचिनः पूर्वपदात्परो यः क्तान्तः जातकृतमितिप्रतिपन्नवर्जितः तदन्ताद्बहुव्रीहेः स्त्रियां ङी वा भवति ॥ पलाण्डुः भक्षितो अनया सा पलाण्डुभक्षिती । पलाण्डुभक्षिता । सुरापीती । सुरापीता ॥ अस्वाङ्गादिति किम् ? ऊरुच्छिन्नी ॥ जातादिनिषेधः किम् ? कुण्डजाता । कुण्डकृता । कुण्डमिता । कुण्डप्रतिपन्ना ॥ बहुव्रीहीति किम् ? सुरामत्ता ॥

असहनञ्विद्यमानान्नासिकोदरोष्ठजंघादन्तकर्णशृङ्गाङ्गगात्रकण्ठाबह्वच्संयोगोपांत्यात्स्वाङ्गात्समासात् ॥१।३।२७॥

सह नञ् विद्यमान इत्येतद्वर्जितादस्वाङ्गवाचिनः पूर्वपदात्परं यन्नासिकादि यच्च बह्वचः संयोगोपान्त्याच्चान्यत् स्वांगवाचि, शब्दरूपं तदन्तादकारान्तात्समासात् स्त्रियां वर्तमानात् वा ङी भवति ॥ दीर्घनासिकी । दीर्घनासिका । तलोदरी । तलोदरा । बिम्बोष्ठी । बिम्बोष्ठा । समजङ्घी । समजङ्घा । चारुदन्ती । चारुदन्ता । लम्बकर्णी । लम्बकर्णा । तीक्ष्णशृङ्गी । तीक्ष्णशृङ्गा । मृद्वङ्गी । मृद्वङ्गा । तनुगात्री । तनुगात्रा । कलकण्ठी । कलकण्ठा स्त्री । अबह्वचसंयोगोपान्त्यात् शोभनो अण्डो यस्याः सा स्वण्डी । स्वण्डा वृश्चिकी वाच्या भवति । स्निग्धकेशी । स्निग्धकेशा कन्या । पृथुस्तनी पृथुस्तना रामा । बहुकेशी । बहुकेशा रथ्या । दीर्घमुखी दीर्घमुखा प्रतिमा ॥ असहनञ्विद्यमानादिति किम् ? सहनासिका । अनासिका । विद्यमानना-

सिका ॥ सहकेशा । अकेशा । विद्यमानकेशा ॥ नासिकेत्यादीति किम्? पृथुजघना। महाललाटा। सुगुल्फा। चारुपार्श्वा ॥ स्वाङ्गादिति किम्? शुकनासिका शाला । बहुशोफा । बहुकफा जरती । बहुज्ञाना कन्या ॥ दीर्घमुखा शाला ॥ समासादिति समासमात्रार्थम्। निरोष्ठी । निरोष्ठा ॥ अतिकेशी अतिकेशा माला ॥ अस्वाङ्गादिति किम्? मुखमेव नासिका यस्याः सा मुखनासिका । पाणिपादा ॥ पूर्वपदादिति किम्? तुङ्गदीर्घनासिका स्निग्धप्रियकेशा । अत इति किम्? कल्याणपाणिः परमशिखा ॥

॥ अविकारोऽद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते ॥
॥ च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥ १ ॥

दीर्घजिह्वात् ॥ १ । ३ । २८ ॥

दीर्घ जिह्व इत्येतस्मात्स्वाङ्गान्तात्समासात् स्त्रियां वा ङी भवति ॥ दीर्घजिह्वी । दीर्घजिह्वा । कन्या ॥

पुच्छात् ॥ १ । ३ । २९ ॥

असहनञ्विद्यमानादस्वाङ्गवाचिनः पूर्वपदात्परं यत्स्वाङ्गवाचि पुच्छ इति तदन्तात् समासात् स्त्रियां वा ङी भवति ॥ कल्याणपुच्छी । कल्याणपुच्छा । निष्पुच्छी । निष्पुच्छा ॥ असहनञ्विद्यमानादिति किम्? सहपुच्छा । अपुच्छा । विद्यमानपुच्छा ॥

कबरमणिविषशरात् ॥ १ । ३ । ३० ॥

कबरादिभ्यः पूर्वपदेभ्यः परं यत्स्वाङ्गवाचि पुच्छेति तदन्तात्समासात् स्त्रियां नित्यं ङी भवति ॥ कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ॥

पक्षाच्चोपमानात् ॥ १ । ३ । ३१ ॥

उपमीयते येन तदुपमानम् । तद्वाचिनः पूर्वपदात्परं यत्पक्ष पुच्छ इति तदन्तात् समासात् स्त्रियां ङी भवति ॥ उलूक (घूक) पक्षी शाला । उलूकपुच्छी सेना ॥

न नखमुखान्नाम्नि ॥ १ । ३ । ३२ ॥

नखमुखान्तात् समासात् संज्ञायां विषये ङी न भवति ॥ शूर्पणखा । चन्द्रणखा । गौर (होतृ) मुखा । कालमुखा ॥ नाम्नीति किम् ? शूर्पणखी राक्षसी । चन्द्रमुखी कन्या ॥

क्रोडादिभ्यः ॥ १ । ३ । ३३ ॥

क्रोडाद्यान्तात् समासात् स्त्रियां ङी न भवति ॥ कल्याणक्रोडा । कल्याणखुरा । सुभगा । सुगला ॥

करणात् क्रीतात् ॥ १ । ३ । ३४ ॥

करणवाचिनः पूर्वपदात्परं यत्क्रीतेति तदन्तात् समासात् स्त्रियां ङी भवति ॥ वसनक्रीती ॥ करणादिति किम्? सुक्रीता । दुष्क्रीता ॥ समासादिति किम् ? वस्त्रेण क्रीता ।

क्तादल्पे ॥ १ । ३ । ३५ ॥

करणपूर्वपदात् क्तप्रत्ययान्तात् समासात् स्त्रियां वर्तमानात् पूर्वपदस्यार्थस्याल्पत्वे गम्यमाने स्त्रियां ङी भवति ॥ अभ्रविलिप्ती द्यौः । सूपविलिप्ती पात्री । अल्पसूपीत्यर्थः ॥ अन्यत्र चन्दनानुलिप्ता कन्या ॥

द्विगोः ॥ १ । ३ । ३६ ॥

अकारान्तात् द्विगोः स्त्रियां वर्तमानात् ङी भवति ॥ पञ्चपूली । दशपूली । पञ्चखरी । पञ्चतक्षी ॥

परिमाणादेव लुचोऽबिस्ताचितकम्बल्यात् ॥ १ । ३ । ३७ ॥

परितः आरोहतः परिणाहतश्च मानं परिमाणं प्रस्थादि बिस्त, आचित, कम्बल्यवर्जितं यत् परिमाणवाचि तदन्ता-

देव द्विगोरकारान्तात् लक्षणादिप्रत्ययानां लुचि सत्याम् तदन्तात् स्त्रियां ङी भवति ॥ द्वाभ्यां कुडुबाभ्यां क्रीता द्विकुडुबी । त्रिकुडुबी । द्व्याढकी । त्र्याढकी ॥ बिस्ताचितकम्बल्यादिति किम् ? द्विबिस्ता । त्रिबिस्ता । द्व्याचिता । त्रिकम्बल्या ॥

काण्डादक्षेत्रे ॥ १ । ३ । ३८ ॥

काण्डान्तात् द्विगोर्लुचि सत्यां तदन्तात् स्त्रियां वर्तमानात् अक्षेत्रे विषये ङी भवति ॥ द्वे काण्डे प्रमाणमस्यास्सा द्वाभ्यां काण्डाभ्यां क्रीता वा द्विकाण्डी ॥ अन्यत्र द्विकाण्डा । त्रिकाण्डा, क्षेत्रभक्तिः ॥

पुरुषात्प्रमाणाद्वा ॥ १ । ३ । ३९ ॥

आयामः प्रमाणं । प्रमाणवाची यः पुरुषशब्दस्तदन्ताद् द्विगोर्लुचि सत्यां स्त्रियां वा ङी भवति ॥ द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी, द्विपुरुषा वा परिखा ॥

नः पत्यन्तस्य ॥ १ । ३ । ४० ॥

पतिशब्दान्तस्य स्त्रियां नकारादेशो वा भवति ॥ दृढपत्नी । दृढपतिः ॥ वृद्धपत्नी । वृद्धपतिः ॥ बहुपत्नी । बहुपतिः ॥

सपत्न्यादौ ॥ १ । ३ । ४१ ॥

सपत्न्यादिषु स्त्रियां पत्युर्नित्यं नादेशः समानस्य सभावपुंभावाभावश्च निपात्यते ॥ सपत्नी । एकपत्नी । वीरपत्नी भार्याः ।

पतिवत्न्यन्तर्वत्न्यावविधवागर्भिण्योः ॥ १ । ३ । ४२ ॥

पतिवत्न्यविधवायामन्तर्वत्नीति गर्भिण्यां मतुप्रत्ययान्तौ निपात्येते ॥ पतिवत्नी अविधवा । अन्तर्वत्नी गर्भिणी ॥ अन्यत्र पतिमती पृथिवी ॥ अतः अस्यां शालायामस्तीति अन्तर्वती शाला ॥

रोहिणरेवतान्नक्षत्रे ॥ १ । ३ । ४३ ॥

रोहिणरेवत इत्येताभ्यां स्त्रियां नक्षत्रे विषये ङी भवति ॥ रोहिणी । रेवती, नक्षत्रे ॥ अन्यत्र रोहिणा, रेवता ॥

नीलात्प्राण्यौषध्योः ॥ १ । ३ । ४४ ॥

नीलशब्दात्प्राणिनि औषधौ च वर्त्तमानात् स्त्रियां ङी भवति ॥ नीली गौः । नीली औषधिः ॥ अन्यत्र नीला शाटी ॥

नाम्नि क्ताच्च वा ॥ १ । ३ । ४५ ॥

नीलशब्दात् क्तान्ताच्च शब्दात्स्त्रियां नाम्नि ङी वा भवति ॥ नीली, नीला । प्रवृद्धविलूनी, प्रवृद्धविलूना ॥

केवलमामकभागधेयपापावरसमानार्यकृत-
सुमङ्गलभेषजात् ॥ १ । ३ । ४६ ॥

केवलादिभ्यः शब्देभ्यः स्त्रियां वर्तमानेभ्यः नाम्नि ङी भवति ॥ केवली । मामकी । भागधेयी । पापी । अवरी । समानी । आर्यकृती । सुमंगली । भेषजी ॥ नाम्नीति किम् ? केवला । मामिका ॥

कुण्डभाजगोणस्थलनागकुशकामुककटकबरात्
पात्रश्राणावपनाकृत्रिमस्थूलायसमैथुनेच्छुश्रोणिकेश-
वेशे ॥ १ । ३ । ४७ ॥

कुण्डादिभ्यः पात्रादिषु स्त्रीत्वविशिष्टार्थेषु ङी भवति ॥ कुण्डी पात्रम् । कुण्डान्या ॥ भाजी श्राणा भिक्षा । भाजान्या ॥ गोणी आपनम् । गोणान्या ॥ स्थली अकृत्रिमा । स्थलान्या ॥ नागी स्थूला । नागान्या ॥ कुशी आयसी । कुशान्या ॥ कामुकी मैथुनेच्छुः । कामुकान्या ॥ कटी श्रोणी । कटान्या ॥ कबरी केशवेशः । कबरान्या ॥

आर्यक्षत्रियाद्वान् ॥ १ । ३ । ४८ ॥

आर्य क्षत्रिय इत्येताभ्यां स्त्रियां वा आन्प्रत्ययो भवति ॥ आर्या, आर्याणी ॥ क्षत्रियाणी, क्षत्रिया ॥ अधवयोगेऽयं विधिः । धवयोगे तु परत्वात् ङी ॥

धवाद्योगादज्येष्ठादिभ्यः ॥ १ । ३ । ४९ ॥

धवो भर्ता तदभिधायिनोऽकारान्ताच्छब्दात् योगात् तत्सम्बंधात् स्त्रियां वर्तमानात् ङी प्रत्ययो भवति ज्येष्ठ इत्येवं प्रकारान् वर्जयित्वा ॥ प्रष्ठस्य भार्या प्रष्ठी । प्रचरी । गणकी । आर्यस्य भार्या आर्यी । माहामात्री । क्षत्रियी ॥ योगादिति किम् ? देवदत्ता भार्या । स्वयमेव न तद्योगात् ॥ अज्येष्ठादिभ्य इति किम् ? ज्येष्ठा । कनिष्ठा ॥

पूतक्रत्वग्निवृषाकपिकुसितकुसीदादैङ् च ॥१।३।५०॥

पूतक्रत्वादिभ्यो धवाख्येभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङी भवति । एकारश्चैषामन्तादेशः ॥ पूतक्रतोर्भार्या पूतक्रतायी ॥ अग्नायी । वृषाकपायी । कुसितायी । कुसीदायी ॥

मनोर्वा ङैच् ॥ १ । ३ । ५१ ॥

एजित्यनेन प्रत्यहारः गृह्यते

मनुशब्दोद्धवाख्यात् तद्योगात् स्त्रियां वर्तमानात् वा ङी भवति ॥ ङी सन्नियोगे चास्य ङैजन्तादेशः ॥ मनोर्भार्या मनायी । मनावी । मनुः ॥ ङैजिति ङकार आदेश सूचनार्थः ॥

मातुलाचार्योपाध्यायादान् च ॥ १ । ३ । ५२ ॥

मातुलादिभ्यो धवाख्येभ्यः तद्योगात् स्त्रियां वा ङी आन् च प्रत्ययौ भवतः ॥ मातुली । मातुलानी । मातुला ॥ आचार्यी । आचार्याणी । क्षुभ्नादिः-आचार्या ॥ उपाध्यायी । उपाध्यायानी । उपाध्याया ॥

वरुणेन्द्रमृडभवशर्वरुद्रादान् । १ । ३ । ५३ ।

वरुणादिभ्यो धवाख्येभ्यस्तद्योगात् स्त्रियामान्नित्यं भवति । वरुणस्य भार्या वरुणानी । इन्द्राणी । मृडानी । भवानी । शर्वाणी । रुद्राणी ।

सूर्याद्देवतायाम् । १ । ३ । ५४

सूर्यशब्दात् धवाख्यात्तद्योगाद्देवतायां स्त्रियामान् भवति । सूर्यस्य भार्या देवता सूर्याणी । अन्या सूरी ।

आङ् । १ । ३ । ५५ ।

सूर्यशब्दात् धवाख्यात्तद्योगाद्देवतायां स्त्रियामाङ्प्रत्ययो भवति । सूर्यस्य भार्या देवता सूर्या । एवं द्वैरूप्यम् । योगविभाग उत्तरत्र आङनुवृत्त्यर्थः ।

यवनयवाल्लिपि दुष्टे । १ । ३ । ५६ ।

यवनयवाभ्यां यथाक्रमं लिपौ दुष्टे चार्थे स्त्रियामान् भवति । यवनानां लिपिर्यवनानी । यवनाऽन्या । दुष्टो यवो यवानि । यवाऽन्या ।

हिमाख्यादुरौ । १ । ३ । ५७ ।

हिमाख्याद्ग्रामुरौ महत्यर्थे स्त्रियामान् भवति । उरुहिमं हिमानी । हिमाऽन्या । उरुवरण्यं अरण्यानी । अन्या अरण्या

वेदक्तिनो ङी । १ । ३ । ५८ !

क्तिन्वर्जितादिकारान्तात् स्त्रियां ङी वा भवति । शक्तिः । शक्ती । यष्टिः । यष्टी । अंगुलिः । अंगुली । आत्मंभरी । आत्मंभ[1]रिः स्त्री । तकारः किम् ? । नीः । सेनानी

---

१ अखुरोरिति उत इत्यस्य विशेषणम् । गुणमात्रवृत्ते शब्दस्य स्त्रीत्वव्यपदेशाभावात् । गुणादित्यस्य गुणवति द्रव्ये वर्तमानाच्छब्दात्

स्त्री । अक्तिन इति किम् ? । कृतिः । हृतिः । क्तिन्निति नकारः किम् ? रन्तिः । रन्ती ।

गुणादुतोऽचोऽखरोः । १ । ३ । ५८ ।

अचः परो य उकारस्तदन्तात् खरुशब्दवर्जिताद्गुणवचनात् स्त्रियां ङी वा भवति । पटुः । पट्वी । मृदुः । मृद्वी कन्या । गुणादिति किम् ? । आखु[1]रियं । चिकीर्षुरियम् । इषुरियं कन्या । पटूयति क्विप् पटूः स्त्रीः । अच इति किम् ? पांडुरियम् । बभ्रुरियम् । येन नाव्यधानं तेनव्यवहितेऽपि वचनप्रामाण्यादेकेन वर्णेन व्यवधानमाश्रियते । इति न्यायादत्र न भवति । अखरोरिति किम् ? खरुरियं कन्या ।

श्लोकः—द्रव्याश्रयो गुणो द्रव्यं क्रियापूर्वापरान्तिका ।
आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । इति

चन्द्रभागान्नद्याम् । १ । ३ । ६० ।

चंद्रभागशब्दात् नद्यां स्त्रियां ङी वा भवति । चन्द्र-

ङी प्रत्ययो ज्ञातव्यः । अत्र मृदु, पटु इत्यादीनामन्त्यस्योकारस्याचः परत्वं नास्ति कथं ङीं प्रत्ययः ? । इति चेत् येन नाव्यवधानं तेन व्यवहितेऽपि आचार्याणां वचनप्रामाण्याद् भवतीत्येकेन वर्णेन व्यवधानमाश्रियत इति । मृदु इत्यत्र ऋकारात्परस्य दकारस्य व्यवधानं कृत्वा उकारस्याचः परत्वं तस्मात् ङी ।

१—अत्र आखुरिति जातिवाची । इषुरिति द्रव्यवाची । चिकीर्षुरिति क्रियावाची । अतो न ङी भवति । खरुरिति गर्ववाची गर्वो गुण इति गुणवाचिनः प्राप्ते निषेधः ! पाण्डु बभ्रु इत्यत्र हलद्वयव्यवधानेन उकारस्याचः परत्वं नास्तीति ङी न भवति । खनत्यवधीरयति परेषां चित्तानीति खरुः । अथवा खादति ग्रसते परमात्माकार्यमिति खरुर्गवः ।

चेतुमिच्छुः चिकीर्षुः चीञ् चयने ।

भागी । चन्द्रभागा । एवं नवा नदी । चन्द्रभागाऽन्या । चांद्रभागादिति वा पाठः ।

बह्वादेः ॥ १ । ३ ६१ ॥

बह्वादिभ्यः स्त्रियां वा ङी भवति । बहुः । बह्वी । चण्डी । चण्डा ॥

शोणाद्ययेतैतहरितभरतरोहिताद्वर्णात्तो नश्च ॥ १ । ३ । ६२ ॥

शोणादिभ्यो वर्णवाचिभ्यः स्त्रियां ङी वा भवति तद्योगतकारस्य नकारः ॥ हिता । लोहिनी लोहिता । इति रिफिडादित्वाल्लत्वम् । अन्यत्राडेव ॥

क्नोऽसितपलितात् ॥ १ । ३ । ६३ ॥

असितपलिताभ्यां वर्णवाचिभ्यां स्त्रियां ङी वा भवति । तत्सन्नियोगे च तकारस्य क्नादेशः ॥ असिक्नी, असिता । पलिक्नी, पलिता ॥

कालशबलसारङ्गपिङ्गलकल्मषात् ॥ १ । ३ । ६४ ॥

कालादिभ्यो वर्णवाचिभ्यः स्त्रियां नित्यं ङी भवति ॥ काली । शबली । सारङ्गी । पिशङ्गी । कल्माषी ॥ अन्यत्र काला, शबलेत्यादि ॥

जातेरस्त्रीयशूद्रात् ॥ १ । ३ । ६५ ॥

अकारान्ताज्जातिवाचिनः स्त्रियां ङी भवति ॥ न चेत्स्त्रयं यान्तं शूद्रशब्दो वा भवति ॥ कुक्कुटी । मयूरी । तटी । हरीतकी । ब्राह्मणी । वृषली । नाडायनी । करी । कुटी । पात्री ॥ अस्त्रीयशूद्रादिति किम् ? यूका । मक्षिका । इभ्या । क्षत्रिया । शूद्रा । धवयोगलक्षणो ङी भवत्येव ॥ शूद्रस्य भार्या शूद्री ॥

पाककर्णवालान्तात् ॥ १ । ३ ६६ ॥

पाकाद्यन्ताज्जातिवाचिनः स्त्रियां ङी भवति ॥ तृणपाकी । ओदनपाकी । आखुकर्णी । शंकुकर्णी । सालपर्णी । गोवाली । अश्ववाली । स्त्रर्थत्वाद्वचनम् ॥

पुष्पादसत्काण्डप्रान्तशतैकाञ्चः ॥ १ । ३ । ६७ ॥

सदादिवर्जितात् परो यः पुष्पशब्दः तदन्ताज्जातिवाचिनः स्त्रियां ङी भवति ॥ शङ्खपुष्पी । सुवर्णपुष्पी ॥ सदादिप्रतिषेधः किम् ? सत्पुष्पा । काण्डपुष्पा । प्रान्तपुष्पा । शतपुष्पा । एकपुष्पा । प्रत्यक्पुष्पा ॥

फलादसंभस्त्राजिनैकशणपिण्डात् । १ । ३ । ६८ ।

समादिवर्जितात्परो यः फलशब्दस्तदन्ताज्जाति वाचिनः स्त्रियां ङी भवति ॥ दासिफली । सीफली एकफली पूगफली समादिप्रतिषेधः किम् ? संफला । भस्त्रफला । अजिनफला ॥ शणफला । पिण्डफला ॥

मूलादनञः ॥ १ । ३ । ६९ ॥

नञ्वर्जितात्परो यो मूलशब्दस्तदन्ताज्जातिवाचिनः स्त्रियां ङी भवति ॥ दर्भमूली । सिर्यमूली ॥ अनञ इति किम् ? अमूला ॥

नुरितः ॥ १ । ३ । ७० ॥

इकारान्तान्मनुष्यजातिवाचिनः स्त्रियाँ ङी भवति ॥ अवन्ती । कुन्ती । आगायनी । दाक्षी ॥ नुरिति किम्? तित्तिरिः॥

ऊरुतोऽप्राणिनश्चायुरज्ज्वादिभ्यः ॥ १ । ३ । ७१ ॥

उकारान्तात् नृजातिवाचिन अप्राणिजातिवाचिनश्च स्त्रियामूप्रत्ययो भवति युशब्दान्तं रज्ज्वादींश्च वर्जयित्वा ॥ कुरूः । इक्ष्वाकूः । ब्रह्मबन्धूः ॥ अप्राणिजातेः—अलाबूः । कर्कन्धूः ॥ अप्राणिनश्चेति किम् ? आखुः । कृकवाकुः ॥ अयुरज्ज्वा-

दिभ्य इति किम्? अध्वर्युरियं कन्या । रज्जुः । हनुः ॥ रज्ज्वादयः प्रयोगगम्याः ॥

ऊरूत्तरपदादौपम्ये ॥ १ । ३ । ७२ ॥

ऊरूत्तरपदात् शब्दात् स्त्रियां वर्तमानात् औपम्ये गम्यमाने ऊ प्रत्ययो भवति ॥ कदलीस्तम्भोरूः । करिकरवृत्तोरूः ॥ औपम्य इति किम्? वृत्तोरूः ॥

तहसफसहितसंहितलक्ष्मणवामादेश्च ॥१।३।७३॥

सहाद्यादेरूरूत्तरपदात् स्त्रियामूप्रत्ययो भवति ॥ सहोरूः । सफोरूः ॥ सफशब्दः संश्लिष्टार्थः ॥ सहितोरूः । लक्ष्मणोरूः । वामोरूः ॥

बाह्वन्तकद्रुकमण्डलोर्नाम्नि ॥ १ । ३ । ७४ ॥

बाह्वन्तात् कद्रूकमण्डलुशब्दाभ्यां च स्त्रियां संज्ञायां ऊप्रत्ययो भवति ॥ मद्रबाहूः । भद्रबाहूः । कद्रूः । कमण्डलूः ॥ नाम्नीति किम्? वृत्तबाहुः । कद्रुः । कमण्डलुः ॥

नारीसखीपङ्गूः श्वश्रूः ॥ १ । ३ । ७५ ॥

नार्यादयः स्त्रियां ङ्यूप्रत्ययान्ताः कृतकार्या निपात्यन्ते नृनरयोःनारी ॥ सखी सखयोः सखी । पङ्गुशब्दस्य पङ्गूः ॥ श्वशुरस्य श्वश्रूः ॥

यूनस्तित् ॥ १ । ३ । ७६ ॥

युवन्नित्येतस्मात् स्त्रियां तित्प्रत्ययो भवति ॥ युवतिः । तकारः ष्यदर्थः ॥ (ष्यत्प्रत्याहारार्थः) इत्यपि क्वचित् ।

ङ्यां वनो रः ॥ १ । ३ । ७७ ॥

ङीप्रत्यये परे वनो रेफादेशो भवती ॥ धीवरी । पीवरी बहुधीवरी ॥

लुगतः ॥ १ । ३ । ७८ ॥

ङ्यां पूर्वस्याकारस्य लुग्भवति ॥ कुरुचरी ॥ मद्रचरी ।

मत्स्यतद्धितस्य हलो यः ॥ १ । ३ । ७८ ॥

मत्स्यशब्दस्य तद्धितप्रत्ययस्य च यो यकारो हलः परस्तस्य ङ्यां लोपो भवति ॥ मत्सी । मनुषी । गार्गी ॥

सूर्यागस्त्ययोच्छे च ॥ २ । ३ । ८० ॥

सूर्य, अगस्त्य, इत्येतयोर्यकारस्य छे प्रत्यये लुग्भवति । सूर्यस्य स्त्री सूरी । अगस्ती ॥ सूर्यस्येयं सौरी ॥ आगस्ती । प्रभा ॥ सौरीय: । आगस्तीय: ॥

लुच्यगोणीसूच्योः ष्यतः ॥ १ । ३ । ८१ ॥

तद्धितस्य लुचि परतः ष्यतो लुग्भवति । गौणी सूची शब्दौ वर्जयित्वा ॥ पञ्चेन्द्राण्यो देवता अस्य पंचेन्द्र: । दशे-न्द्र: । पंचभिः शष्कुलीभिः क्रीत: पंचशष्कुल: ॥ कुवल्या विकार: फलं कुवलम् । आमलकम् ॥ अगोणीसूच्योरिति किम्? पंच गोणी; । दशसूची: ।

गोण्या ह्रस्वो मेये ॥ १ । ३ । ८२ ॥

गोणीशब्दस्योपचारात् गोणीमेयेऽर्थे वर्तमानस्य ह्रस्वो भवति ॥ गोणी मात्रो गोणि: । मेय इति किम् ? गोणी ॥

केण्ङ्यः ॥ १ । ३ । ८३ ॥

अणो ङीप्रत्ययस्य च कप्रत्यये परे ह्रस्वो भवति ॥ सोम-पकः । सोमपिका । लक्ष्मिका । वधुका ॥ ङ्य:पद्धिका । मृद्धि-का । दारदिका ॥ ङीग्रहणं प्राक्कात्कपिपुभावधानार्थ: ॥

॥ न कचि ॥ ८ । ३ । ८४ ॥

कचि प्रत्यये परे अण्ङ्योर्ह्रस्वो न भवति ॥ बहुलक्ष्मीं-क: । बहुब्रह्मबन्धूक: ॥

वाङः ॥ १ ३ । ८५ ॥

आङः कपि परे ह्रस्वो वा भवति ॥ प्रियखट्वकः । प्रियखट्वाकः । बहुमालकः । बहुमालाकः ।

इच्चापुंसोऽनित्क्याप्यसुपः ॥ १ । ३ । ८६ ॥

अपुंलिंगार्थाच्छब्दात् विहितस्याङः स्थाने अनितः अनकारानुबन्धकस्य प्रत्ययस्यावयवे कि ककारे आडि आङ्परे परतः इकारो ह्रस्वश्च आदेशो वा भवतः ॥ असुपः स न चेत्ककारात्पर आङ् सुपः परो भवति ॥ खट्विका । खट्वाका ॥ खट्वका । अपुंस इति किम्? न विद्यते खट्वा यस्या इत्यखट्वा । अल्पा खट्वाः अखट्विका ॥ अनित इति किम्? अनुकंपिता आर्द्रका ॥ असुप इति किम्? प्रियखट्वाकमतिक्रान्ता अतिप्रियखट्वाका

स्वज्ञाजभस्त्राधातु कया: ॥ ४ । १ । ८७ ॥

स्वादिभ्यः अधात्ववयवो यः ककारो यकारश्च तस्माच्च परस्याङः स्थाने अनित्प्रत्ययावयवके ककारे आङ् परे परतः इकारादेशो भवति वा ॥ न चेत् स ककारात् पर आङ् सुपः परो भवति ॥ कुत्सिता स्वा ज्ञातिः स्विका । स्वका । निःस्विका । निःस्वका । बहुस्विका । बहुस्वका । ज्ञिका । ज्ञका अजिका । अजका । निर्भस्त्रिका । निर्भस्त्रका ॥ चटकिका । चटकका । एलकिका । एलकका । इभ्यिका । इभ्यका । आचार्यिका । आचार्यका ॥ अधातु ग्रहणं किम्? सुशोकिका । सुनयिका ॥

द्व्येषसूतपुत्रवृन्दारकस्य ॥ १ । ३ । ८८ ॥

द्व्यादीनामन्त्यस्य अनित्क्याङ्परे असुप इकारादेशो भवति वा ॥ द्विके । द्वके । एषिका । एषका । सूतिका । सूतका । पुत्रिका । पुत्रका । वृन्दारिका । वृन्दारका ॥

वौ वर्तिका ॥ १ । ३ । ८९ ॥

र्वौ शकुनावभिधेये वर्तिकेति इत्वं वा निपात्यते ॥ वर्तिका । वर्तका । शकुनिः ॥ वर्तिकान्या ॥

त्यायदाद्यतः ॥ १ । ३ । ८० ॥

त्यप्रत्ययान्तस्य यदादिवर्जितस्य च योऽकारस्तस्यानित्प्रत्ययावयवे ककारे आङ् परे परतः नित्यमिकारो भवति ॥ न चेत्स आङ् सुपः परो भवति ॥ इहत्यिका । अमात्यिका । दाक्षिणात्यिका । पाश्चात्यिका । जटिलिका । अष्टिका । कारिका । हारिका ॥ यदादिनिषेधः किम् ? यका । सका । क्षिपका । ध्रुवका ॥ अनित इति किम् ? अनुकम्पिता । देवदत्ता । देवका । जिनका ॥ अनित इति पर्युदासेन प्रत्ययग्रहणादिह न भवति—शक्नोतीति शका । एषा शका ॥ असुप इति किम् ? बहुपरिव्राजका नगरी ॥ असुप इति प्रसज्य प्रतिषेधादिहापि भवति—बहुचर्मिका रथ्या ॥

नरिकामामिका ॥ १ । ३ । ८१ ॥

नरकमामकशब्दयोरकारस्याप्रत्ययावयवे ककारे आङ्परे परतः इत्वं निपात्यते । नरान्कायतीति नरिका । ममेयं मामिका ॥

तारकावर्णकाऽष्टेतिस्तान्तवे ॥ १ । ३ । ८२ ॥

तारका वर्णका इति निपात्येते यथासंख्यं ज्योतिषि तान्तवे चाभिधेये ॥ तारका ज्योतिः । वर्णका तान्तवम् । प्रावरणविशेषः ॥ अन्यत्र तारिका नद्या । वर्णिका कथयाः ॥

योगे ॥ १ । ३ । ८३ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यदित ऊर्ध्वमुपक्रमयिष्यामः । तत्संनियोगे भवति । नासतीति वेदितव्यम् । योगः सम्बन्धः एकार्थता व्यपेक्षा वा । एक पद्ये एकार्थता ।

अन्यत्र व्यपेक्षा । तत्र, "हाधिकसमय० ॥ १ । ३ । १०० ॥" इत्यसौट्शस् ॥ देवदत्तं जिनदत्तं चान्तरा कमण्डलुः ॥ इह न भवति, देवदत्त जिनदत्तयोरन्तरा कमण्डलुः । अत्र देवदत्तजिनदत्तयोः कमण्डलुना सम्बन्धो नान्तरेत्यनेनेति द्वितीया ॥ "श्रितादिभिः । २ । १ ३३ ॥" धर्मं श्रितो धर्मश्रितः । इह न भवति—पश्य धर्मम् । श्रितो देवदत्तो गुरुदत्तकुलम् ॥ "ङसोऽपत्ये ॥ २ । ४ । १८ ॥ "उपगोरपत्यमौपगवः । इह न भवति—गृहमुपगोरपत्यं देवदत्तस्य ॥ कर्मणोऽण् ॥ ४ । ३ । १०९ ॥" कुम्भं करोतीति कुम्भकारः । इह न भवति—पश्य कुम्भं करोति कटं वरुटः ॥

जातिर्बहुवद्वैकाख्यास् ॥ १ । ३ । ८४ ॥

जात्यर्थ एकः आख्यायां नामधेयेऽभिधेयत्वेन वर्तमानो बहुवद् वा भवति ॥ सम्पन्नो यवः । सम्पन्नो यवाः । सम्पन्नो व्रीहिः । सम्पन्ना व्रीहयः ॥ एकेति किम् ? शोभने अक्षिणी कलिङ्गेषु । अत्र सव्येतरनेत्रसमुदायद्वयविवक्षा ॥

द्वौ चास्मदोऽविशेषणे ॥ १ । ३ । ८५ ॥

अस्मदो द्वावेकश्चार्थौ बहुवद् वा भवति । अविशेषणेन चेत्तस्य विशेषणं प्रयुज्यते ॥ अहं ब्रवीमि । वयं ब्रूमः । आवां ब्रूवः ॥ अविशेषण इति किम् ? अहं देवदत्तो ब्रवीमि । अहं गार्ग्यो ब्रवीमि ।

फल्गुनी प्रोष्ठपदस्य नक्षत्रम् ॥ १ । ३ । ८६ ॥

फल्गुनीशब्दस्य प्रोष्ठपदशब्दस्य च द्वौ नक्षत्रशब्दवाच्यावर्थौ बहुवद् वा भवतः ॥ कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फाल्गुन्यः, कदापूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः ॥ नक्षत्रमिति किम् ? फल्गुनीषु जाते फल्गुन्यौ । माणविके ॥ द्वाविति किम् ? एकस्मिन् ज्योतिषि मा भूत् ॥

अव्ययात्स्वौजस् ॥ १ । ३ । ८७ ॥

अव्ययात् सु औ जस् इत्येते प्रत्यया भवन्ति ॥ अथो स्वस्ते गृहम् । अथो स्वस्तव गृहम् । अथो उच्चैर्मे गृहम् ॥ अथो उच्चैर्मम गृहम् उगावितौ ॥ औजस् गृहणमुत्तरार्थम् ॥

एकद्विबहौ ॥ १ । ३ । ८८ ॥

एकत्वादिसंख्येऽर्थे वर्तमानाच्छब्दाद्यथासंख्यमेकद्विबहुषु सु औ जस् प्रत्यया भवन्ति ॥ पुरुषः । पुरुषौ । पुरुषाः । अधिकारो ऽयमातङ् विधानात् ॥

आमन्त्र्ये ॥ १ । ३ । ८९ ॥

आमन्त्र्यमाणेऽर्थे वर्तमानात् शब्दादेकत्वद्विबहुषु स्वौजसो भवन्ति ॥ हे देवदत्त । हे देवदत्तौ । हे देवदत्ताः ॥ षष्ठिप्राप्तौ वचनम् ॥

हाधिक्समयानिकषोपर्युपर्यध्यध्यधोऽधोऽत्यन्तरान्तरेण तस्पर्यभिसर्वो भयैश्चाप्रधानेऽमौट्शस् ॥ १ । ३ । १०० ॥

हार्थमप्रधानम् । हाधिगादिभिस्तसन्तैश्च पर्यादिभिरव्ययैर्योगे अप्रधानेऽर्थे वर्तमानादेकद्विबहुषु अमौट्शसः प्रत्यया भवन्ति ॥ हा देवदत्तं वर्धते व्याधिः । धिग्देवदत्तमयशः प्रवृद्धम् । समयापर्वतं नदी । निकषापर्वतं वनम् । उपर्युपरि ग्रामं ग्रामाः । अधोऽधोनरकं नरकाः । अति वृद्धन्तु कुरून्महत्वलम् । अन्तरा निषधं नीलं च विदेहाः । अन्तरेण नीलं निषधं च विदेहाः । अन्तरेण पुरुषकारं न किञ्चित् । परितो ग्रामम् । सर्वतो ग्रामम् । उभयतो ग्रामम् वनानि ॥ अप्रधान इति किम ? प्रधाने न भवति । चकारोऽनुक्तसमुच्चयार्थः । "बुभुक्षितं न प्रतिभाति किञ्चित्" ॥ टशावितौ ॥ अप्रधान इत्यधिकारः आपादपरिसमाप्तेः ॥

वीप्स्यलक्षणेत्थं भवनेष्वभिना ॥ १ । ३ । १०१ ॥

अवयवशः समुदायस्य क्रियादिना साकल्येन व्याप्तीच्छा वीप्सा । तत्कर्म वीप्स्यम् । लक्ष्यंते दृश्यंते येन तल्लक्षणं चिह्नम् । केनचिद्विवक्षितेन भावः इत्थंभावः । तद्विषय इत्थं भवनम् । एतस्मिन्नभीत्येनेन युक्तेऽप्रधानेऽर्थे वर्तमानादेकद्विबहुषु अमौट्शसो भवन्ति । वृक्षं वृक्षमभिसिच्यते । वृक्षमभिद्योतते विद्युत् । साधुर्देवदत्तो मातरमभि ॥

भागिनि च प्रतिपर्यनुभिः ॥ १ । ३ । १०२ ॥

स्वीक्रियमाणोंशो भागः तदीश्वरो भागी । वीप्स्य लक्षणेत्थंभवनेषु भागिनि च प्रतिपर्यनु इत्येतैर्युक्तेऽप्रधानेऽर्थे वर्तमनादेकद्विबहुषु अमौट्शसो भवन्ति ॥ वीप्स्ये—वृक्षं वृक्षं परि । वृक्षं वृक्षमनु । लक्षणे-वृक्षं प्रति । वृक्षं परि । वृक्षमनु विद्योतते विद्युत् ॥ इत्थं भवने—साधुर्देवदत्तो मातरं प्रति । मातरं परि । मातरमनु । भागिनी—यदत्र मां प्रति स्यात्-मां परि मामनु तद्दीयताम् ॥ एतेष्विति किम्? अनुवनस्याशनिर्जाता । समीप इत्यर्थः ॥

टार्थेऽनुना ॥ १ । ३ । १०३ ॥

हेत्वादि टार्थः तस्मिन्ननु इत्यनेन योगेऽप्रधाने एकद्विबहुषु अमौट्शसो भवन्ति ॥ शान्तिपट्टकप्रसरणमनु प्रावर्षत् पर्जन्यः । तेन हेतुनेत्यर्थः । नदीमनु वसिता सेना । पर्वतमनुवसिता सेना । तेन सहावबद्धीकृतान्सैवेत्यर्थः ।

उत्कृष्टेऽनूपेन ॥ १ । ३ । १०४ ॥

अनु उप इत्येताभ्यां युक्ते अप्रधाने उत्कृष्टे अधिकेऽर्थे-वर्तमानादेकद्विबहुषु अमौट्शसो भवंति ॥ अनुशाकटायनं वैय्याकरणाः । उपविशेषवादिनं कवयः । तस्माद्धीना इत्यर्थः ।

कर्मणि ॥ १ । ३ । १०५ ॥

क्रियत इति कर्म तन्निर्वर्त्यं विकार्यं प्राप्यं तस्मिन्नप्रधानेऽर्थे वर्तमानादमौटशसो भवन्ति ॥ कुम्भं करोति । शरं लुनोति । आदित्यं पश्यति । अहिं लङ्घयति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । अजां नयति ग्रामम् । गां दोग्धि पयः । गोः पयो दोग्धि ॥ अपाययतीत्यपायादिविवक्षायां तु यथायोग्यं पञ्चम्यादयो भवन्ति ॥ क्रियते घटः । कृतः कटः । शतेन क्रीतः शत्यः । प्राप्तोदको ग्रामः । इत्यत्राभिहिते अभिधेयाभावान्न भवति ॥

॥ दिवः करणे वा ॥ १ । ३ १०६ ॥

येन कर्ता करोति तत्करणम् । दीव्यतेरर्थस्य यत्करणमप्रधानं तस्मिन्नमौट्शसो भवंति वा । अक्षान्दीव्यते । अक्षैर्दीव्यते । शलाका दीव्यंति । शलाकाभिर्दीव्यति ॥ करण इति किम् ? गृहे दीव्यति ॥

॥ कर्म च ॥ १ । ३ । १०७ ॥

दीव्यतेर्यत्करणं तत्कर्म च करणं च भवति ॥ अक्षाणां देवनम् । अत्र कर्मत्वे परत्वात् करणतृतीयां बाधित्वा कर्मषष्ठी । देवनाः अक्षाः । अत्र करणेऽनट् । अक्षैर्देवयते देवदत्तो गुरुदत्तेन । अत्र करणतृतीया । कर्मत्वाच्च प्रयोज्यस्य कर्मत्वं तत्प्रतिषेधश्च भवतः ॥

॥ न विनिमेयद्यूतपणम् ॥ १ । ३ । १०८ ॥

विनिमेयं क्रेयविक्रेयं द्यूतपणो द्यूतजेयम् । तदुभयं दिवेः प्राप्यं कर्म न भवति । कर्म कार्यं न करोतीत्यर्थः ॥ शतस्य दीव्यति । सहस्रस्य दीव्यति । क्रयविक्रये द्यूतपणत्वे वा । तद्विनियुङ्क्ते इत्यर्थः । कर्मत्वाभावे षष्ठी । शतस्य दीव्यते । शतस्य देवितव्यम् । शतस्य सुदेवम् । भावे लकृत्यखलर्थाः ।

शस्य द्यूतो देवदत्तः । कर्तरि क्तः ॥ विनिमेयद्यूतपणमिति किम् ? देवान् दीव्यति । स्तौतीत्यर्थः ॥

॥ वोपसर्गात् ॥ १ । ३ । १०८ ॥

उपसर्गात्परस्य दिवेः प्राप्यं यद्विनिमेयं द्यूतपणश्च तद्विकल्पेन कर्म न भवति ॥ शतं प्रदीव्यति । शतस्य प्रदीव्यति । इत्यादि ॥

॥ पणव्यवहोः ॥ १ । ३ । ११० ॥

पणतेर्व्यवपूर्वस्य च हरतेः प्राप्यं यद् विनिमेयं द्यूतपणश्च वा कर्म न भवति ॥ शतस्य पणते । शतं पणते । शतस्य व्यवहृति । शतं व्यवहरति । इत्यादि ॥

॥ स्मृत्यर्थदयीशां कर्म ॥ १ । ३ । १११ ॥

स्मरणार्थानां धातूनां दयितेरिष्टेश्च यत्कर्म तत्कर्म वा भवति ॥ मातुः स्मरति । मातरं स्मरति । मातुः स्मर्यते । माता स्मर्यते । इत्यादि । मातुरध्येति । मातरमध्येति । सर्पिर्दयते । सर्पिषो दयते । लोकानामीष्टे लोकानीष्टे ॥

॥ कृञः प्रतियत्ने ॥ १ । ३ । ११२ ॥

पुनर्यत्नः प्रतियत्नः । तत्र वर्तमानस्य करोतेः कर्म वा कर्म भवति ॥ एधोदकस्योपस्कुरुते । एधोदकमुपस्कुरुते । इत्यादि ॥

रुजोऽज्वरिसंताप्योः कर्तरि भावे ॥ १ । ३ । ११३ ॥

रुक् रुजा पीडा तस्याः ज्वरिसंतापिभ्यामन्येनाभिधीयमानायाः यत् कर्म तत् कर्म वा भवति । कर्तरि भवे-भावश्चेदस्या रुजः कर्ता भवति ॥ चोरं रुजति रोगः । चोरस्य रुजति । चोरमामयति । चोरस्यामयतीत्यादि ॥ अज्वरिसंताप्योरिति किम् ? औदरिकं ज्वरयति । अत्याशिनं संतापयति ।

हिंसायां जासनाटक्राथपिषनिप्रघ्नाम् ॥ १ । ३ । ११४ ॥

जासेति—जास हिंसायाम् । जस तोड़ने । नाटेति—नट अवस्पंदने । चुरादौ गृह्येते । नटि क्षुमोक्षणे । नट नृत्ताविति । अहिंसार्थत्वात् । क्राथेति—श्नथ क्नथ क्रथ क्लथ । चगो हिंसार्थाः । घटादिः—पिष संचूर्णने । एषां निप्र इत्येवं पूर्वस्य च हन्तेर्हिंसायां वर्तमानानां कर्म वा कर्म भवति ॥ चोरस्योज्जासयति । चोरमुज्जासयति । चोरस्योन्नाटयति । चोरमुन्नाटयति । चोरस्योत्क्राथयति । चोरमुत्क्राथयति । चोरस्य पिनष्टि । चौरं पिनष्टि । चोरस्य निहन्ति । चोरं निहन्ति । चोरस्य प्रहन्ति । चोरं प्रहन्ति । चोरस्य प्रणिहन्ति । चोरं प्रणिहन्ति । चोरस्य निप्रहन्ति । चोरं निप्रहन्ति ॥ बहुवचनं सर्वभेदभंगार्थम् ॥ हिंसायामिति किम् ? देवदत्तं बन्धनाज्जासयति । मोक्षयतीत्यर्थः ॥ नटं नाटयति । नर्तयतीत्यर्थः ॥ अन्यत्र—रागादीन् निहन्ति । निवर्तयतीत्यर्थः ॥

आशिषि नाथः ॥ १ । ३ । ११५ ॥

नाथतेराशिरर्थे वर्तमानस्य कर्म वा कर्म भवति ॥ सर्पिर्नाथते । सर्पिषो नाथते । सर्पिर्मे भूयादित्याशास्त इत्यर्थः ॥ अन्यत्र—माणवकमुपनाथति । अंग पुत्रक अधिष्ठेति याचतीत्यर्थः ॥

दृश्यभिवाद्योर्णिस्तङि ॥ १ । ३ । ११६ ॥

पश्यतेरभिवादयतेश्च यो णिस्तङ्विषये यत्र तङ् भवति । तस्य कर्म प्रयोज्य प्रकृति कर्ता कर्म वा भवति ॥ पश्यन्ति भृत्या राजानम् । दर्शयते भृत्यान् राजा । भृत्यैरिति वा ॥ अभिवादयति गुरुर्देवदत्तम् । तस्मिन्नाशिषं प्रयुङ्क्त इत्यर्थः ॥ अभिवादयते गुरुं देवदत्तः । गुरुणेति वा । आत्मन्याशिषं

प्रयोजयतीत्यर्थः । अथवाभिवदते गुरून् देवदत्तः । तमन्यः प्रयुङ्क्ते अभिवादयते गुरून् देवदत्तं जिनदत्तः देवदत्तेनेति वा ॥ तङीति विषयोपलक्षणात् तङभावेऽपि भवति । दर्शयमानो भृत्यान् राजा भृत्यैरिति वा ॥ अभिवादयमानो गुरुं देवदत्तः गुरुणेति वा ॥

अकर्मकात् ॥ १ । ३ । ११७ ॥

अविवक्षितकर्मकोऽकर्मकः । उत्तरत्र नित्यग्रहणात्तस्मात्परो यो णिस्तस्य कर्म वा कर्म भवति ॥ पचति देवदत्तः । पाचयति देवदत्तं देवदत्तेनेति वा । लिखति देवदत्तः । लेखयति देवदत्तं देवदत्तेनेति वा ।

नित्यकर्मगमिज्ञाद्यर्थशब्दकर्मदृशोऽखाददिक्रन्दशब्दायह्वः ॥ १ । ३ । ११८ ॥

नित्यमकर्मकेभ्यः गमेर्जानातेरद्येश्चार्थौ येषां तेभ्यः शब्दकर्मभ्यः शब्दनक्रियेभ्यः शब्दार्थेभ्यः दृशित्येतस्माच्च धातोर्यो णिस्तस्य कर्म नित्यं कर्म भवति खाद् आदि क्रन्द शब्दायह्व इत्येतान् वर्जयित्वा ॥ आसयति देवदत्तम् । शाययति देवदत्तम् । गमयति माणवकं ग्रामम् । यापयति माणवकं ग्रामम् । ज्ञापयति माणवकं धर्मम् । बोधयति माणवकं धर्मम् । भोजयति माणवकमोदनम् । आशयति माणवकमोदनम् ॥ शब्दनक्रियेभ्यः-विलापयति देवदत्तं पुत्रम् । आभाषयति देवदत्तं गुरुम् ॥ शब्दार्थेभ्यः-श्रावयति देवदत्तं शास्त्रम् । उपलम्भयति देवदत्तं विद्याम् ॥ दृश्—दर्शयति रूपतर्कं कार्षापणम् ॥ एतेभ्य इति किम् ? पाचयत्योदनं देवदत्तेन ॥ अखाददिक्रन्दशब्दायह्व इति किम् ? खादयति पिण्डं देवदत्तेन । आदयति पिण्डं देवदत्तेन । क्रन्दयति देवदत्तेन । शब्दाययति देवदत्तेन । ह्वाययति देवदत्तेन ॥

भक्षेर्हिंसायाम् ॥ १ । ३ । ११८ ॥

भक्षयतेर्हिंसायामावृत्तेः परस्य णेः कर्म कर्म वा भवति ॥ भक्षयन्ति बलीवर्दाः सस्यम् । भक्षयन्ति बलीवर्दान् सस्यम् । सस्यवदेतद्वान् हिंसितो भवति ॥ हिंसायामिति किम् ? भक्षयति पिण्डं देवदत्तेन ॥

वहेः प्रवेयम् ॥ १ । ३ । १२० ॥

वहतेः परस्य णेर्यत्कर्म प्रवेयं यत्प्राजन्ति तत्कर्म भवति ॥ वाहयति बलीवर्दान् भारम् ॥ प्रवेयमिति किम् ? वाहयति भारं देवदत्तेन ॥

हृक्रोर्वा ॥ १ । ३ । १२१ ॥

हरतेः करोतेश्च यो णिस्तस्य कर्म कर्म वा भवति ॥ हरति भारं देवदत्तः । हारयति भारं देवदत्त देवदत्तेन वा ॥ आहारयत्यौदनं देवदत्तं देवदत्तेन वा ॥ करोति कटं देवदत्तः ॥ कारयति कटं देवदत्तम् । देवदत्तेन वा ॥ विकुरुते स्वरान् क्रोष्टा विकारयति स्वरं क्रोष्टारम् । क्रोष्टुना वा ॥

शीङ्स्थासोऽधेराधारः ॥ १ । ३ । १२२ ॥

अधिपूर्वाणां शीङ् स्था आस इत्येतेषां य आधारः क्रियाश्रयस्य कर्तुः कर्मणो वा धारणात् अधिकरणं तत्कर्म भवति ॥ ग्राममधिशेते । ग्रामोऽधिशयितः । ग्राममधितिष्ठति । ग्रामोऽधिष्ठितः । ग्राममध्यास्ते । ग्रामोऽध्यासितः ॥ अधेरिति किम् ? ग्रामे शेते । पर्वते तिष्ठति । नद्यामास्ते ॥

वसोऽनूपाध्याङः ॥ १ । ३ । १२३ ॥

अनु उप अधि आङ् इत्येतत्पूर्वस्य वसतेर्य आधारः तत्कर्म भवति । ग्राममनुवसति । ग्रामोऽनुषितः । ग्राममुपवसति । ग्राममधिवसति । ग्राममावसति ॥ अन्वादिसाहचर्या-

दुपेत्यस्य स्थानार्थस्यैव ग्रहणात् ग्रामे उपवसति । भोजननिवृत्तिं करोतीत्यत्र न भवति ॥

अभिनिविशश्च ॥ १ । ३ । १२४ ॥

अभि नि इत्येतत्समुदयपूर्वस्य विशेर्यं आधारः तत्कर्म भवति ॥ ग्राममभिनिविशते । ग्रामोऽभिनिविश्यते । ग्रामोऽभिनिविष्टः ॥ चकारात् क्वचिन्न भवति—अर्थेऽभिनिविष्ट इति ॥

कालाध्वभावदेशं वा कर्म चाकर्मणाम् ॥ १ । ३ । १२५ ॥

कालो मुहूर्तादिः । अध्वा गन्तव्यक्षेत्रं क्रोशादिः । भावः क्रिया गोदोहादिः । देशो जनपदः ग्रामनदीपर्वतादिः । सोऽयमाधारोऽकर्मकाणां वा कर्म भवति ॥ अकर्म च । कालः—मासमास्ते ! मास आस्यते ॥ अध्वा—क्रोशं स्वपति । क्रोशः सुप्यते ॥ भावः—ओदनपाकं शेते । ओदनपाकः शय्यते ॥ देशः—ग्रामं वसति । ग्राम उष्यते । पक्षे—रात्रौ सुप्यते । क्रोशे सुप्यते । गोदोहे शेते । ग्रामे वसति ॥ अकर्म चेति किम् ? मासमास्यते । क्रोशं सुप्यते । गोदोहमासितम् । गोदोहमासितः ॥ इति भावादौलादिः ॥ अकर्मणामिति किम् ? अहन्यध्ययनमधीते ॥

कालाध्वनोर्व्याप्तौ ॥ १ । ३ । १२६ ॥

काले अध्वनि चाप्रधाने वर्तमानात् व्याप्तौ अमौट्शसो भवंति ॥ मासं गुडापूपाः । मासमधीते । क्रोशं पर्वतः । क्रोशं कुटिला नदी ॥ व्याप्ताविति किम् ? मासेऽधीते । मासस्याधीते । क्रोशेऽधीते । क्रोशस्याधीते ॥

टाभ्यांभिस्सिद्धौ ॥ १ । ३ । १२७ ॥

सिद्धौ क्रियानिष्पत्तौ द्योत्यायां कालवाचिनोऽध्ववाचिनश्च शब्दात् व्याप्तौ एकद्विबहुषु टा भ्याम् भिस् इत्येते यथा-

सख्यं प्रत्यया भवति ॥ मासेन । मासाभ्याम् । मासैः । ज्योतिषमधीतम् । योजनेन । योजनाभ्याम् । योजनैः । वैद्यमधीतम् सिद्धाविति किं ? मासमधीतम् । अत्र व्याप्तिमात्रं गम्यते न सिद्धिः ।

हेतुकर्तृकरणेत्थंभूतलक्षणे ॥ १ । ३ । १२८ ॥

फलसाधनयोग्यः पदार्थो हेतुः । यः करोति स कर्ता । येन क्रियते तत् करणम् । इमं कञ्चित् प्रकारमापन्नः इत्थंभूतः स लक्ष्यते येन तदित्थंभूतलक्षणम् । एतस्मिन्विषये वर्तमानात् टाभ्यांभिसो भवन्ति ॥ हेतौ—धनेन कुलम् । विद्यया यशः ॥ कर्तरि-देवदत्तेन कृतम् । जिनदत्तेन भुक्तम् ॥ करणे-दात्रेण लुनाति । परशुना छिनत्ति ॥ इत्थंभूतलक्षणे-अपि भवान् कमंडलुना छात्रमद्राक्षीत् । अपि च भवानवदातेन वर्णेन कुमारीमैक्षिष्ट ॥

सहार्थेन ॥ १ । ३ । १२९ ॥

सहार्थस्तुल्ययोगो विद्यमानश्च तेन युक्तेऽर्थेवर्तमानात् टाभ्याम् भिसो भवन्ति ॥ पुत्रेण सह स्थूलः । तिलैः सह माषान् वपति ॥ सहैव दशभिः पुत्रैर्भारं वहति । गर्दभी पुत्रेण साकं पुत्रेण सत्रा पुत्रेण युगपत् गतः । पुत्रेणागतः । अत्रार्थग्रहणात् पर्यायस्य प्रयोगे प्रयोगेऽप्यर्थसत्तायाम् भवति ॥

यद्भेदैस्तद्वदाख्या ॥ १ । ३ । १३० ॥

यस्य भेदिनः प्रकारवतोऽर्थस्य भेदैः प्रकारैः विशिष्टैः तद्वतः तत्प्रकारवदर्थकस्य आख्या भवति । ततः टाभ्यांभिसो भवन्ति ॥ अक्ष्णा काणः । पादेन खञ्जः । प्रकृत्या दर्शनीयः । जात्या ब्राह्मणः ॥

काले भाद्वाधारे ॥ १ । ३ । १३१ ॥

काले वर्तमानान्नक्षत्रवाचिनः शब्दादाधारे टाभ्यांभिसो भवन्ति वा ॥ पुष्येण पायसमश्नीयात् । मघाभिः फललौदनम् । मघासु फललौदनम् ॥ काल इति किम् ? पुष्ये: चन्द्रमाः । मघासु ग्रहः ॥

प्रसितावबद्धोत्सुकैः ॥ १ । ३ । १३२ ॥

प्रसितादिभिर्युक्ते आधारे टाभ्याम् भिसो भवन्ति वा । केशैः प्रसितः । केशेषु प्रसितः । प्रकर्षेण सितो बद्धः नित्य-प्रसक्त उच्यते ॥ केशैरवबद्धः । केशेष्ववबद्धः । केशैरुत्सुकः । केशेषूत्सुकः ॥

समो ज्ञोऽस्मृतौ चाप्ये ॥ १ । ३ । १३३ ॥

संपूर्वस्य जानातेरस्मृतौ वर्तमानस्य यदाप्यं प्राप्यं कर्म तत्र टाभ्याम् भिसो भवन्ति वा । मात्रा संजानीते । मातरं संजानीते ॥ अस्मृताविति किम् ? मातरं संजानाति । मातुः संजानाति । स्मरतीत्यर्थः । मातुः संज्ञातेति कृति परत्वाद् षष्ठी । चेन वानुकृष्यते ॥

॥ दाणाधर्मे तङ् च देयैः ॥१।३।१३४ ॥

अधर्म्यरूपेऽर्थे वर्तमानेन समादाण दान इत्यनेन योगे देयैर्दातव्यैरप्ये देयं यमा भजति । तत्राप्रधानेऽर्थे वर्तमानात् टाभ्याम् भिसो भवन्ति वा । तस्माच्च दाणः तङ् भवति ॥ दास्या संप्रयच्छते । कामुकः सन् ददातीत्यर्थः ॥ अधर्म्य इति किम् ? पत्न्यै संप्रयच्छते । समोदाणः प्रेण व्यवधानमेव ॥

॥ ङे भ्याम् भ्यस् ॥ १।३।१३५ ॥

देयैराप्ये प्रधानेऽर्थे वर्तमानादेकद्विबहुषु यथासंख्यं ङे भ्यांभिस इत्येते प्रत्यया भवन्ति ॥ उपाध्यायाय गां ददाति । देवदत्ताय कन्यां प्रयच्छति । राज्ञे दण्डं वितरति । छात्राय

चपेटां ददाति ॥ रजकस्य वस्त्रं ददाति । घ्नतः पृष्ठं ददाति । इत्यत्र देयैरनाप्यतया रजकादिरुच्येत ॥

स्थानिवुणः ॥ १ । ३ । १३६ ॥

यस्यार्थः प्रतीयते न च प्रयोगः स स्थानी । क्रियां तदर्थायां वुण् लृट् च इति अणोविहितस्तदन्तस्य स्थानिनो धातोराप्ये कर्मणि ङेभ्यांभिसो भवन्ति ॥ उदकाय व्रजति । ऐधस्यो व्रजति । पाकाय व्रजति । भूतये व्रजति ॥ स्थानीति किम् ? एधाऽनाहारको व्रजति । पाकं कारको व्रजति ॥

क्रुदद्रुहेर्ष्यासूयार्थैर्यं प्रतिकोपो न च कर्म ॥ १।३।१३७ ॥

अमर्षकृत् क्रोधः । अपचिकीर्षा द्रोहः । अक्षमा ईर्ष्या गुणेषु दोषाविष्करणमसूया । एतदर्थैर्धातुभिर्योगे यं प्रतिकोपो भवति तस्मिन् वर्तमानात् ङेभ्यांभिसो भवन्ति च तत्कर्म भवति ॥ देवदत्ताय क्रुध्यति । जिनदत्ताय कुप्यति । देवदत्ताय द्रुह्यति । देवदत्ताय ईर्ष्यति । देवदत्तायासूयति ॥ कर्मप्रतिषेधो भावाद्यौलाद्यर्थः । देवदत्तायेर्ष्यति । जिनदत्ताय सूयितव्यम् । गुरुदत्तायासूयितम् ॥

क्रुद्द्रुहाञ्नोपसर्गात् ॥ १ । ३ । १३८ ॥

उपसर्गात्परेण क्रुधिना द्रुहिणा च योगे यं प्रति कोपस्तस्मिन् ङे भ्यां भिसो न भवन्ति ॥ देवदत्तमभिक्रुध्यति । गुरुदत्तमभिद्रुह्यति ॥

स्पृहेर्वा ॥ १ । ३ । १३९ ॥

स्पृहतेर्धातोर्यदाप्यं कर्म तस्मिन् वा ङेभ्यांभिसो भवन्ति । तच्चाप्यं न कर्म भवति ॥ पुष्पाणि स्पृहयति पुष्पेभ्यः स्पृहयति ॥

मन्यस्याकाकादिषु यतोऽवज्ञा ॥ १ । ३ । १४० ॥

यस्मादवज्ञा अन्यस्य विज्ञायते तस्मिन् काकादिवर्जिते मन्यतेराप्ये कर्मणि ङेभ्यांभिसो भवन्ति वा ॥ न त्वा तृणाय मन्ये । न त्वा तृणं मन्ये न त्वा शुने मन्ये । न त्वा श्वानं मन्ये । तृणादेरपि निकृष्टं मन्ये । इत्यवजानाति ॥ अकाकादिष्विति किम् नत्वा काकं घूकं शृगालं मन्ये । अवज्ञेति किम् ? न त्वा कनकं मन्ये । ततोऽप्यधिकं मन्ये इति प्रशंसात् ॥

भद्रायुष्यक्षेमसुखार्थहितार्थहितैराशिषि ॥ १।३।१४१॥

भद्राद्यर्थैर्हितशब्देन च योगेऽप्रधानेऽर्थे वर्तमानात् आशिर्विषये ङेभ्यांभिसो भवन्ति वा ॥ भद्रमस्तु जिनशासनाय । भद्रमस्तु जिनशासनस्य ! एवं भद्रं कल्याणं आयुष्यं दीर्घमायुः चिरंजीवितमस्तु देवदत्ताय । देवदत्तस्य वा । क्षेमं कुशलं निरामयं भूयात् संघाय । संघस्य वा । सुखं शर्म शं भवतात्-प्रजाभ्यः । प्रजानां वा । अर्थः प्रयोजनं कार्यं जायताम् दूताय । दूतस्य वा । हितं पथ्यं भूयाज्जिनदत्ताय । जिनदत्तस्य वा । हितग्रहणमाशिषि पक्षे पृथ्वयर्थम् ॥ अस्त्येवोत्तरेण चतुर्थी ॥

शक्तार्थवषड्नमःस्वस्ति स्वाहास्वधाहितैः ॥ १।३। १४२॥

शक्तार्थैर्वषडादिभिश्च योगेऽप्रधानेऽर्थे वर्तमानात् ङेभ्यांभिसो भवन्ति ॥ शक्तः शक्नोति । प्रभुः प्रभवति जिनदत्तो देवदत्ताय । अलं मल्लो मल्लाय । वषडग्नये । नमोऽर्हद्भ्यः । स्वस्ति प्रजाभ्यः । इन्द्राय स्वाहा । स्वधा पितृभ्यः । आतुराय हितम् ॥

रुचिक्लृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ॥१।३।१४३॥

रुच्यर्थैः क्लृप्यर्थैः धारिणा च धातुना युक्ते यथाक्रमं प्रेये विकारे उत्तमर्णे च वर्तमानात् ङेभ्यांभिसो भवन्ति ॥ रुच्यर्थैः प्रियमाणैः देवदत्ताय रोचते । स्वदते मोदकः ॥ क्लृप्यर्थैः विकारे–श्लेष्मणे कल्पते संपद्यते जायते दधि । धारिणो-

त्तमर्णे—देवदत्ताय शतं धारयति। ऋणे उत्तमः उत्तमर्णः धानिकः अतएव निपातनात् पूर्वत्वम् ॥

प्रत्याङः श्रुवाभ्यर्थके ॥ १ । ३ । १४४

प्रति आङ् इत्येताभ्यां परेण श्रृणोतिना युक्ते अभ्यर्थके वर्तमानात् ङे भ्यां भिसो भवन्ति ॥ देवदत्ताय प्रतिश्रृणोति। जिनदत्तायाश्रृणोति। अभ्युपगच्छतीत्यर्थः ॥

प्रत्यनोर्गृणाख्यातरि ॥ १ । ३ । १४४

प्रत्यनु इत्येताभ्यां परेण गृशब्द इत्यनेन युक्ते आख्यातरि वर्तमानात् ङेभ्यांभिसो भवन्ति ॥ उपाध्यायाय प्रीतगृणाति। अनुगृणाति। उपाध्यायेनोक्तमनुब्रवीति। शंसंतं बातं प्रोत्सहयतीत्यर्थः ॥

राधीक्षौ यद्दैवे ॥ १ । ३ । १४६ ॥

प्रत्यनोर्गृणाभ्याँ युक्ते अप्रधानेऽर्थे वर्तमानात् ङे भ्यां भिसो भवन्ति ॥ देवदत्ताय राध्यति। देवदत्तायेक्षते। तस्य दैवं निरूपयतीत्यर्थः ॥ केषांचित् रादीक्षावित्यर्थः निर्देशः। ते। राधयति। साधयति। पश्यति। जानीते। इत्यप्युदाहरन्ति ॥

उत्पातेन ज्ञाप्ये ॥ १ । ३ । १४७ ॥

उत्पाते ज्ञाप्ये वर्तमानात् ङे भ्यांभिसो भवन्ति ॥

श्लोकः—वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥ १ ॥

वाताय ज्ञापयतीत्यर्थः ॥

श्लाघुनूहुङ्स्याशपा प्रयोज्ये ॥ १ । ३ । १४८ ॥

श्लाघादिभियुक्ते प्रयोज्ये ज्ञाप्योऽर्थस्तस्मिन् वर्तमा-

नात् ङेभ्यांभिसो भवन्ति ॥ देवदत्ताय श्लाघते । ह्नुते तिष्ठते शपते ॥

गल्हादिभिर्बहुलम् ॥ १ । ३ । १४८ ॥

गल्हादिभिर्धातुभिर्योगेऽप्रधानेऽर्थे वर्तमानात् बहुलं ङेभ्यांभिसो भवन्ति ॥ क्वचित्प्रवृत्तिः—श्राद्धाय निगल्हते । युद्धाय सन्नह्यते । पत्ये शेते । देवदत्ताय कथयति । देवदत्तायोपदिशति ॥ क्वचिन्नप्रवृत्तिः अन्यदेव भवति—मनसा निह्नुते । मनसा सन्नह्यते ॥ क्वचिद्विभाषा—देवदत्ताय देवदत्तं वा धर्मं ब्रूते । धर्मं शास्ति । प्रणम्य शास्त्रे शास्तारं वा ॥ श्लोकः—

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥
देयैराप्य इत्यादिरस्यैव प्रपञ्चः ॥

यदर्थम् ॥ १ । ३ । १५० ॥

यत्प्रयोजनं किञ्चिद्विवक्ष्यते तस्मिन्नर्थे वर्तमानात् ङेभ्यांभिसो भवन्ति ॥ रथाय दारु । कुण्डलाय हिरण्यम् ॥

परिक्रये करणे वा ॥ १ । ३ । १५१ ॥

वेतनादिना कियंतं कालं स्वीकारः परिक्रयः ॥ तत्करणे ङेभ्यांभिसो वा भवन्ति ॥ शताय परिक्रीणीते । शतेन परिक्रीणीते ॥ परिक्रय इति किम् ? शतेन क्रीणाति ॥

ङसिभ्यांभ्यस्स्तोकाल्पकतिपयकृच्छ्रादसत्वे ॥ १ । ३।१५२॥

यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणो सत्वं तेनैव रूपेणोऽप्रमाणमसत्वं तस्मिन्करणे स्तोकादिभ्यः एकद्विबहुषु ङसिभ्यांभ्यसो भवन्ति वा ॥ स्तोकात् । स्तोकेन । अल्पात् । अल्पेन । कतिपयात् । कतिपयेन । कृच्छ्रात् । कृच्छ्रेण । मुक्तः ॥ असत्व इति किम ? स्तोकेन हतः । अल्पेन शेत्रुना मुक्तः ॥

आराद्र्थैः ॥ १ । ३ । १५३ ॥

आराद् दूरान्तिकयोस्तत्रोभयग्रहणं दूरार्थैरन्तिकार्थैश्च शब्दैर्युक्तादप्रधानात् ङसिभ्यांभ्यसो वा भवन्ति ॥ दूरं ग्रामस्य । दूरं ग्रामाभ्याम् । दूरं ग्रामयोः । दूरं ग्रामेभ्यः । दूरं ग्रामात् । दूरं ग्रामाणाम् । एवं विप्रकृष्टान्तिकाभ्याशेषु योज्यम् । आराद्योगे दिग् शब्दान्यारादिति नित्यं ॥

हेतौ गुणेऽस्त्रियाम् ॥ १ । ३ । १५४ ॥

अस्त्रिलिंगे गुणे द्रव्याश्रिते पर्याये हेतौ वर्तमानात् ङसिभ्यांभ्यसो वा भवन्ति ॥ जाड्यात् जाड्येन वा बद्धः । ज्ञानात् ज्ञानेन वा मुक्तः । अस्त्रियामिति किम् ? जडतया बद्धः । बुध्या मुक्तः ॥

ऋणे ॥ १ । ३ । १५५ ॥

हेतौ ऋणे वर्तमानात् नित्यं ङसिभ्यांभ्यसो भवन्ति वा ॥ शताद्बद्धः । सहस्राद्बद्धः ॥

॥ अपायेऽवधौ ॥ १ । ३ । १५६ ॥

अपायो विभागः विश्लेषः । तस्मिन् विषये निर्दिष्टे प्रतीयमाने वा योऽवधिरप्रधानं तस्मिन् ङसिभ्यांभ्यसो भवन्ति ॥ ग्रामादपैति । ग्रामादागच्छति । पर्वतादवरोहति । यवेभ्यो गां निवारयति निवर्तयतीत्यर्थः । प्रतीयमानेऽर्थे -- कुसूलात्पचति ततो गृहीत्वेत्यर्थः । वृकेभ्यो बिभेति । ततो भीत्या निवर्तत इत्यर्थः । चौरेभ्यो रक्षति तदुपघात प्रतीकारेण ततो निर्वर्तयतीत्यर्थः । बलाहकात् विद्योतते विद्युत् ततो निःसृत्येत्यर्थः । कुतो भवान् आगच्छति ? पाटलीपुत्रादागच्छामीति । बीजादंकुरो जायते तस्मादात्मानं प्रतिलभ्यमानो निस्सरतीति ॥ अपायेऽव-

धिविवक्षायामेवम् । विवक्षान्तरे तु यथायोगं विभक्तयो भवन्ति । यवेषु गां वारयति । चौरैर्भयम् । चौरेषु भयम् । चौराणां बिभेति ॥

॥ आख्यातर्युपयोगे ॥ १ । ३ । १५७ ॥

आख्याता प्रतिपादयिता । उपयोगो नियमपूर्वकं विद्याग्रहणम् । आख्यातरि वर्तमानात् उपयोगे विषये ङसिभ्यांभ्यसो भवन्ति ॥ उपाध्यायादधीते आगमयति । आचार्याच्छृणोति अधिगच्छति ॥ उपयोग इति किम् ? नटस्य शृणोति ॥

॥ आङा । १ । ३ । १५८ ॥

अवधाविति वर्तते । आङा योगे अवधौ ङसिभ्यांभ्यसो भवन्ति ॥ आ पाटलीपुत्राद् वृष्टो देवः ॥ आ कुमारेभ्यो यशः शाकटायनस्य गतम् ॥

॥ वर्ज्येऽपपरिणा ॥ १ । ३ । १५९ ॥

अप परि इत्येताभ्यां युक्ते वर्ज्ये ङसिभ्यांभ्यसो भवन्ति ॥ अपपाटलीपुत्रात् अपत्रिगर्तेभ्यो वृष्टो देवः । तत्र गर्तान् वर्जयित्वेत्यर्थः । एवं परियोगेऽपि ॥

॥ प्रतिनिधिप्रतिदाने प्रतिना ॥ १ । १६० ॥

प्रतिनिधौ प्रतिदाने च वर्तमानेन प्रतिना युक्तात् ङसिभ्यांभ्यसो भवन्ति ॥ प्रद्युम्नो वासुदेवात्प्रति सदृश इत्यर्थः । तिलेभ्यः प्रतिमाषान् प्रयच्छति । तिलान्गृहीत्वा माषान्ददातीत्यर्थः ॥

॥ स्थानिप्यकर्माधारे ॥ १ । ३ १६० ॥

स्थाने प्यादेशान्तेन युक्ते कर्मण्याधारे च ङसिभ्यांभ्यसो भवन्ति ॥ प्रासादात्प्रेक्षते । आसनात्प्रेक्षते ॥ स्थानिग्रहणं किम् ? प्रासादमारुह्य प्रेक्षते आसने उपविश्य प्रेक्षते ॥

दिक्शब्दान्यार्थाराद्बहिरितरैः ॥ १ ॥ ३ । । १६२ ॥

दिक्शब्दैरन्यार्थैराराद्बहिस् इतर इत्येतैश्च शब्दैर्युक्तेऽप्रधानेऽर्थे वर्तमानात् ङसिभ्यांभ्यसो भवन्ति ॥ प्राग्ग्रामात् । पूर्वो ग्रामात् । अपरो ग्रामात् । पूर्वो वसन्तात् । अपरो वसन्तात् ॥ दिशि दृष्टाः शब्दा दिक्शब्दा । इति किम् ? देशकालादिवृत्तावपि भवति । अन्यार्थः अन्यो भिन्नोऽर्थान्तरम् । हिरुग्देवत्तात् । आरात् ग्रामात् । बहिर्नगरात् । इतरो देवदत्तात् । आरात् । ग्रामात् । बहिर्नगरात् । इतरो देवदत्तात तस्माद्द्वितीय इत्यर्थः ॥

॥ ङसोसाम् ॥ १ । ३ । १६३ ॥

अप्रधानेऽर्थे वर्तमानात् एकद्विबहुषु यथासंख्यं ङस् ओस् आम् इत्येते प्रत्यया भवन्ति योगे सम्बन्धे ॥ अपवादविनिर्मुक्तोऽस्य विषयः ॥ राज्ञः पुरुषः । यज्ञो पादः । देवदत्तयोः पुत्रः । माषाणां राशिः । ग्रन्थिकस्य शृणोति ॥

॥ स्तात्ता ॥ १।३।१६४ ॥

स्ताता इति "परावरात् स्तात् ॥ ३।४।३१॥" इत्यारभ्य आ"... उपर्युपरिष्टात् ॥३।४।४२॥ इत्यतस्तकारेण प्रत्याहारः ॥ स्तात्प्रत्याहारग्रहीतप्रत्ययान्तेन युक्तेऽर्थे वर्तमानात् ङसोसामो भवन्ति ॥ पञ्चम्यपवादः । पुरस्तात् दक्षिणतः अधस्तात पुरस्तात् उपरि उपरिष्टात् ग्रामस्य ॥

॥ करणे ज्ञोऽज्ञाने ॥१।३।१६५ ॥

जानातेरज्ञानेऽर्थे वर्तमानस्य यत्करणं तस्मिन् ङसोसामो भवन्ति ॥ ज्ञानमवबोधः । सर्पिषो जानीते सर्पिषा करणभूतेन प्रवर्तत इत्यर्थः ॥ अज्ञान इति किम् ? स्वरेण पुत्रं जानाति ॥

॥ कृतकामुकस्याऽनण्लक्तण्खार्थाव्ययैष्यदृणेनः कर्मकर्त्रोः ॥ १।३।१६६ ॥

ऽनणिति प्रत्ययः । लेति दश लकाराः । क्तणिति "क्त क्तवतू" इत्यारभ्य आ "उकण णकारेण प्रत्याहारः । खार्थः खअनश्च । अव्ययाः क्त्वादयः । एष्यतीन् ऋणे इन् एतद्वर्जितो यः कृत् तदन्तस्य कामुकशब्दस्य च कर्मणि कर्तरि च ङसोसामो भवन्ति ॥ अपां स्रष्टा । पुरां भेत्ता । वर्षशतस्य पूरकः । भवतः शायिता । दास्यः कामुकः ॥ ऽनणादि प्रतिषेधः किम्? ऽण्—एधानाहारको व्रजति । कटं करिष्यन् । क्तण्—कटः कृतो देवदत्तेन । लोकं पवमानः । चोरं द्विषन् । चोरस्य द्विषन्निति सम्बन्धविवक्षायाम् । वदिता जनापवादान् । ग्राममागामुकः खार्थः—सुकरः कटो भवता । सुखानं तत्त्वं भवता । अव्ययओदनं भुक्त्वा कटं कर्तुं गतः । एष्यतीन्—ग्रामं गमी । ऋणेन—शतंदायी ॥

॥ क्तस्य सदाधारे ॥ १।३।१६७ ॥

सति वर्तमाने यः क्तः आधारे च तदन्तस्य धातोः कर्मणि कर्तरि च ङसोसामो भवन्ति ॥ सति क्तः—राज्ञां मतः । राज्ञां पूजितः । प्रजानां कान्तः । आधारे क्तः—इदमोदनस्य भुक्तम् । इदं सक्तूनां पीतम् । इदमेषामासितम् ॥ "वानाकस्य क्त० ॥ १।३।१६८ ॥" इति विकल्पे । "क्तण्० ॥ इति प्रतिषेधे च प्राप्ते वचनम् ॥

॥ वानाकस्य क्तघ्यबृद्धिप्राप्तिः कर्तरि ॥ १।३।१६८॥

घ्यबिति "घ्यण् ॥ इत्यत आरभ्य "वदः सुपः क्यच्च?" इति क्यपः पकारेण प्रत्याहारः । द्वयोः कर्मकर्त्रोः षष्ठिः प्राप्तिर्यस्य कृतः स द्विःप्राप्तिः । क्तः घ्यप् द्विःप्राप्तिश्च यः कृत

निरनुबन्धाऽकाराऽकप्रत्ययवर्जितः तदन्तस्य कर्तरि ङसोसामो वा भवन्ति ॥ क्त-छात्रस्य हसितम् । छात्रेण हसितम् । मयूरस्य नृत्तम् । मयूरेण नृत्तम् । घ्यप्कार्यम् कर्तव्यं करणीयं ज्ञेयं कृत्यं भवतः भवता वा । द्विप्राप्तेः—साधु खल्विदं शब्दानामनुशासनमाचार्यस्य आचार्येण वा ॥ अनाकस्येति किम् ? चिकीर्षो कटस्य देवदत्तस्य । भेदिका काष्ठानां देवदत्तस्य । अवनण् अक्तण् इत्येव— कृतः कटो देवदत्तेन ।

॥ कर्मणि गुणे ॥१।३।१६९ ॥

उणादिवर्जितस्य कृतः कर्मणि गुणे ङसोसामो वा भवन्ति ॥ नेताऽश्वस्य स्रुघ्नम् ॥ गुण इति किम् ? नेताश्वस्य । कर्मान्तरापेक्षत्वम् गुणत्वं अप्रधानाधिकारादतो द्विकर्मकाणामिहोदाहरणम् ॥

श्लोक-दुहि याचि रुचि प्रच्छि
भिक्षि जि ब्रू ह शसि चि ञ्
णि कृष् नहि वही चोदि दण्डणीति द्विकर्मकम् ॥१॥

॥ न घ्यपः ॥ १।३।१७० ॥

घ्यबन्तस्य गुणे कर्मणि ङासोसामो न भवन्ति ॥ नेतव्या ग्राममजा । क्रष्टव्या ग्रामं शाखा ।

क्तेनो ङ्योस्सुप् ॥ १।३।१७१ ॥

यः क्तान्ताद्य इन्प्रत्ययः तदन्तस्य कर्मण्यप्रधानेऽर्थे द्विबहुषु ङि ओम् सुप् इत्येते प्रत्यया भवन्ति । द्वितीयापवादः ॥ अधीती व्याकरणे । आम्नायी द्वादशांगे । परिगणती वियद्गलिते ॥

॥ हेतौ कर्मणा ॥१।३।१७२ ॥

कर्मणा युक्ते हेतौ वर्तमानात् ङ्योस्सुपो भवन्ति ।

तृतीयापवादः ॥

श्लोकः— चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
बालेषु चमरीं हन्ति सीम्नि सीमलको हतः ॥१॥

साधुनिपुणेनार्चायाम् ॥ १ । ३ । १७३ ॥

साधुनिपुण इत्येताभ्यां युक्ते अर्चायां गम्यमानायां ङ्योस्सुपो भवन्ति ॥ साधुर्देवदत्तो मातरि । निपुणो जिनदत्तः पितरि ॥ अन्यत्र साधुः भृत्यो राज्ञः । तत्वाख्याने न भवति ॥

स्वेशेऽधिना ॥ १ । ३ । १७४ ॥

अधीत्यनेन योगे स्वे ईशितव्ये ईशे ईशितरि स्वामिनि चार्थे वर्तमानात् ङ्योस्सुपो भवन्ति ॥ स्वे अधिमगधेषु श्रेणिकः । अध्यवन्तिषु प्रद्योतः । ईशे-अधिश्रेणिके मगधाः । अधिप्रद्योतेऽवन्तयः ॥

उपेनाधिकिनि ॥ १ । ३ । १७५ ॥

उप इत्यधिकाधिकिसम्बन्धं द्योतयति । तेन युक्ते अधिकिनि ङ्योस्सुपो भवन्ति ॥ उपखार्यां द्रोणः । उपनिष्के कार्षापणम् । द्रोणकार्षापणाभ्यामधिकौ खारीनिष्कावित्यर्थः ॥

आधारे ॥ १ । ३ । १७६ ॥

क्रियाश्रयस्य कर्तुः कर्मणो वा यः आधारः अधिकरणं तस्मिन् ङ्योस्सुपो भवन्ति ॥ आसने आस्ते । स्थाल्यां पचति । गंगायां घोषः । तिलेषु तैलम् । आकाशे शकुनयः । कृष्णा गोषु सम्पन्नक्षीरतमा । कृष्णा गवां सम्पन्नक्षीरतमा । इति समुदायस्यैकदेशंप्रत्याधारभावविषयविवक्षायां सप्तमी । सम्बन्धविवक्षायां तु षष्ठी । यथा वृक्षे शाखा । वृक्षस्य शाखा । इति निर्धारणं तु कृष्णेत्यादेः पदान्तरात् ॥

सुजर्थैः काले वा ॥ १ । ३ । १७७ ॥

सुचोऽर्थो येषां प्रत्ययानां तदन्तैर्युक्ते काले आधारे ङ्योस्सुपो वा भवन्ति ॥ द्विरह्नि भुङ्क्ते । द्विरह्नो भुङ्क्ते । मासे पञ्चकृत्वो भुङ्क्ते । मासस्य पञ्चकृत्वो भुङ्क्ते । बहुधाह्नि भुङ्क्ते । बहुधाह्नो भुङ्क्ते ॥ आधार इति किम् ? द्विरह्नो भुङ्क्ते ॥ काल इति किम् ? द्विरध्वनि भुङ्क्ते ॥

कुशलायुक्तेनासेवायाम् ॥ १ । ३ । १७८ ॥

कुशल आयुक्त इत्येताभ्यां युक्ते आधारे आसेवायां तात्पर्ये गम्यमाने ङ्योस्सुपो वा भवन्ति ॥ कुशलो विद्याग्रहणे । कुशलो विद्याग्रहणस्य । आयुक्तस्तपश्चरणे । आयुक्तस्तपश्चरणस्य ॥ अन्यत्र कुशलश्चित्रकर्मणि न च करोति । आयुक्तो गौः शकटे । आकृष्ट युक्त इत्यर्थः ॥

स्वामीश्वराधिपतिदायादसाक्षि-
प्रतिभूप्रसूतैश्च ॥ १ । ३ । १७९ ॥

स्वाम्यादिभिर्युक्तेऽप्रधाने वा ङ्योस्सुपो भवन्ति ॥ गोषु स्वामी । गवां स्वामी । गोष्वीश्वरः । गवामीश्वरः । गोष्वधिपतिः । गोषु दायादः । गवां दायादः । गोषु साक्षी । गवां साक्षी । गोषु प्रतिभूः । गवां प्रतिभूः । गोषु प्रसूतः । गवां प्रसूतः । चेन वाऽनुकृष्यते ॥

यद्भावो भावलक्षणम् ॥ १ । ३ । १८० ॥

भावः क्रिया । सिद्धं लक्षणम् । यस्य सम्बन्धिना भावेन क्रियया भावान्तरं लक्ष्यते तस्मिन्नप्रधानेऽर्थे वर्तमानात् ङ्योस्सुपो भवन्ति ॥ गोषु दुह्यमानासु गतः दुग्धास्वागतः । आम्रेषु कालायमानेषु गतः पक्वेष्वागतः । जातेष्विति गम्यते । गम्यमानमपि विभक्तेः निमित्तं भवत्येव । यथा वृक्षे शाखा । तृतीयापवादो योगः ॥

त्रयी त्रयी विभक्तिः ॥ १ । ३ । १८१ ॥

या इमाः स्यौजसित्यादयः सप्त त्रयो विभक्तयो विभागा अनुक्रान्तास्ताः प्रत्येकमिह विभक्तिशब्दवाच्या वेदितव्याः ।

प्रथमादिः ॥ १ । ३ । १८२ ॥

ताः सप्त विभक्तय इह प्रथमादिशब्दवाच्या वेदितव्याः "स्यौ जस्" इति प्रथमा विभक्तिः । "अमौट् शस्" इति द्वितीया । "टाभ्यांभिस्" इति तृतीया इति ॥

षष्ठी चानादारे ॥ १ । ३ । १८३ ॥

यद्भावो भावलक्षणं तस्मादनादरे अवज्ञाने गम्यमाने षष्ठीसप्तम्यौ विभक्ती भवतः ॥ रुदति लोके प्राव्राजीत् । रुदतो लोकस्य प्राव्राजीत् । क्रोशति बन्धुवर्गे क्रोशतो बन्धुवर्गस्य प्राव्राजीत् । तस्मिन् क्रोशति सत्यनादृत्य प्राव्राजीदित्यर्थः ।

गते स्थानिन्यध्वान्तेनैकः ॥ १ । ३ । १८४ ॥

कुतश्चित्परिगृहीतस्य अध्वनोऽवसानमन्तः यद्भावो भावलक्षणं तस्यान्तेन युक्तस्याध्वनः स्थानिना गतशब्देन वाच्ये भावे भावलक्षणे सति तेनान्तेनैकत्वमध्ववाचिनः अन्यवाचिनैकार्थे सामानाधिकरण्यं तद्विभक्तिः । तत्र भवतीत्यर्थः । गवीदुमतसाकाश्यं चत्वारि योजनानि । चतुर्षु योजनेषु भवतीत्यर्थः । लोकमध्याल्लोकान्तमुपर्यधश्च सप्त रज्जूरामनन्ति । गत इति किम् ? दग्धेषु लुप्तेष्विति वा प्रतीतौ मा भूत् ॥ स्थानिनीति किम् ? गवीदुमतः साकाश्यं चतुर्षु योजनेषु गतेषु भवति ॥

सप्तमी ॥ १ । ३ । १८५ ॥

यद् भावो भावलक्षणं तस्मादन्तेन युक्तादध्वनः स्थानिना गतशब्देन वाच्ये भावे भावलक्षणे सति सप्तमी विभक्ति

भवति ॥ गवीदुमतस्साकाश्यं चतुर्षु योजनेषु । लोकमध्याल्लो-
कान्तमुपर्यधश्च सप्तसु रज्जुष्वामनन्ति ॥

कारकमध्येऽध्वकाले पञ्चमी च ॥ १ । ३ । १८६ ॥

क्रियाया निवर्तकं द्वयोः कारकयोः मध्ये योऽध्वकालश्च तस्मिन् वर्तमानात् सप्तमी विभक्तिर्भवति पञ्चमी च । इह स्थोऽध्वना क्रोशे लक्ष्यं विध्यति । क्रोशाल्लक्ष्यं विध्यति । इह कर्तृकर्मणोः कारकयोर्मध्ये क्रोशोऽध्वा । अद्य भुक्त्वाऽयं मुनिः द्व्यहे भोक्ता । द्व्यहाद्भोक्ता । इह शक्तिः कारकमिति द्वयोः भुजिक्रियाकर्तृशक्त्योर्मध्ये द्व्यहः कालः ॥

चेष्टा गताप्येनाक्रान्ते द्वितीयाचतुर्थ्यौ ॥ १। ३ । १८७॥

चेष्टारूपाया गमनक्रियायाः आप्ये कर्मणि अनाक्रान्ते कर्ताऽनास्थिते संप्राप्ते द्वितीयाचतुर्थ्यौ विभक्ती भवतः ॥ ग्रामं गच्छति । ग्रामाय गच्छति । नगरं व्रजति । नगराय व्रजति विप्रनष्टः । पन्थानं गच्छति । पथे गच्छति ॥ चेष्टागत्याप्य इति किं ? ग्रामादागच्छति ॥ चेष्टाग्रहणं किं ? मनसा पाटलिपुत्रं गच्छति ॥ गतिग्रहणं किं ? ओदनं पचति ॥ अनाक्रान्त इति किं ? पन्थानं गच्छति । चतुर्थीविकल्पः कृतिषष्ठीबाधनार्थः । ग्रामं गन्ता । ग्रामाय गन्ता ।

तुल्यार्थैस्तृतीया ॥ १ । ३ । १८८ ॥

तुल्यार्थैर्युक्तेऽप्रधाने तृतीयाविभक्तिर्भवति ॥ मात्रातुल्यः । पित्रा समानः । गुरुणा समः । सदृक् सदृशः सदृक्षः । उपमानास्ति कृष्णस्येत्यादा उपमा । तुलाइववत्यथातथादयो न तुल्यार्थाः ॥

षष्ठी ॥ १ । ३ । १८८ ॥

तुल्यार्थैर्युक्तेऽप्रधाने षष्ठी भवति ॥ मातुस्तुल्यः । पितुःसमानः । इत्यादि ॥

द्वितीया चैनेनानञ्चेः ॥ १ । ३ । १८० ॥

अनञ्चेर्य एनप्रत्ययः तदन्तेन युक्ते द्वितीया षष्ठी च भवतः ॥ पूर्वेण ग्रामम् । उत्तरेण ग्रामम् । पूर्वेण ग्रामस्य । उत्तरेण ग्रामस्य ॥ अनञ्चेरिति किं ? प्राग्ग्रामात् । प्रत्यग्ग्रामात् ॥

॥ पञ्चमी चर्त्तेः ॥ १ । ३ । १८१ ॥

ऋतेशब्देन युक्ते द्वितीयापञ्चम्यौ भवतः ॥ ऋते धर्मात्कुतः सुखम् । चित्तं यथाश्रियम् ऋते । नह्यंगं विक्रियते रोगमृते ॥

पृथक्नानातृतीया च ॥ १ । ३ । १८२ ॥

पृथक् नाना इत्येताभ्यां युक्ते तृतीयापञ्चम्यौ भवतः ॥ पृथक् देवदत्तेन । पृथक् देवदत्तात् । नाना देवदत्तेन । नाना देवदत्तात् ॥

विनेमास्तिस्रः ॥ १ । ३ । १८३ ॥

विना शब्देन युक्ते इमा अनन्तरास्तिस्रः तृतीयापञ्चमीद्वितीया विभक्तयो भवन्ति ॥ विना धर्मेण । विना धर्मात् । विना धर्मं सुखं न च ॥

सप्तमी चासत्वारादर्थात् ॥ १ । ३ । १८४ ॥

द्रव्यं सत्वं ततोऽन्यदसत्वम् । आराददूरान्तिकयोः तन्त्रेणोभयग्रहणम् । असत्ववाचिनो दूरार्थात् अन्तिकार्थाच्च शब्दात् सप्तमी इमास्तिस्रो विभक्तयश्च भवन्ति ॥ दूरे दूरेण दूरात् दूरे ग्रामस्य गच्छति ॥ एवं विप्रकृष्टान्तिकाभ्यासेषु योज्यम् ॥ असत्वग्रहणं किं ? दूरः पन्थाः । दूराय पथे देहि

हेतौ हेत्वर्थैः सर्वाः प्रायः ॥ १ । ३ । १८५

हेतुर्निमित्तं कारणमिति पर्यायाः तदर्थैर्योगे हेतौ अप्र-

धाने प्रायेण सर्वा विभक्तयो भवन्ति ॥ धनेन हेतुना । धनाय हेतवे । धनाद्धेतोः । धनस्य हेतोः । धने हेतौ वसति । कं हेतुं, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ तिष्ठति । एवं निमित्तकारणप्रयोजनैरपि नेयम् ॥ हेताविति किं ? कस्य हेतुः ॥ हेत्वर्थैरिति किं? केन वसति ॥ प्राय इति प्रयोगानुसरणार्थम् ॥

इति श्री श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने चिन्तामणौ वृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः

लोऽन्ययुष्मदस्मासु तिप्तस्झिसिप्थस्थमिव्वस्मस् ॥१।४।१॥

एकद्विबहाविति वर्तते । ल इति सामान्येन दशानां ग्रहणम् । अन्ययुष्मदस्मदर्थेषु प्रत्येकमेकद्विबहुषु वर्तमानस्य धातोर्विहितस्य लकारस्य यथाक्रमं तिबादयो नवादेशा भवन्ति। अन्यस्मिन्नेकस्मिन्नर्थे तिप्। अन्ययोर्द्वयोस्तस्। अन्येषु बहुषु झि । अन्यत्वं युष्मदस्मदपेक्षं सन्निधानात् । एवं युष्मदर्थेषु एकद्विबहुषु यथाक्रमं सिप् थस् थ । अस्मदर्थेषु मिव्वस्मस् ॥ स पचति । भवान् । पचति । तौ पचतः । भवन्तौ पचतः । ते पचन्ति । भवन्तः पचन्ति । त्वं पचसि युवां पचथः । यूयं पचथ । अहं पचामि । आवां पचावः । वयं पचामः । पचति पचतः पचन्तीत्यादावन्ययुष्मदस्मदामप्रयोगेऽपि तदर्थ एव लार्थ इत्यादेशः। सच त्वं च पचतः । स चाहं च पचावः । स च त्वं च अहं च पचामः इति पराश्रय एव लादेशो भवति शब्दपरप्रतिषेधात् । पकारः इलङौ इति पर्युदासार्थः ॥

ताताम्झथासाथांध्वमिड्वहिमहिङ्डिदिच्छीयसंस्यवपस्कृनिविशः ॥ १ । ४ । २ ॥

ङकारेत इकारेतश्च धातोः शीयादेश्च शदादेशात् संक्ष्णु अपस्कृनिविश इत्येतेभ्यश्च सोपसर्गेभ्यः परस्य लकारस्य एकद्वि-बहुषु अन्ययुष्मदस्मत्सु यथाक्रमं त आताम् झ, थास् आथाम् ध्वम्, इड् वहि महिङ्, इत्येते आदेशा भवन्ति ॥ ङित्—ह्नुङ् ह्नुते । भवान् ह्नुते । ह्नुवाते ह्नुवते । ह्नुषे ह्नुवाथे ह्नुध्वे । ह्नुवे ह्नुवहे ह्नुमहे ॥ इदित्—एधि-एधते एधेते एधन्ते । एधसे एधथे एधध्वे । एधे एधावहे एधामहे । एवं चिति-चेतयते चेतयेते चेतयन्ते । शीय-शीयते शीयेते शीयन्ते । संक्ष्णु-संक्ष्णुते संक्ष्णुवाते संक्ष्णुवते । उपस्किरते वृषभो हृष्टः सन् । निविशते निविशेते निविशन्ते ॥ ङावितौ ॥

ऊह्यसोर्वोपसर्गात् ॥ १ । ४ । ३ ॥

उपसर्गात्पराभ्याम् ऊहि असू इत्येताभ्यां परस्य अस्य पूर्ववत् तङ् वा भवति ॥ समूहते समूहति । निरस्यति निरस्यते ॥ उपसर्गादिति किं ? ऊहते । अस्यति ॥

युजोऽजुदः ॥ १ । ५ । ४ ॥

अजन्तादुदित्येतस्माच्चोपसर्गात् परात् युजृजित्यतो लस्य तङो भवन्ति ॥ प्रयुङ्क्ते । नियुङ्क्ते । उद्युङ्क्ते ॥ अजुद इति किं ? संयुनक्ति । दुर्युनक्ति ॥

न यज्ञे तत्पात्रे ॥ १ । ४ । ५ ॥

यज्ञे यज्ञपात्रविषयाद्युजेस्तङो न भवन्ति । द्वंद्वं यज्ञ-पात्राणि प्रयुनक्ति ॥ यज्ञ इति किं ? यज्ञपात्राणि रन्धने प्र-युङ्क्ते ॥ तत्पात्र इति किं ? यज्ञे मन्त्रं प्रयुङ्क्ते ॥ तद्ग्रहणं किं ? रन्धनपात्राणि यज्ञे प्रयुङ्क्ते । अनन्तरस्य निषेधात् युजि समाधावित्यस्येङिल्लक्षणस्तङ् भवत्येव नान्यस्यैतद्विषये प्रयोगोऽस्तीत्येके ॥

परिव्यवात् क्रियः ॥ १ । ४ । ६ ॥

परि वि अव इत्येतेभ्यः परात् क्रीणातेर्लस्य तङो भवन्ति । परिक्रीणीते । विक्रीणीते । बहुविक्रीणीते वनमित्यत्रानर्थकत्वादयोगादनुपसर्गाच्च न भवत्येवमुत्तरत्रापि । क्रिय इत्यत एव निर्देशात्प्रकृतिवदनुकरणं इति सिद्धम् । मुनीत्याह द्विषपचतीत्याहेति "पराविर्जेः ॥ १ । ४ । ७ ।" इत्यादौ वर्णमात्रस्यानुकरणं न त्वभिधेयस्य । पराजयति सेना ॥

पराविर्जेः ॥ १ । ४ । ७ ॥

परा वि इत्येताभ्यामुपसर्गाभ्यां पराज्जयतेर्लस्य तङो भवन्ति । पराजयते । विजयते ॥

कर्मणोदश्चरः ॥ १ । ४ । ८ ॥

उत्पूर्वाच्चरते कर्मणा योगे सति लस्य तङो भवन्ति ॥ ग्राममुच्चरते । सक्तूनुच्चरते ॥

समस्तृतीयया ॥ १ । ४ । ९ ॥

संपूर्वाच्चरतेः तृतीयान्तेन युक्ते योगे सति लस्य तङो भवन्ति ॥ अश्वेन संचरते । रथेन संचरते ॥

क्रीडोऽकूजे ॥ १ । ४ १० ॥

कूजः शब्दनविशेषः ततोऽन्यस्मिन्वर्तमानात् क्रीडतेः संपूर्वाल्लस्य तङो भवन्ति ॥ संक्रीडते ॥ अकूज इति किं ? संक्रीडन्ति शकटानि ॥

पर्यन्वाङः ॥ १ । ४ । ११ ॥

परि अनु आङ् इत्येतेभ्य उपसर्गेभ्यः परात्क्रीडतेर्लस्य तङो भवन्ति ॥ परिक्रीडते । अनुक्रीडते । आक्रीडते ॥

शपनाथशिक्षभुजादुपलम्भनाशीर्जिज्ञासात्राणे ॥१।४।१२॥

शपादिभ्यो यथासंख्यमुपलम्भनादिष्वर्थेषु लस्य तङो

भवन्ति ॥ उपलम्भने—उपलम्भनं प्रकाशनं शपथ आसेवनं च । देवदत्ताय शपते । अन्यत्र देवदत्तं शपति आक्रोशति । आशिषि नाथ—सर्पिषो नाथते । सर्पिषो नाथेते । सर्पिर्मे भूयादित्याशास्ते । अन्यत्र मधु नाथति याचते इत्यर्थः ॥ शिक्षो जिज्ञासायाम्—विद्यासु शिक्षते । अन्यत्र भोक्तुं शिक्षति । शकेः सनंतस्येदं ग्रहणम् । भुजादत्राणेऽपालने । त्राणं—पालनं—ओदनं भुङ्क्ते । उपभुङ्क्ते । अन्यत्र पृथिवीं भुनक्ति ॥

॥ हञो गतिताच्छील्ये ॥ १ । ४ । १३ ॥

ताच्छील्यं तद्स्वभावता । हरतेर्लस्य तङो भवन्ति गतेस्ताच्छील्ये गम्यमाने ॥ पैतृकमश्वा अनुहरन्ते । पितुरागतं गमनं स्वभावतो गच्छन्तीत्यर्थः ॥

न्यस्सम्माननाचार्यकभृत्युत्सञ्जनज्ञानव्ययविगणने ॥ १ । ४ । १४ ॥

सम्माननाचार्यकभृतिष्वर्थविशेषणेषु उत्सञ्जनज्ञानव्ययविगणनेषु चार्थेषु नी इत्येतस्माद्धातोर्लस्य तङो भवन्ति ॥ सम्माननं पूजनम् । तत्र-नयते विद्वान् वैद्ये । आचार्यस्य भावः कर्म वा आचार्यकं । तत्र-माणवकमुपनयते । भृतिर्वेतनम् । तत्र-कर्मकरानुपनयते । ऊर्ध्वं संजनमुत्सञ्जनमुत्क्षेपणम् । माणवकमुदानयते । ज्ञानं प्रमेयनिश्चयः । तत्र—नयते विद्वान् स्याद्वादे । धर्मादिषु विनियोगो व्ययः । तत्र—शतं विनयते । ऋणादेर्निर्यातनं विगणनम् । तत्र—मद्राः करं विनयन्ते ॥ एतेष्विति किं ? अजां नयति ग्रामम् ॥

॥ कर्तृस्थेऽतनावाप्ये ॥ १ । ४ । १५ ॥

कर्तृस्थे अतनौ अशरीरे आप्ये कर्मणि सति नयतेर्लस्य तङो भवन्ति ॥ क्रोधं विनयते । हर्षं विनयते । शमयती-

त्यर्थः ॥ अतनाविति किं ? गडुं विनयति ॥

म्रियतेर्लुङ्लिङ्लत्ले: ॥ १ । ४ । १६ ॥

म्रियतेर्धातोर्लुङ्लिङ्लट्लङ्लेट्लेङ् इत्येतेषां लकाराणां तङो भवन्ति ॥ अमृत । मृषीष्ट । म्रियते । अम्रीयत म्रीयताम् । म्रीयेत ॥ अन्यत्र ममार । मर्तासि । मरिष्यति अमरिष्यत् । तन्निर्देशात्—मर्मर्ति ॥

क्यषो वा ॥ १ । ४ । १६ ॥

क्यषन्ताल्लस्तङो वा भवन्ति ॥ निद्रायति । निद्रायते । पटपटायति । पटपटायते ॥

लेः कृपः ॥ १ । ४ । १८ ॥

कृपेर्धातोर्लेरुकारानुबन्धस्य लस्य तङो भवन्ति वा ॥ कल्प्ता । कल्पिता । कल्प्तासि । कल्पितासि । लुङ्युत्तरेणापि सिद्ध्यति ॥ लेरिति किं ? कल्पयते ॥

द्युद्भ्यो लुङः ॥ १ । ४ । १९ ॥

द्युतादिभ्यो धातुभ्यो लुङस्तङो वा भवन्ति ॥ व्यद्युतत् । व्यद्योतिष्ट । अलुटत् । अलोटिष्ट । अशुभत् । अशोभिष्ट । अरुचत् । अरोचिष्ट । अस्यदत् । अस्यन्दिष्ट । अक्लृपत् । अकल्पिष्ट ॥ लुङ इति किं ? विद्योतितासे ॥

वृद्भ्यस्सस्यात् ॥ १ । ४ । २० ॥

वृतादिभ्यः पञ्चभ्यः परौ यौ सस्यौ प्रत्ययौ ताभ्यां परस्य लस्तङो भवन्ति वा ॥ विवृत्सति । विवर्तिषते । वर्त्स्यति । वर्तिष्यते । अवर्त्स्यत् । अवर्तिष्यत । चिक्लृप्सति । चिकल्पिषते । कल्प्स्यति । कल्पिष्यते । अकल्प्स्यत् । अकल्पिष्यत । सस्यादिति किं ? वर्तते ॥

क्रमोऽनुपसर्गात् ॥ १ । ४ । २१ ॥

अनुपसर्गात् क्रमेर्धातोर्लस्य तङो वा भवन्ति ॥ क्रमते । क्रामति ॥ अनुपसर्गादिति किं ? संक्रामति ॥

वृत्तिसर्गतायने ॥ १ । ४ । २२ ॥

वृत्तिरात्मयापनमप्रतिबन्धो वा । सर्गस्तात्पर्यमुत्साहो वा-तायनं सन्तानः पालनं वा । एतेष्वर्थेषु वर्त्तमानात् क्रमेर्धातोर्लस्य नित्यं तङो भवंति ॥ वृत्तौ शास्त्रेषु क्रमते बुद्धिः । सर्गे-सूत्राय क्रमते । तायने--क्रमन्तेऽस्मिन् योगाः । क्रमते राजा भुवम् ॥

परोपात् ॥ १ । ४ । २३ ॥

परा उप इत्येताभ्यां पराक्रमतेर्धातोर्लस्य तङो भवन्ति ॥ पराक्रमते । उपक्रमते ॥

वेः पादविक्षेपे ॥ १ । ४ । २४ ॥

विपूर्वात् पादविक्षेपे वर्तमानात् क्रमधातोर्लस्य तङो भवन्ति ॥ सुष्ठु विक्रमतेऽश्वः । अन्यत्र विक्रामति राजा उत्साहत इत्यर्थः । विक्रामत्यजिनसन्धिः स्फुटतीत्यर्थः ॥

प्रोपाभ्यां समर्थाभ्याम् ॥ १ । ४ । २५ ॥

प्र उप इत्येताभ्यां समर्थाभ्यां समानार्थाभ्यां परात् क्रमते-र्लस्य तङो भवन्ति ॥ समानश्चार्थोऽनयोरादिकर्माङ्गीकरणं वा तत्र भवतीत्यर्थः ॥ प्रक्रमते भोक्तुम् । उपक्रमते भोक्तुम् । प्रारभत इत्यर्थः । प्रक्रमते शुश्रूषाम् । अङ्गीकरोतीत्यर्थः । समर्थाभ्यामिति किं ? पूर्वेद्युः प्रक्रामति गच्छतीत्यर्थः । अपरेद्युरुपक्रामति आगच्छतीत्यर्थः ॥

ज्योतिरुद्गतावाङः ॥ १ । ४ । २६ ॥

ज्योतिषां चन्द्रादीनामुद्गतौ वर्तमानात् आङ्पूर्वात् क्रमेर्लस्य तङो भवन्ति ॥ आक्रमते चन्द्रमाः । आक्रमन्ते ज्योतींषि उद्गच्छतीत्यर्थः । अन्यत्र-आक्रामति माणवकः कुतु-

पम् । अवष्टभ्नातीत्यर्थः ॥ उद्गतिग्रहणं किं ? नभः समाक्रामति भास्करः । करैः व्याप्नोतीत्यर्थः ॥

नुदाङ्प्रच्छः ॥ १ । ४ । २७ ॥

आङ्पूर्वेभ्यो नुदाङ्प्रच्छिभ्यो लस्य तङ् भवन्ति ॥ आनुते शृगालः । धनमादत्ते । आपृच्छते गुरुम् ॥

गमेः प्रतीच्छायाम् ॥ १ । ४ । २८ ॥

गमेर्ण्यन्तात् आङ्पूर्वात् प्रतीच्छायां प्रतिपालने वर्तमानात् लस्य तङ् भवन्ति ॥ आगमयते गुरून् । आगमयस्व तावत् कंचित् कालम् । प्रतीक्षस्वेत्यर्थः ॥ अन्यत्र आगमयति विद्याम् ॥

ह्वस्स्पर्धे ॥ २ । ४ । २८ ॥

ह्वः ह्वेञो: धातोराङ्पूर्वात् स्पर्धे: लस्य तङ् भवन्ति ॥ मल्लो मल्लमाह्वयते । स्पर्धमानः तस्याह्वानं करोतीत्यर्थः । अन्यत्र गामाह्वयति ॥

संनिवेः ॥ १ । ४ । ३० ॥

सम्निवि इत्येवं पूर्वात् ह्वयतेर्लस्य तङ् भवन्ति ॥ संह्वयते । निह्वयते । विह्वयते ॥

उपात् ॥ १ । ४ । ३१ ॥

उपपूर्वात् ह्वयतेर्लस्य तङ् भवन्ति ॥ उपह्वयते ॥ योगविभाग उत्तरार्थः ॥

यमोऽविवाहे ॥ १ । ४ । ३२ ॥

उपपूर्वाद्यमो लस्य तङ् भवन्ति विवाहे ॥ कन्यामुपयच्छते ॥ अन्यत्र—शकटमुपयच्छति स्वीकरोतीत्यर्थः ॥

स्थः पथिमैत्रीदेवार्चासंगममन्त्रकरणे ॥ १ । ४ । ३३ ॥

पथ्यादिविषयादुपपूर्वात्तिष्ठतेर्लस्य तङ् भवन्ति ॥ पथि

स्थोऽर्थ इति धातुरपि पथीत्युच्यते॥ अयं पन्थाः स्रुघ्नमुपतिष्ठते। मैत्र्युपस्थानस्य हेतुः । रथिकां उपतिष्ठते । देवार्चासंगममन्त्रकरणानि धात्वर्थाः । देवार्चायाम्-जिनेन्द्रमुपतिष्ठते । संगमे-यमुना गङ्गामुपतिष्ठते । मन्त्रकरणे-जगत्या उपतिष्ठते । आग्नेय्या आग्नीन्द्रमुपतिष्ठते । अन्यत्र—एतदेवास्य कापेय यदर्कमुपतिष्ठति ।

लिप्सौ वा ॥ १ । ४ । ३४ ॥

उपपूर्वात्तिष्ठतेर्लिप्सौ वर्तमानस्य लस्तङो भवन्ति वा ॥ भिक्षुः ग्रहपतिः कुलान्युपतिष्ठते उपतिष्ठति वा । लिप्समानमुपगच्छतीत्यर्थः ॥

उदोऽनूर्ध्वेहे ॥ १ । ४ । ३५ ॥

अनूर्ध्वे यः ईहः चेष्टा व्यापारः । तत्र वर्तमानात् उत्पूर्वात् तिष्ठतेः लस्य तङो भवन्ति ॥ शास्त्रे उत्तिष्ठते । चरणे उत्तिष्ठते । तत्रोद्योगं करोतीत्यर्थः ॥ अनूर्ध्वेहे इति किं ? अस्माद् ग्रामाच्छतमुत्तिष्ठति । उत्पद्यत इत्यर्थः ॥ अनूर्ध्वग्रहणं किं ? आसनादुत्तिष्ठति ।

संविप्रावात् ॥ १ । ४ । ३६ ।

सम् वि प्र अव इत्येतत्पूर्वात् तिष्ठतेर्लस्य तङो भवन्ति ॥ सन्तिष्ठते । वितिष्ठते । प्रतिष्ठते । अवतिष्ठते ॥

स्थेयप्रकाशने ॥ १ । ४ । ३७ ॥

स्थेयः रूढिशब्दोयम् । विवादपदे निर्णेता प्रमाणभूतः पुरुष उच्यते ॥ स्थेयविषयायां क्रियायां प्रकाशने च वर्तमानात् तिष्ठतेर्लस्य तङो भवन्ति ॥ त्वयि तिष्ठते । संशय्य कर्णादिषु तिष्ठते यः । प्रमाणभूते निर्णयाय तिष्ठतीत्यर्थः । तिष्ठते कन्या छात्रेभ्यः । स्वाभिप्रायं प्रकाशयतीत्यर्थः ॥

प्रतिज्ञाने ॥ १ । ४ । ३८ ॥

प्रतिज्ञाने अभ्युपगमे वर्तमानात्तिष्ठतेर्लस्य तङो भवन्ति ॥ सदसदात्मकं तत्त्वमातिष्ठते ॥

समो गिरात् ॥ १ । ४ । ३९ ॥

संपूर्वात् गिरतेर्धातोः प्रतिज्ञाने लस्तङो भवन्ति ॥ शतं संगिरते ॥ अन्यत्र संगिरति ग्रासम् ॥

अवात् ॥ १ । ४ । ४० ॥

अवपूर्वात् गिरतेर्लस्य तङो भवन्ति ॥ अवगिरते ॥

संप्रतेर्ज्ञोऽस्मृतौ ॥ १ । ४ । ४१ ॥

सम् प्रति इत्येवं पूर्वात् अस्मृतौ वर्तमानात् जानातेर्लस्य तङो भवन्ति ॥ शतं संजानीते । शतेन संजानीते । सहस्रं प्रतिजानीते सहस्रेण वा ॥ अन्यत्र मातरं संजानाति । स्मरती-त्यर्थः ॥

निह्नवे ॥ १ । ४ । ४२ ॥

निह्नवोऽपह्नुतिः अपलापः । तत्र वर्तमानाज्जानातेर्लस्य तङो भवन्ति ॥ शतमपजानीते अपह्नुत इत्यर्थः ॥

सनोऽननोः ॥ १ । ४ । ४३ ॥

सनन्ताज्जानातेर्लस्तङो भवन्ति । न चेत्सोऽनुपसर्गात्परो भवति ॥ धर्मं जिज्ञासते ॥ अननोरिति किं ? धर्ममनुजिज्ञा-ति । औषधस्यानुजिज्ञासते इत्यकर्मके प्रागवदिति भवति ॥

श्रुवोऽप्रत्याङः ॥ १ । ४ । ४४ ॥

शृणोतेस्सनन्ताल्लस्तङो भवन्ति न चेत्स प्रत्याङ्भ्यामु-पसर्गाभ्यां परो भवति ॥ धर्मं शुश्रूषते ॥ अप्रत्याङ इति किं ? प्रतिशुश्रूषति आशुश्रूषति ॥

स्मृदृशः ॥ १ । ४ । ४५ ॥

स्मरतेः दृशश्च सनन्ताल्लस्तङ् भवन्ति ॥ सुस्मूर्षते । दिदृक्षते ॥

प्राग्वत् ॥ १ । ४ । ४६ ॥

सनः प्राचः प्रकृतेर्लकारस्य यथा तङ् भवन्ति तद्वत् सनन्तादपि लस्तङ् भवन्ति ॥ एदिधिषते । निविविक्षते । प्रयुयुक्षते । प्रकृतेस्तङभावे-सनोऽपि न तङ् । द्वंद्वं यज्ञपात्राणि प्रयुयुक्षति ॥ असामान्यादेशात्-श्वा मुमूर्षी ॥

आमः कृञः ॥ १ । ४ । ४७ ॥

आमः परात्कृञः परस्य लस्यामः प्रकृतेर्लस्येव तङो भवन्ति ॥ ईहांचक्रे । समूहांचक्रे ॥ कृञ इति किं ? ईहांबभूव ॥

न ॥ १ । ४ । ४८ ॥

आमः कृञो लस्तङो न भवन्ति ॥ ञीदिति प्राप्तिः । उब्जांचकार । उदुम्भांचकार ॥

गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथाव्यये ॥ १ । ४ । ४९ ॥

गन्धनादिष्वर्थेषु वर्तमानात् कृञो लस्तङो भवन्ति ॥ गन्धनमपकारात्मकं सूचनं प्रोत्साहनादिकं वा । तत्र उत्कुरुते । उदाकुरुते । अवक्षेपणमवक्षेपः कुत्सनं भर्त्सनं वा । दुर्वृत्तानवकुरुते । श्येनो वर्तिकामवकुरुते । सेवा अनुवृत्तिः । गणकान् प्रकुरुते । महामात्रान् प्रकुरुते । सहसा प्रवृत्तिः साहसम् । परदारान् प्रकुरुते । सतो गुणाधानं प्रतियत्नः । एधोदकस्योपस्कुरुते । काण्डं गुणस्योपस्कुरुते । प्रकर्षेण कथनं कथनप्रारम्भो वा प्रकथा । जनवादान् प्रकुरुते । धर्माद्यर्थविनियोगो व्ययः । शतं प्रकुरुते ॥

प्रसहनेऽधेः ॥ १ । ४ । ५० ॥

अधिपूर्वात् प्रसहनेऽर्थे कृञो लस्तङो भवन्ति ॥ प्रसहन-

भिभवः अपराजयो वा । शत्रूनधिकुरुते । तं ह्य अधिचक्रे । अन्यत्राधिकरोति ॥

दीप्तिज्ञानेहाविमत्युपसम्भाषोपमन्त्रणे वदः ॥१।४।५१॥

दीप्त्यादिषु विशेषणेषु उपसम्भाषायामुपमन्त्रणे चार्थे वदतेर्लस्तङो भवन्ति ॥ दीप्तौ-वदते विद्वान् स्याद्वादे । दीप्यमानो वदतीत्यर्थः । ज्ञाने-वदते विद्वान् वैद्ये । ज्ञात्वा वदतीत्यर्थः । ईहा उत्साहः । श्रुते वदते । तद्विषयमुत्साहं वदतीत्यर्थः नानामतिर्विमतिः । क्षेत्रे विवदन्ते । विमत्या किंचिद् भाषंते । उपसंभाषा उपसान्त्वनं उपलम्भो वा । कर्मकरानुपवदते उपसान्त्वयति उपालभते वेत्यर्थः । उपमंत्रणं रहस्युपच्छंदनम् । कुलभार्यामुपवदते । उपच्छंदयतीत्यर्थः । दीप्त्यादयः सर्वे धातोरर्था एवेत्येके । अन्यत्र देवदत्तो वदति ॥

व्यक्तवाचां सहोक्तौ ॥ १ । ४ । ५२ ॥

व्यक्तवर्णा वाग् येषां ते व्यक्तवाचः तेषां सहोक्तौ सम्भूयोच्चारणे वदतेर्लस्तङो भवन्ति ॥ संप्रवदन्ते जैनाः । व्यक्तवाचामिति किं ? संप्रवदन्ति कुक्कुटाः ॥

विप्रलापे वा ॥ १ । ४ । ५३ ॥

विरुद्धः प्रलापो विप्रलापः । तदात्मिकानां वाचां सहोक्तौ वदतेः लस्तङो वा भवन्ति ॥ विप्रवदंते विप्रवदन्ति भिषजः । अन्यत्र संप्रवदन्ते वैयाकरणाः ॥

कर्मण्यसत्यनोः ॥ १ । ४ । ५४ ॥

अनोरुपसर्गाद्वदेर्व्यक्तवाचां सम्बन्धिनो लस्य तङो भवन्ति कर्मण्यसति ॥ अनुवदते देवदत्तो जिनदत्तस्य । यथा जिनदत्तो वदति तथा देवदत्तो वदति पश्चाद्वदतीत्यर्थः । अनुः सादृश्ये पश्चादर्थे वा ॥ कर्मण्यसतीति किं ? जिनदत्तेनोक्त-

अनुवदति पुनर्वदतीत्यर्थः ॥ व्यक्तवाचामिति किं ? अनुवदति वीणा ॥

ज्ञोपस्थः ॥ १ । ४ । ५५ ॥

ज्ञा इत्येतस्मादुपपूर्वाच्च तिष्ठतेः कर्मण्यसति लस्तङो भवन्ति ॥ सर्पिषो जानीते । औषधस्य जानीते । तेनोपायेन प्रवर्तत इत्यर्थः यावदोदनमुपतिष्ठते । योगे उपतिष्ठते ॥ कर्मण्यसतीति किं ? स्वरेण पुत्रं जानाति । राजानमुपतिष्ठति ॥

समोऽर्तिस्वरतिश्रुदृशिविद्गम्प्रच्छ्यृच्छः ॥ १ । ४ । ५६ ॥

संपूर्वेभ्यः अर्त्यादिभ्यो धातुभ्यः लस्तङो भवन्ति कर्मण्यसति ॥ समीयृते । समरिष्यते । संस्वरते । संश्रृणुते । संपश्यते । संवित्ते । संगच्छते । संपृच्छते । समृच्छते । समृच्छिष्यते । कर्मण्यसतीति किं ? रूपं संपश्यतीत्यादि ॥

वेः कृञः शब्दे चानाशे ॥ १ । ४ । ५७ ॥

विपूर्वात्करोतेरनाशेऽर्थे वर्तमानाल्लस्य तङो भवन्ति कर्मण्यसति शब्दे च कर्मणि ॥ विकुर्वते सैन्धवाः । साधुदान्ताः वल्गन्तीत्यर्थः ॥ शब्दे—विकुर्वते क्रोष्टा स्वरान् नानोत्पादयतीत्यर्थः ॥ अनाश इति किं ? विकरोत्यग्नायं विनाशयतीत्यर्थः ॥

यङ्हनः स्वेऽङ्गे चाङः ॥ १ । ४ । ५८ ॥

आङ्पूर्वात् यमेर्हन्तेश्च लस्तङो भवन्ति कर्मण्यसति स्वे आत्मीये चाङ्गे कर्तुः कर्मणि ॥ आयच्छते । आहते । स्वेङ्गे-आयच्छते पाणिम् । आहते शिरः । स्वेङ्गे चेति किं ? आयच्छते रज्जुम् । आहन्ते वृषलम् ॥

व्युदस्तपः ॥ १ । ४ । ५९ ।

वि उत् इत्येवं पूर्वात्तपेर्लस्तङो भवन्ति कर्मण्यसति

स्वेऽङ्गे च कर्मणि ॥ वितपते उत्तपते राजा दीप्यत इत्यर्थः । स्वेऽङ्गे वितपते पाणिम् । उत्तपते पृष्ठम् । तापयतीत्यर्थः ॥ स्वेऽङ्गे चेति किं ? वितपति पृथिवीम् सविता । संतापयतीत्यर्थः ॥

न प्राणिन्यणिञो णिञन्तस्य ॥ १ । ४ । ६० ॥

प्राणिकर्तृविषयेऽर्थे वर्त्तमानादणिञन्ताद्धातोर्यो णिञ् तदन्तात्परस्य लस्य तस्याणिञो णिञ्प्रकृतेः धातोः कर्मण्यसति तङो न भवन्ति ॥ ञीदिति प्राप्तिः । आस्ते देवदत्तः । आसयति देवदत्तम् । शेते देवदत्तः । शाययति देवदत्तम् ॥ प्राणिनीति किं ? शुष्यन्ति व्रीहयः शोषयते व्रीहीन् ॥ अणिञ इति किं ? आरोहयमाणं प्रयोजयति आरोहयते ॥ अणिञ इति किं ? आस्ते । शेते ॥ कर्मण्यसतीति किं ? कटं कारयते ॥

अनात्मन्यनाध्याने ॥ १ । ४ । ६१

अणिञन्ताद्धातोर्यो णिञ् तदन्तात्परस्य लस्य तस्य णिञ्प्रकृतेरणिञः तद्वृत्तिसमवायिनो धातोः कर्मणि कर्तरि वर्तमानस्य तङो भवन्ति ॥ न चेत्तत्कर्मात्मा भवति स च णिञ्प्रकृतिर्धातुराध्याने स्मृतौ न वर्तते ॥ आरोहयन्ति हस्तिनं हस्तिपकाः । आरोहयते हस्ती स्वयमेव । पश्यन्ति भृत्या राजानम् । दर्शयते भृत्यान् राजा स्वयमेव ॥ अनात्मनीति किं ? हन्त्यात्मानम् । घातयत्यात्मा । आरोहयत्यात्मानं हस्ती ॥ अनाध्यान इति किं ? स्मरति वनगुल्मं कोकिलः स्मरयत्येनं वनगुल्मः ॥

भीस्मिल्यां षाकारे ॥ १ । ४ । ६२ ॥

भी स्मि ली इत्येतेषां धातूनां षकारे यस्मिन्नर्थे णौ परे षकार आकारश्च क्रियते तस्मिन्वर्तमानानां णिञो लस्तङो भवन्ति ॥ मुण्डो भीषयते । जटिलो विस्मापयते । जटाभिरा-

लापयते । कस्त्वामुल्लापयते । श्येनो वर्तिकामपलापयते ॥ आकार इति किं ? कुञ्चिकया भाययति । रूपेण विस्माययति घृतं विलीनयति । विलाययति ॥

गृधिवञ्च्योर्विप्रलम्भे ॥ १ । ४ । ६३ ॥

गृधिवञ्च्योर्ण्यन्तयोर्विप्रलम्भेऽर्थे वर्तमानयोर्लस्तङो भवन्ति ॥ माणवकं गर्धयते । माणवकं वञ्चयते प्रतारयतीत्यर्थः । अन्यत्र श्वानं गर्धयति काङ्क्षामस्योत्पादयतीत्यर्थः ॥ अहिं वञ्चयति गमयतीत्यर्थः ॥

मिथ्याकृञोऽभ्यासे ॥ १ । ४ । ६४ ॥

मिथ्याशब्देन योगे करोतेर्ण्यन्तस्य लस्तङो भवन्ति अभ्यासे ॥ अभ्यासः पुनः पुनः क्रिया । सूत्रं मिथ्या कारयते । सोपचारं पुनः पुनः घोषयतीत्यर्थः । अन्यत्र पदं मिथ्या कारयति सकृत् ॥

धेट्पादृदमायाम्परिमुहरुचिनृतिवदृवसचलयद्यर्थेङ्पुद्रुस्नुबुधयुधनशजनः फलेशे पदाद्गते तु वा ॥ १ । ४ । ६५ ॥

धेडादिभ्यः चलयद्यर्थादिवर्जितेभ्यश्च धातुभ्यः परस्य णिञो लकारस्य फलेशे तत्क्रियाफलस्वामिनि कर्तरि वर्तमानस्य तङो भवन्ति, पदान्तरात्तु प्रतीते फलेशत्वे वा भवन्ति । धेट्—धापयते शिशुम् । पा—पाययते देवदत्तम् । अद्—आदयते देवदत्तम् । दम्—दमयते हस्तिनम् । आयाम्—आयामयते सर्पम् । परिमुह-परिमोहयते । रुचि-रोचयते । नृति—नर्तयते । वद्—वादयते । वसि—वासयते देवदत्तम् । चलयद्यर्थादिवर्जितेभ्यः—कटं कारयते । ओदनं पाचयते । पदाद् गते तु वा—स्वं पुत्रं धापयते धापयति वा । स्वं पुत्रं पाययति पाययते वा । धेटादिग्रणं चलयद्यर्थार्थं प्राणिकर्तृकार्थं च ॥ चलयद्यर्थादि-

प्रतिषेधः किं ? अप्राणिकर्तृकार्थं सकर्मकार्थं च—चलयति । चालयति शाखाम् । कम्पयति शाखाम् । गमयति ग्रामं देवदत्तम् । अद्यर्थे—निगारयति ग्रासम् । अभ्यवहारयत्योदनम् । ग्रासयति रसम् । आशयति भोजयति देवदत्तम् । इङ्—सूत्रमध्यापयति । प्रु—प्रावयति राज्यम् । द्रु—द्रावयत्ययः । स्नु—स्नावयति कुण्डिकाम् । बुध—बोधयति शास्त्रं देवदत्तम् । युध् योधयति काष्ठम् । नश—नाशयति दुःखम् । जन—जनयति सुखम् ॥ फलेश इति किं ? पाचयति नियोगी । वस्तुतः फलेशेऽपि तदविवक्षायामपि न भवन्ति ॥

जीदिदपवदानुपसर्गज्ञः ॥ १ । ४ । ६६ ॥

ञितः ईदितः अपपूर्वस्य च वदेरनुपसर्गस्य च जानातेर्धातोर्लस्य फलेशे कर्तरि तङो भवन्ति पदाद्गते तु वा ॥ ञित् डुकृञ्-कुरुते । डुधाञ्-धत्ते । ईदित्-यजी यजते । डुपचीष् पचते । अपवद्—धनकामोऽन्यायमपवदते । अनुपसर्गज्ञः—तन्त्रं जानीते । पदाद्गते-स्वं दानं धत्ते दधाति । स्वमोदनं पचते पचति ॥ अपपूर्वग्रहणं किं ? वदति ॥ अनुपसर्गग्रहणं किं ? पन्थानं प्रजानाति ॥ फलेश इति किं ? पचन्ति भक्तकराः । कुर्वन्ति कर्मकराः ।

यमस्समुदाङोऽग्रन्थे ॥ १ । ४ । ६७ ॥

समादिभ्यः परस्य यमेर्लस्य फलेशे कर्तरि तङो भवन्ति अग्रन्थे ग्रन्थविषयश्चेत्प्रयोगो न भवति पदाद्गते तु वा ॥ संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते रज्जुम् । पदाद्गते स्वान् व्रीहीन् संयच्छति ॥ अग्रन्थग्रहणं किं ? उद्यच्छति । चिकित्सितम् । चिकित्सितग्रन्थे उद्योगं करोतीत्यर्थः ॥

न पर्याङ्व्ये रमः ॥ १ । ४ । ६८ ॥

परि आङ् वि इत्युपसर्गेभ्यः परस्य रमेर्लस्तङो न भवति ॥ परिरमति । आरमति । विरमति ॥

उपात् ॥ १ । ४ । ६९ ॥

उपपूर्वाद्रमेर्लस्तङो न भवन्ति ॥ उपरमति देवदत्तम् । उपरमयतीत्यर्थः ॥

वाऽकर्मकात् ॥ १ । ४ । ७० ॥

अकर्मकात् उपपूर्वात् रमेर्लस्तङो न भवन्ति वा ॥ उपरमति उपरमते सन्तापः । उपरमति उपरमते अवद्यात् ॥

व्याङ्दाञोऽपराङ्गे ॥ १ । ४ । ७१ ॥

व्याङ्पूर्वस्य दाञो लस्य तङो न भवन्ति अपराङ्गे पराङ्गकर्मकश्चेत् स व्याङ्दाञ् न भवति ॥ व्याददाति मुखं व्याघ्रः । व्याददाति पाटिका ॥ अन्यत्र व्याददते पिपीलिकाः पतङ्गमुखम् ।

परानोः कृः ॥ १ । ४ । ७२ ॥

परा अनु इत्येवं पूर्वस्य कृञो लस्तङो न भवन्ति ॥ पराकरोति । अनुकरोति ॥

प्रत्यत्यभेः क्षिपः ॥ १ । ४ । ७३ ॥

प्रत्यादिपूर्वक्षिपेर्लस्तङो न भवन्ति ॥ प्रतिक्षिपति । अतिक्षिपति । अभिक्षिपति ॥

प्राद्वहः ॥ १ । ४ । ७४ ॥

प्रपूर्वस्य वहेर्लस्तङो न भवन्ति ॥ प्रवहति ॥

परेर्मृषेश्च ॥ १ । ४ । ७५ ॥

परिपूर्वस्य मृषेर्वहेश्च लस्तङो न भवन्ति ॥ परिमृष्यति । परिवहति ॥ कैश्चिद्वचनेन नेत्यनुकृष्यते ॥

व्यतिहृतेऽगतिहिंसाशब्देहवहश्चापरस्परान्योन्येतरेतरे ॥ १ । ४ । ७६ ॥

परस्परं सम्बन्धिहरणं व्यतिहारः तस्य कर्म व्यतिहृतं तस्मिन् गतिहिंसाशब्दवर्जितेऽर्थे वर्तमानस्य हरतेर्वहतेरन्यस्य च धातोः लः कर्तरि वर्तमानस्य तङो भवन्ति परस्परादिश्चेत्तु ॥ व्यतिलुनते शूद्राः । व्यतिभवते सेना । व्यतिसंहरन्ते राजानः । व्यतिभवन्ते नद्यः ॥ अगतिहिंसाशब्द इति किं ? व्यतिगच्छन्ति । व्यतिघ्नन्ति । व्यतिहसन्ति । व्यतिजल्पन्ति ॥ अपरस्परादिति किं ? परस्परस्य व्यतिलुनन्ति । अन्योऽन्यस्य व्यतिलुनन्ति । इतेरतरस्य व्यतिलुनन्ति ॥

कर्मभावे ॥ १ । ४ । ७७ ॥

कर्मणि भावे च यो लकारस्तस्य तङो भवन्ति ॥ कर्मणि-क्रियते कटो देवदत्तेन । ह्रियते भारो देवदत्तेन । भावे-भूयते देवदत्तेन । सुप्यते देवदत्तेन । कर्मभावयोरनेन विधिना कर्तरि गतः सर्वो विधिः ॥

माङ्लटश्शापेऽतङ्तङ्वच्छत्रानशौ ॥ १ । ४ । ७८ ॥

धातोर्माङ्योगे शापे आक्रोशे यो लट् तस्य स्थाने अतङ्तङ्वत् शत्रानशावादेशौ भवतः ॥ "मा जीवन् यः पराव-ज्ञादुःखदग्धोऽपि जीवति" मा पचन् मा पचानः । अत एवास्मिन्विषये लट् ॥

सल्लङ्वत्स्यल्लृटौ वानितौ ॥ १ । ४ । ७९ ॥

सति वर्तमानेऽर्थे यो लट् वत्स्यति भविष्यति यो लृट् तयोः स्थानेऽतङ्तङ्वच्छत्रानशावादेशौ भवतो वा । अनितौ न चेदितिशब्दः प्रयोगे प्रयुज्यते ॥ यान् यातो यान्ः । शयानः निरस्यन् निरस्यमानः । पचन् पचमानः। लृट्—यास्यन् । शयिष्यमाणः । वक्ष्यन् वक्ष्यमाणः । वावचनात्तिङोऽपि । याति । शेते । निरस्यति । निरस्यते । यास्यति । शयिष्यते । पचन्तम् । पच

मानम् । हे पचन् । हे पचमानः । गच्छन् भक्षयति शयाना भुंक्ते
अर्जयन् वसति । आधीयमानो वसति । पाचतः । वैक्षमाणः
पचद्भक्तिः पचमानभक्तिरित्यत्राऽप्रथमासमानाधिकरणादौ लिङः
सम्बन्धायोगात् नित्यावेवादेशौ भवतः ॥ अनिताविति किं ?
हन्तीति पलायते । हरिष्यामीति व्रजति ॥

लिटः क्वसुकानौ ॥ १ । ४ । ८०

लिटः स्थानेऽतङ्तङ्वत् क्वसुकानावादेशौ वा भवतः ॥
जग्मिवान् संयुगे । तस्थिवान् सः । पेचिवान् पेचानः । वाग्रह-
णात् जगाम । तस्थौ ॥

श्रुवसवसदोऽनुवचश्च कर्तरि भूते ॥ १ । ४ । ८१

श्रुआदिभ्यः अनुपूर्वाच्च वचेः परस्य भूतसामान्ये द्योत्ये
कर्तरि लिटः अतङ्तङ्वत् क्वसुकानावादेशौ वा भवतः ॥ श्रुआ-
दिभ्यः क्वसुः अनुवचः कानः एवमर्थ एव पृथग्निर्देशः । शुश्रु-
वान् । उपशुश्रुवान् । ईषिवान् । समीयिवान् । ऊषिवान् । आसे-
दिवान् । अनूचानः । अनूचानौ । भूतग्रहणात् भूतसामान्ये
द्योत्ये कर्तरि लिडनुमीयते तदभावे लुङ् । अश्रौषीत् । अगात् ।
अवात्सीत् । उपासदत । अन्ववोचत् ॥

अनाश्वान् ॥ १ । ४ । ८२

अश भोजन इत्येतस्मात् नञ्पूर्वात् कर्तरि भूते लिटः
क्वसुरिडभावश्च निपात्यते ॥ अनाश्वांसौ ॥

दयायासकास्गुर्विजाद्यनेकाचोऽनृच्छूर्णोराम् कृ-
भ्वस्लिट्चानु ॥ १ । ४ । ८३

दयादिभ्यः गुरुरिजादिर्येषां तेभ्यः अनेकाज्भ्यश्च धा-
तुभ्यः ऋच्छत्यूर्णोतिवर्जितेभ्यः परस्य लिट आमादेशो भवति

तस्य चामो लिङन्ताः कृभ्वस्तयः अनु पश्चादनन्तरं प्रयुज्यन्ते ॥ दयांचक्रे । दयांबभूव । दयामास । पलायांचक्रे । कासांबभूव । कासामास । गुर्विजादेः—ईहांचक्रे । उज्झांचकार । एधांबभूव । अनेकाचः-दरिद्रांचकार । चुलुपांबभूव । चकामास । बुभूषांचकार । लोलूयामास ॥ अनृच्छूर्णोरिति किं ? आनर्च्छ । प्रोर्णुनाव ॥

जागुषसमिन्धे वा ॥ १ । ४ । ८४

जागृ उष समिन्ध इत्येतेभ्यः परस्य लिटः आम्वा भवति कृभ्वस्लिट् चानुप्रयुज्यते ॥ जागरांचकार । जागरांबभूव । जागरामास । जजागार । ओषाञ्चकार । ओषांबभूव । ओषामास । उवोष । समिधांचक्रे । समिधांबभूव । समिधामास । समिधे ॥

भीह्रीभृहोः श्लुवत् ॥ १ । ४ । ८५

भी ह्री भृ हु इत्येतभ्यः परस्य लिटः आम्वा भवति स च श्लुप्वत् कृभ्वस्लिट् चानुप्रयुज्यते। बिभयांचकार । बिभयांबभूव । बिभयामास । बिभाय । जिह्रयांचकार । जिह्रयांबभूव । जिह्रयामास । जिह्राय । बिभरांचकार । बभार । जुहवांचकार । जुहाव । जुहवांचक्रे । जुहुवे ।

विदात्कित् ॥ १ । ४ । ८६

विद ज्ञान इत्येतस्माद्धातोर्लिट आमादेशो वा भवति स च कित् कृभ्वस्लिट् चानुप्रयुज्यते ॥ विदांचकार । विदांबभूव । विदामास । विवेद । विदाक्किद्वचनादामिस्यानित्वेन लिट्कार्यं द्विर्वचनादि न भवति ॥

लेटः कृलेट् ॥ १ । ४ । ८७

विदाल्लेट आम् वा भवति स च कित् लेडन्तश्चास्य कृञनुप्रयुज्यते ॥ विदांकरोतु, वेत्तु । विदांकुरुताम् । विदांकुर्वन्तु । विदन्तु ॥

झोऽन्तः ॥ १ । ४ । ८८

धातोर्लादेशस्यावयवझकारस्य अन्त इत्यादेशो भवति । अदन्ति ।

द्व्युक्तिजक्षपञ्चतोऽत् ॥ १ । ४ । ८९

द्वे उक्ती यस्य स द्व्युक्तिः द्विरुक्तः । पंचवर्गः पञ्चत् जक्षाणां पञ्चत् जक्षपञ्चत् जक्षादिपञ्चकम् । द्विरुक्तात् जक्षादिभ्यश्च पञ्चभ्यः परस्य लादेशावयवझकारस्य अदित्ययमादेशो भवति ॥ दधति दधतु । ददति ददतु । जक्षति जक्षतु ।
जाग्रति । दरिद्रति । चकासति । शासति ॥

तङोऽनतः ॥ १ । ४ । ९०

तङो झकारस्यानकारादुत्तरस्य अदित्यादेशो भवति ॥ चिन्वते । चिन्वताम् । अचिन्वत । लुनते । लुनताम् । अलुनत॥ तङ इति किं ? चिन्वन्ति.॥ अनत इति किं ? च्यवन्ते ॥

शीङो रत् ॥ १ । ४ । ९१

शीङः परस्य तङो झकारस्य रदित्यादेशो भवति । शेरताम् । अशेरत ॥

वेत्तेर्वा ॥ १ । ४ । ९२

वेत्तेरादादिकात्परस्य तङो झकारस्य रदादेशो वा भवति । संविद्रते । संविद्रताम् । संविद्रत । संविदते । संविदताम् । समविदत । रौधादिकस्य न भवति विन्दते ॥

एटितः ॥ १ । ४ । ९३ ॥

धातोर्विहितस्य टितो लकारस्य यस्तङ् तस्य एकारादेशो भवति ॥ पचते । पचन्ते । पचध्वे । पचे । पचामहे ॥ टित इति किं ? अपचत ॥ तङः इति किं पचति ॥

वह्यामो गेश् ॥ १ । ४ । ९४ ॥

टितो लकारस्य तङो वहेरिकारस्यामश्च गेश् इत्यादेशो भवति ॥ पचावहे इति । पचेते इति । पचेथे इति ॥

थासस्से ॥ १ । ४ । ९५ ॥

टितो लकारस्य थासः से इत्यादेशो भवति ॥ पचसे । पेचिषे । पक्तासे । पक्ष्यसे ॥

लोराझाड्डारौरस् ॥ १ । ४ । ९६ ॥

लोष्टितो लकारस्य लुट आदेशस्य तङ आझात् त आताम् झ इत्येतेषां यथाक्रमं डा रौ रस् इत्येते आदेशा भवन्ति । एधिता । एधितारौ । एधितारः ॥

झेः । १ । ४ । ९७ ॥

आ इति वर्तते । लोष्टितो लकारस्य लुटः आझेरादेशस्य तिप् तस् झि इत्येतेषां यथाक्रमं डा रौ रस् इत्येते आदेशाः भवन्ति ॥ भविता । भवितारौ । भवितारः ॥

लिटस्तझस्यैश्रिरे ॥ १ । ४ । ९८ ॥

लिडादेशयोस्त झ इत्येतयोः एश इरे इत्येतौ यथाक्रममादेशौ भवतः ॥ पेचे । पेचिरे । जग्मे ग्रामः । जग्मिरे ग्रामाः ॥

णमेरौशातः ॥ १ । ४ । ९९ ॥

आकारान्ताद्धातोर्लिटो णश्मिपोरौशादेशो भवति ॥ ददौ । तस्थौ । सः सुप्तोऽहं किल ययौ पपौ ।

मिपोऽश् ॥ १ । ४ । १०० ॥

धातोर्लिटो मिपः अश् इत्यादेशो भवति ॥ णशोऽप-

वाद: । वचनात्सोऽपि भवति ॥ सुप्तोऽहं किल विललप, विललाप । चकार । चकर ।

अतङाणणथतुसुस्थायुसश्णश्वमा: ॥ १ । ४ । १०१ ॥

लिटोऽतङां नवानां यथासंख्यं णश् अतुस् उस् थ अथुस् अश् णश् व म इत्येते नवादेशा भवन्ति ॥ पपाच । चतुः । पेचुः । पेचिथ पपक्थ ॥ पेचथुः । पेच । पपाच । पपच । पेचिव । पेचिम ॥

विदो लटो वा ॥ १ । ४ । १०२ ॥

विदो धातोः परस्य लटः अतङां नवानां णशादयो वा भवन्ति ॥ वेद । विदतुः । विदुः । वेत्थ । विदतुः । विद । वेद । विद्व । विद्म । पक्षे वेत्तिः । वित्तः । विदन्ति । वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः ॥ लट इति किम् ? विवेद विविदतुः विविदुः । अतङामिति किम् ? विन्ते विन्दाते विंदंते ॥

शतुः क्वसुः ॥ १ । ४ । १०३ ॥

विदेर्ल्लटः शतुः क्वसुरादेशो वा भवति । तत्त्वं विद्वान् । तत्त्वं विदन् । साधुः ।

ब्रुवस्तिप्पञ्चतो णश्पञ्चद्ब्रुवश्चाहः ॥ १।४।१०४॥

ब्रूञो लटस्तिबादीनां पञ्चानां यथाक्रमं णशादयः पञ्चादेशा वा भवन्ति तत्संनियोगे च ब्रुव आह इत्यादेशो भवति । आह । आहतुः । आहुः । आत्थ । आहथुः । ब्रवीति । ब्रूतः ब्रुवन्ति । ब्रवीषि । ब्रूथः ।

एर्ङितो लुक् ॥ १ । ४ । १०५ ॥

ङितो लकारस्यातङ एरिकारस्य लुग्भवति । अपचत् । अपचताम् । अपचन् । अपचः ।

आद्द्विषो झेर्जुस्वा ॥ १ । ४ । १०६ ॥

आकारान्तात् द्विषश्च धातोः परस्य ङिझादेशस्य झेर्जुस्वा

भवति । अपुः । अपान् । अयुः । अयान् । अद्विषुः । अद्वि-षन् । अकार इत् ।

सिविदक्भेरभ्वः ॥ १ । ४ । १०७ ॥

सिप्रत्ययान्तात् विद अक्भेश्च धातोः परस्य झिल्-लादेशस्य भेर्जुस् नित्यं भवति । अभ्वः-न चेत् स सि भुवः परो भवति अकार्षुः । अहार्षुः । अदुः । अधुः । विदः-अविदुः । अक्भेः-अदधुः । अबिभयुः । अजक्षुः । अशासुः । अभ्व इति किम् ? अभूवन् ।

लेलेः ॥ १ । ४ । १०८ ॥

ङितो लकारस्य लेलेः लेङो लिङश्च भेर्जुस् भवति । पचेयुः । पच्यासुः ।

ङ्याट्क्यासट् ॥ १ । ४ । १०९ ॥

लेङादेशस्य लिङादेशस्य चातङो यथासंख्यं ङ्याट् क्यासट् इत्येतावागमौ भवतः । टीयोपवादः । लेङः । यजेत् । यजेताम् । यजेयुः । वच्यात् । जागृयात् । लिङः-इज्यात् । इज्यास्ताम् । इज्यासुः । वच्यात् । जागयात् । ङित्कितोर्यङीति किम् ? जागर्त्यरिच विशेषः ।

रन्नौ भेलोः ॥ १ । ४ । ११० ॥

ङितो लकारस्य लेलेः भ इत्येतयोर्यथासंख्यं रन् इत्येता-वादेशौ भवतः । पचेरन् । पक्षीरन् । पचेय । पक्षीय ।

टीय् ॥ १ । ४ । १११ ॥

लेङ् टिङादेशस्य तङः टीयागमो भवति । पचेत । पचे-याताम् । पचेरन् । हृवीत् । हृवीयाताम् । हृवीरन् । हृवीथाः । हृवीयाथाम् । हृवीध्वम् । लिङः । सटा सह ब्रूमः ।

सट् त्थीयां लिङः ॥ १ । ४ । ११२ ॥

लिङादेशस्य तकारथकारयोरीयश्च सडागमो भवति । पक्षीष्ट । पक्षीयास्ताम् । पक्षीष्ठाः । पक्षीयास्थाम् । कृषीष्ट । कृषीयास्ताम् । कृषीष्ठाः । कृषीयास्थाम् ॥

तस्थस्थवस्मस्मेस्ताान्तं तवमां लेटश्च ॥ १ । ४ । ११३ ॥

ङितो लेटश्च लस्य तस् थस् थ वस् मस् मि इत्येतेषां । यथासंख्यं तां तं त व म अम् इत्येते आदेशा भवन्ति । ङितः-अपचताम् । अपचतम् । अपचत । अपचाव । अपचाम । अपचम् । अपाक्ताम् । अपाक्तम् । अपाक्त । अपाक्ष्व । अपाक्ष्म । अपाक्षम् । लेटः पचताम् । पचतम् । पचत । पचाव । पचाम । लेटो मेः पचानि ।

सीरुयेह्युन्यास् ॥ १ । ४ । ११४ ॥

लेटः सि इ मी ए इत्येतेषां यथाक्रमं हि उ नि आमित्येते आदेशा भवन्ति । लुनीहि । पुनीहि । पचतु । पचन्तु । पचानि । पठानि । पचताम् । पच । पचतात् । पचन्ताम् ।

स्वेनादेष्टाप् ॥ १ । ४ । ११५ ॥

सकारवकारैकारनकारादेर्लेडादेशस्य टाबागमो भवति । करवाम । करवामहै । करवाव । करवावहै । करवै । तनवै करवाणि । तनवानि । टपावितौ ।

एतोऽगैप् ॥ १ । ४ । ११६ ॥

लेडादेशस्य स्वेनादेरेकारस्य ऐबादेशो भवति । आमोऽपवादः । अग् । अगकारानुबंधकः । करवै । करवामहै । चिनवै चिनवावहै । चिनवामहै । अगिति किम् ? पचावहायावाम् । पकार इत्यर्थः । तत्र हि परत्वादैत्वे । टाबन्तस्यात् । नादेरेकाराभावादनुदाहरणम् ।

स्वो वाम् ॥ १ । ४ । ११७ ॥

लेहादेशस्य सकारवकाराभ्यां परस्य एकारस्य यथाक्रमं व अमित्यादेशो भवतः पचस्व । पचध्वम् । कुरुष्व । कुरुध्वम् ।

भृशादौ हिः ॥ १ । ४ । ११८ ॥

भृशेऽभीक्ष्ण्ये पचये च यो लेट् तदादेशस्य हिरादेशो भवति ॥ लुनीहि । लुनीहीति । लुनाति । लुनीहि लुनीहीति । लुनीतः । लुनाहि लुनीहीति । लुनन्ति । व्रीहिस्त्वम् लुनीहि । लुनीहीति । यतते । यतेते । यतन्ते । एवं सर्ववचनानाम् । लेट इति किम् ? व्रीहिन्वपति । लुनाति । पुनातीति । यतते ।

यस्य वा ॥ १ । ४ । ११९ ॥

भृशादौ लेटः यस्य हिरादेशो वा भवति । लुनीहि । लुनीहीत्येवम् । यायम् । लुनीथ । लुनीत इत्येवं । यायं लुनीथ । व्रीहीन्वप । लुनीहि । पुनीहीति । यायंयं । यतध्वे । व्रीहीन्वपत । लुनीत । पुनीत इति यतध्वे ।

ध्वेस्स्वः ॥ १ । ४ । १२० ॥

भृशादौ लेटः ध्वेः स्वादेशो भवति वा । अधीष्व । अधीष्वेत्येवं यायमधीध्वो अधीध्वं । अधीध्वमित्येवँ यायमधीध्वे ।

तङः ॥ १ । ४ । १२१ ॥

वेति निवृत्तम् । भृशादौ लेटस्तङः नित्यं स्वादेशो भवति । हिरपवादः । अधीष्वाधीष्वेत्यधीते । अधीयते । सूत्राण्यधीष्व । वृत्तिमधीष्व । भाष्यणि अधीष्वेत्यधीते ।

तुह्योस्तादाशिषि ॥ १ । ४ । १२२ ॥

आशिषि लेटः तुह्योस्तादादेशो भवति वा ॥ जीवतु जीवतात्भवान् । चिरं जीवतात् त्वम् । अन्यत्र जीवतु जीव ।

हि चाप् ॥ १ । ४ । १२३ ॥

हि च ताम्वादेश अप् पिन्न भवति । स्थानिवद्भावेन प्राप्तेः । कुरु । लुनीहि । लुनीहीति । लुनाति । कुरुतात् अत्रापित्वे तत्वे त्वेङभावः ।

इति श्रीश्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने चिन्तामणौ वृत्तौ प्रथमस्याध्यायस्य चतुर्थः पादः । समाप्ताध्यायोऽयम् ।

सुप्सुपा समासो बहुलम् ॥ २ । १ । १ ॥

सुबन्तं सुबन्तेन सह समाससंज्ञं भवति बहुलं । विस्पष्टं पटुः । विस्पष्टपटुः । विस्पष्टलवणम् । व्यक्तपटुः । व्यक्तलवणम् । सुबिति किम्? चरन्ति गावोऽस्यां । सुपीति किम् ? देवदत्तः पठति ॥ बहुलमिति प्रयोगानुसरणार्थम् । तेन क्वचिदसुबन्तस्य सुपापि समस्यते ॥ भातपर्वनभः । अनुव्यचलत् । अधिकारश्चायं प्रागेकशात् ॥

सुज्वार्थे संख्या संख्यया संख्येये बहुव्रीहिः ॥ २ । १ । २ ॥

वारः सुजर्थः । विकल्पः संशयो वा वार्थः । अत्र संख्यावाचि सुबन्तं संख्यावाचिना संख्येये वर्तमानेन सुबन्तेन सह-

समाससंज्ञं भवति बहुव्रीहिसंज्ञं च ॥ द्विर्दश द्विदशाः । द्विविंशाः । त्रिविंशाः । द्वौ वा त्रयो वा द्वित्राः । त्रिचतुराः । पञ्चषाः । अष्टदशाः ॥ संख्येय इति किम् ? द्विविंशतिर्गवाम् ॥

आसन्नादूराधिकाध्यर्धार्धादिडद्धद्वितीयाद्यन्यार्थे॥२।१।३॥

आसन्नादीन्यर्द्धपूर्वपदानि च डदन्तानि संख्यावाचिना सुबन्तेन सह समस्यन्ते संख्येये द्वितीयाद्यन्तस्यान्यस्य पदस्यार्थेऽभिधेये स च समासो बहुव्रीहिर्भवति ॥ आसन्ना दश येषां ते आसन्नदशाः। अधिका दश येषु ते अधिकदशाः। एकादशादयः । अवयवेन विग्रहः समुदायस्समासार्थः । एवमधिकविंशाः । अधिकत्रिंशाः । अध्यर्धविंशतिर्येषां ते अध्यर्धविंशाः त्रिंशदित्यर्थः । एवमध्यर्धविंशाः । अध्यर्धचत्वारिंशाः । अध्यर्धपञ्चमाः विंशतयो येषां ते अर्धपञ्चमविंशाः नवतिरित्यर्थः । एवमर्धचतुर्थविंशाः सप्ततिः ॥

अव्ययम् ॥ २ । १ । ४ ॥

अव्ययं सुबन्तं संख्यावाचिना सुबन्तेन सह समस्यते संख्येये द्वितीयाद्यन्यार्थे स च समासो बहुव्रीहिः । उपगता समीपं गताः दश येषां ते उपदशाः । नवैकादश वा । एवमुपविंशाः । उपत्रिंशाः ॥ एकार्थं चेत्येव सिद्धे प्रतिपदोक्त्या "प्रमाणे संख्याड्डु इत्यत्रैतत्संप्रत्ययौ योगौ ।

एकार्थं च ॥२ । १ । ४ ॥

एकस्समानोऽर्थो द्रव्यमधिकरणं यस्य तदेकार्थं समानाधिकरणमव्ययं च सुबंतं सुबन्तेन सह द्वितीयाद्यन्यार्थे बहुलं समस्यते स च समासो बहुव्रीहिः ॥ प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढो रथो येन स ऊढरथोऽनड्वान् । उपहृतो बलिर्यस्यै स उपहृतबलिर्यक्षी ॥ उद्धृत ओदनो यस्या सा उद्धृतौदना स्थाली ।

चित्रा गावो यस्य स चित्रगुर्देवदत्तः ॥ एवमविद्यमानपुत्रः । प्रपतितपर्णः । असिद्वितीयः । वीराः पुरुषा यस्मिन् स वीरपुरुषको ग्रामः । अव्ययम्—उच्चैर्मुखं यस्य स उच्चैर्मुखः । नास्ति पुत्रो यस्य स अपुत्रः । अस्ति क्षीरं यस्याः सा अस्तिक्षीरा गौः । सह पुत्रो यस्य येन वा सपुत्रः आगतः । एवं सभार्यः । सलोमकः । सपक्षकः । तद्वानित्यर्थः ॥ "धर्मादनद्विपदात् ॥ इति लिङ्गाद्बहूनामप्ययं समासः लोहितस्तनकः प्रियो यस्य स लोहिततनकप्रियः ॥ एकार्थग्रहणं किं ? पञ्चभिर्भुक्तमस्य ॥ द्वितीयाद्यन्यार्थ इति किं ? वृष्टे देवे गतः । बहुलाधिकारात पञ्च भुक्तवन्तो यस्य । अमा सार्धं मन्त्रा साकं पुत्रोऽस्येत्यत्र न भवति । क्वचिदन्यत्रापि भवति । करे कृतं येन स कृतकरः । कण्ठेकालः । उरसिलोमा । क्वचिन्नित्यः । प्रपर्णः । सुमुखी कन्या । कुशीलः पुरुषः । चन्द्रस्य मुखमिव मुखं यस्य स चन्द्रमुखः पित्रस्थान इत्यादौ वृत्तावुष्ट्रादिपदमुष्ट्रमुखादितुल्ये वर्तत इत्येकार्थत्वम् ॥

मिथोग्रहणे प्रहरणे च सरूपं युद्धेऽव्ययीभावः ॥ २ । १ । ६ ॥

मिथोऽन्योऽन्यं गृह्णन्ति यस्मिन् येन वा प्रहरन्ति वा तत्र वर्तमानं समानश्रुतिकं सुबन्तं तत्रैव वर्तमानेन सुबन्तेन सह समस्यते द्वितीयाद्यन्यार्थे युद्धेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति ॥ केशाश्च केशाश्च अन्योऽन्योस्य ग्रहणं यस्मिन्युद्धे तत् केशाकेशि । कचाकचि युद्धम् । दण्डाश्च दण्डाश्च अन्योऽन्यं प्रहरणं यस्मिन् युद्धे तत् दण्डादण्डि । मुष्टामुष्टि । अस्यसि वर्तते । स्वरूपमिति किं ? केशाश्च कचाश्च मिथो ग्रहणं यस्मिन्युद्धे ।

नदीभिर्नाम्नि ॥ २ । १ । ७ ॥

नदीवाचिभिस्सुबन्तैस्सुबन्तं द्वितीयाद्यन्यार्थे संज्ञा विषये

समस्यते स च समासोऽव्ययीभावः ॥ उन्मत्ता गङ्गा यस्मिन् तदुन्मत्तगङ्गम् । लोहितगङ्गम् । तूष्णींगङ्गम् । शनैर्गङ्गम् - इमानि देशनामानि । अन्यत्र शीघ्रगङ्गो देशः ॥

संख्यावंश्यैश्च पूर्वपदार्थे ॥ २ । १ । ८ ॥

वंशे भवो वंश्यः आद्यः । पुरुषः संख्यावाचि सुबन्तं वंश्यवाचिभिर्नदीवाचिभिश्च सुबन्तैः सह समस्यते पूर्वपदार्थेऽभिधेये अव्ययीभावश्च समासः ॥ सप्त गङ्गाः सप्तगङ्गम् । पञ्चनदम् । सप्तगोदावरम् । वंश्ये—द्वौ मुनी वंश्यौ व्याकरणस्य त्रिमुनि व्याकरणस्य । सप्तकाशि । त्रिकौसलमस्य राज्यस्य । त्रिमुनि व्याकरणमिति विद्यया तद्वतामभेदविवक्षा ॥

पारेमध्येऽन्तःषष्ठ्या ॥ २ । १ । ९ ॥

पारे मध्ये अन्तः इत्येतानि सुबन्तानि षष्ठ्यन्तेन सह समस्यते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावः । तत्सन्नियोगे च एकारान्तत्वं निपात्यते ॥ गङ्गायाः पारं पारेगङ्गम् । समुद्रस्य मध्यं मध्येसमुद्रम् । गङ्गायाः मध्यं मध्येगङ्गम् । गिरेरन्तः अन्तर्गिरम् अन्तर्गिरि । पूर्वपदार्थ इति किं ? गङ्गापारम् । गङ्गामध्यम् ॥

यावदवधारणे ॥ २ । १ । १० ।

अवधारणमियत्तापरिच्छेदः तस्मिन् गम्यमाने यावदित्येतत्सुबन्तं सुबन्तेन सह समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः ॥ यावन्त्यमत्राणि । यावदमत्रम् । यावानोदनः यावदोदनम् । यावानवकाशः यावदवकाशम् । अतिथीन् भोजय । निर्ज्ञातपरिमाणेनामत्रादिनाऽतिथिपरिमाणमिहावधार्यते ॥

बहिःपर्यपाङ् च । २ । १ । ११ ॥

बहिरादि सुबन्तं सुबन्तेन सह पूर्वपदार्थे समस्यते सच

समासो ऽव्ययीभावः । बहिर्ग्रामात् बहिर्ग्रामम् । परित्रिगर्तेभ्यः, परित्रिगर्तम् । अपरित्रिगर्तम् । आपाटलीपुत्रं वृष्टो देवः । प्राग्ग्रामात् प्राग्ग्रामम् । उदग्ग्रामम् । अपगतः शाखायाः । अपशाखः इत्यत्र सुपः प्रतिपदविहितस्य ग्रहणान्न भवति ॥

लक्षणेनाभिप्रत्याभिमुख्ये ॥ २ । १ । १२ ॥

अभि प्रति इत्येतौ सुबन्तौ आभिमुख्ये वर्तमानौ लक्षणवाचिना सुबन्तेन पूर्वपदार्थेऽभिधेये समस्यते स चाव्ययीभावः ॥ अग्निमभि अभ्यग्नि । अभ्यरण्यम् । अग्निं प्रति प्रत्यग्नि प्रत्यरण्यं शलभाः पतन्ति ॥ लक्षणेनेति किं ? साधुर्देवदत्तो मातरमभि ॥ आभिमुख्य इति किं ? वृक्षं प्रति विद्योतते विद्युत् ॥

दैर्घ्येऽनु ॥ २ । १ । १३ ॥

अन्वित्येत्सुबन्तं दैर्घ्ये आयामविषये यल्लक्षणं तद्वाचिना सुबन्तेन सह समस्यते पूर्वपदार्थे स चाव्ययीभावः । गङ्गामनु अनुगङ्गं वाराणसी । अनुयमुनं मथुरा ॥ दैर्घ्य इति किं ? वृक्षमनु विद्योतते विद्युत् ॥

समीपे ॥ २ । १ । १४ ॥

अनु इत्येतत् सुबन्तं समीपेऽर्थे वर्तमानं अर्थात् समीपवाचिना सुबन्तेन सह समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः ॥ वनस्यानु अनुवनम् । अनुग्रामम् ॥

तिष्ठद्गुप्रभृतीनि ॥ २ । १ । १५ ॥

तिष्ठद्गु इत्येवमादयः समासा अव्ययीभावसंज्ञा निपात्यन्ते यथायोगं पूर्वपदार्थाभिधेये ॥ तिष्ठद्गु । वहद्गु । अधोनाभम् । एकान्तम् । इत्यादयः ॥

नित्यं प्रतिनाल्पे ॥ २ । १ । १६ ॥

अल्पेऽर्थे वर्तमानेन प्रतिशब्देन सुपा सुबन्तं नित्यं सम-

स्यते स चाव्ययीभावः ॥ अल्पः सूपः सूपप्रति । शाकप्रति । नित्यग्रहणं वाक्यनिवृत्यर्थम् । तेनाऽन्यत्र वृत्तिर्वाक्यं च भवति ॥

परिणाक्षशलाकासंख्यं द्यूतेऽजये ॥ २ । १ । १७ ।

अक्षशलाका संख्यावाचि च इत्येतत्सुबन्तं परिणा सुपा नित्यं समस्यते स चाव्ययीभावः द्यूतविषये द्योत्ये ॥ अक्षिणैकेन न तथा वृत्तं यथा जये अक्षपरि । शलाकापरि । एकेन अक्षेण न तथा वृत्तं यथा जये एकपरि । द्विपरि ॥ अजय इति किं ? पञ्चपरीति मा भूत् । पञ्चकानाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा दीव्यते तत्र पञ्चाप्येकरूपा भवन्ति उत्ताना अवताना वा तदा पातयितुर्जयः ॥

शब्दप्रथासम्पत्समृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिसुप्पश्चाद्युगपद्यथासदृक्साकल्यान्तेऽव्ययम् ॥२।१।१८॥

शब्दप्रथादावर्थे वर्तमानमव्ययं सुबन्तं सुपा नित्यं समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः ॥ शब्दप्रथा प्रकर्षेण ख्यातिः । इतिशिवार्यम् । अहोशिवार्यम् वर्तते । शिवार्य शब्दो लोके सुष्ठु प्रथित इत्यर्थः । सम्पदन्यूनत्वम् । क्षत्रस्य संपत् सक्षत्रम् । समृद्धिर्वृद्धिराधिक्यम् । मद्राणां समृद्धिः सुमद्रम् । व्यृद्धि ऋद्धेरभावः । यवनानां व्यृद्धिः दुर्यवनम् । अर्थाभावः धर्मिणोऽसत्त्वम् । मक्षिकाणामभावः निर्मक्षिकं निर्वातम् । अत्ययोऽतीतत्वमतिक्रमः । शीतस्यात्ययो निश्शीतम् । निस्तृणम् । निशीते याहि । असंप्रतीत्युपभोगादेर्वर्तमानकालप्रतिषेधः । कम्बलस्यायमकाल इत्यतिकम्बलम् । अत्याम्रम् ॥ सुबर्थे-स्त्रीषु अधिकृत्य अधिस्त्रि । अधिकुमारि । पश्चादर्थे-रथानां पश्चात् अनुरथम् । पादान्तम् । युगपदर्थेऽक्रमेण चक्रे वा देहि सचक्र

देहि । यथार्थे योग्यतायाम्— रूपस्ययोग्यमनुरूपम् । वीप्सायाम्— अर्थमर्थं प्रति प्रत्यर्थम् । पदार्थानतिवृत्तौ— ज्येष्ठानामनतिवृत्त्या अनुज्येष्ठं प्रविशन्तु । सादृश्ये— शीलस्य सादृश्यं सशीलमनयोः । सदृक् सदृशः । सदृशो देवदत्तेन सदेवदत्तम् । साकल्यमनवशेषः— सुत्तणं सततमभ्यवहरति । अन्तः समीपमवसानं च— कुम्भस्य समीपमुपकुम्भम् । भाष्यमन्तं कृत्वा सभाष्यमधीते ॥

यथाया: ॥ २ । १ । १९ ॥

यथेत्येतद्था प्रत्ययान्तमव्ययं सुपा नित्यं समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः ॥ रूपस्य योग्यं यथारूपम् । मार्गानतिवृत्त्या यथामार्गम् । ये ये वृद्धा यथावृद्धम् अभ्यर्चय ॥ अथेति किम् ? यथा जिनदत्तस्तथा गुरुदत्तः "प्रकारेथा"-इति ॥

तिदुस्स्वत्याङ्क्वन्यस्तत्पुरुषः ॥ २ । १ । २० ॥

तिसंज्ञानि दुस् सु अति आङ् कु इत्येतानि चाव्ययानि सुबन्तानि सुपा नित्यं समस्यते स च समासोऽन्यो बहुव्रीह्यादिलक्षणरहितस्तत्पुरुषसंज्ञो भवति ॥ प्रगत्य । पटपटाकृत्य । ऊरीकृत्य । दुस् निन्दितपुरुषः दुष्पुरुषः । दूराजः । सुशोभनः पुरुषः सुपुरुषः । सुराजा । अतिराजा । अतिवृत्तम् । सुसाद्धयाद्‌तिः पूजायां समस्यते नातिक्रमे ईषत्पिङ्गलः आ पिङ्गलः । पापः पुरुषः कुपुरुषः । ईषदुष्णं । कोष्णम् ॥ अन्य इति किम् ? निन्दितः पुरुषो यस्य स दुष्पुरुषकः । अत्र बहुव्रीहित्वात्कच् । मद्राणां समृद्धिः सुमद्रम् । इत्यत्राव्ययीभावत्वादस् ॥

गतादिषु प्रादयः ॥ २ । १ । २१ ॥

प्र इत्येवमादि सुबन्तं गताद्यर्थे वर्तमानं सुपा नित्यं समस्यते स च समासोऽन्यस्तत्पुरुषो भवति ॥ प्रगतः आचार्यः

प्राचार्यः। प्रकृष्टो वीरः प्रवीरः। संगतोऽर्थः समर्थः। अतिक्रान्तः खट्वामतिखट्वः। उद्गतो वेलामुद्वेलः। अवकृष्टः कोकिलया अवकोकिलः। परिणद्धो वीरुद्भिः परिवीरुत्। सन्नद्धो वर्मणा सुवर्मा। परिग्लानोऽध्ययनाय पर्यध्ययनः। उद्युक्तः संग्रामाय उत्संग्रामः। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। अपगतः शाखायाः अपशाखः। अन्तर्गतोऽङ्गुल्याः अन्तरङ्गुलो नखः। उरसि प्रतिष्ठितम् प्रत्युरसम्॥ गतादिष्विति किम्? अतिसिक्ता॥ अन्य इति किम्? प्राचार्यको देशः॥

स्वकृतास्युक्तम्॥ २। १। २२॥

स्वाश्रयः कृत् स्वकृत् असिना पञ्चम्येकवचनेनाभिहितमस्युक्तम्। यस्मात् पराद्धातोर्यः कृद्विहितस्तदस्युक्तं सुबन्तं तेन स्वकृदन्तेन सुपा नित्यं समस्यते तत्पुरुषश्च समासो भवति॥ "कर्मणोऽण्॥ ४। ३। १०९" कुम्भकारः। नगरकारः॥ अस्युक्तमिति किम्? निषेधेऽलं खलौत्का खलुकृत्वा॥

टा॥ २। १। २३॥

नित्यमिति निवृत्तम्। टा इति तृतीयैकवचनोक्तं स्वकृता समस्यते वा तत्पुरुषश्च समासो भवति॥ तृतीययोपदंशः। मूलकोपदंशं भुङ्क्ते।

नञ्॥ २। १। २४॥

नञित्येत्सुबन्तं सुपा समस्यते वा तत्पुरुषश्च समासो भवति॥ नगौः। अगौः। अनश्वम्। अनेकम्। अवर्षाः। असर्वस्मै। असः। अन्य इत्येव न विद्यते मक्षिका यस्मिन् सः अमक्षिको देशः। मक्षिकाणामभावः अमक्षिकम्। ञित्॥

पूर्वापराधरोत्तरमंशिनाभिन्नेन॥ २। १। २५॥

अंशोऽवयव एकदेशः तद्वानंशी पूर्वादिन्यंशवाचिनि सुब-

न्तानि अंशवाचिना सुपा समस्यते वा तत्पुरुषश्च समासः अभिन्नेन न चेत्सोंऽशी भिन्नः तेन ॥ पूर्वं कायस्य पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः ॥ अंशिनेति किम् ? पूर्वं नाभेः कायस्य ॥ अभिन्नेनेति किम्? पूर्वं छात्राणाम् । प्रकृत्य-प्रतिषेधत्वात् अत्र न भवति । पूर्वं पाणिपादस्य ॥

सर्मेऽर्धम् ॥ २ । १ । २६ ॥

अर्धशब्दः प्रविभागे वर्तते । तस्य सम इति विशेषणम् । समे प्रविभागे वर्तमानमर्धमित्येतत्सुबन्तमंशिवाचि अंशिवाचिना अभिन्नेन सुपा वा समस्यते स समासोऽयं तत्पुरुषसमासो भवति ॥ अर्धं पिप्पल्याः अर्धपिप्पली । अर्धखट्वा ॥ सम इति किम्? ग्रामार्धो देशः ॥ अभिन्नेनेति किम्? अर्धं पिप्पलीनाम्॥

द्वित्रिचतुर्ड्ढा ॥ २ । १ । २७ ॥

द्व्यादिभ्यो यो ड्ढदन्तं सुबन्तमंशिवाचि अंशिना सुपा समस्यते वा स समासः तत्पुरुषो भवति । न चेत्सोंऽशी भिन्नः ॥ द्वितीयं भिक्षायाः द्वितीयभिक्षा भिक्षाद्वितीयं वा । एवं तृतीयभिक्षा भिक्षातृतीयं वा । चतुर्थभिक्षा भिक्षाचतुर्थं वा । तुरीयभिक्षा भिक्षातुरीयं वा ॥ द्वित्रिचतुरिति किम्? पञ्चमं भिक्षायाः ॥ ड्ढदिति किम्? द्वौ भिक्षायाः ॥ अंशिनेति किम्? द्वितीयं भिक्षायाः भिक्षुकस्य भिक्षुकेण न समासः ॥ अभिन्नेनेति किम्? द्वितीयं भिक्षुकाणाम् ॥

कालो द्विगौ च मेयैः ॥ २ । १ । २८ ॥

कालवाचि सुबन्तं केवलं द्विगौ च विषये वर्तमानं मेय-वाचिना सुपा समस्यते वा स समासः तत्पुरुषो भवति ॥ मासो जातस्य मासजातः । स्त्री मासजाता । संवत्सरजाता । मासमृतः । द्विगौ द्वे अहनि जातस्य द्व्यहजातः । त्र्यहजातः ॥

मेयैरिति किम्? मासो देवदत्तस्य ॥ षष्ठीसमासापवादाश्चत्वारो योगाः ॥

स्वयं सामिं क्तेन ॥ २ ॥ १ । २९ ॥

स्वयं सामि इत्येतौ सुबन्तौ क्तप्रत्ययान्तेन सुपा समस्यते वा स समासस्तत्पुरुषो भवति । स्वयं धातौ पादौ । स्वयं विलीनमाज्यम् । सामिकृतम् । सामिभुक्तम् । समासे स्वायं धौतिरित्यादि सिद्धम् ॥

द्वितीया खट्वा क्षेपे ॥ २ । १ । ३० ॥

खट्वा इत्येतत् द्वितीयान्तं क्तान्तेन सुपा समस्यते क्षेपे निन्दायां गम्यमानायां तत्पुरुषसमासः । क्षेपस्समासार्थो न वाक्येन गम्यत इति नित्य एवायं समासः । खट्वारूढः । खट्वाप्लुतो जाल्मः । उत्पथप्रस्थित एवमुच्यते । अन्यत्रखट्वामारूढाः ॥

कालः ॥ २ । १ । ३१ ॥

कालवाचि द्वितीयान्तं क्तान्तेन सुपा समस्यते वा स समासस्तत्पुरुषः ॥ अहः अतिसृता अहरतिसृताः मुहूर्ताः रात्रिसंक्रान्ताः । रात्र्यारूढाः षण्मुहूर्ताश्चराचरा उच्यन्ते । मासं प्रमितः मासप्रमितश्चन्द्रमाः । मासं मातुमारब्धाः प्रतिपच्चन्द्र उच्यते । अव्याप्त्यर्थं वचनम् ॥

व्याप्तौ ॥ २ । १ । ३२ ॥

व्याप्तौ या द्वितीया तदन्तः कालवाचीशब्दः व्यापकवाचिना सुपा समस्यते वा तत्पुरुषसमासो भवति ॥ मुहूर्तं सुखं मुहूर्तसुखम् । मुहूर्तरमणीयम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना ॥

श्रितादिभिः ॥ २ । १ । ३३ ॥

द्वितीयान्तं श्रितादिभिः सुबन्तैर्वा समस्यते स च समा-

सस्तत्पुरुषसंज्ञो भवति ॥ धर्मं श्रितो धर्मश्रितः । दुःखातीतः । नरकपतितः । ओदनबुभुक्षुरित्यादयः ॥

प्राप्तापन्नं तया च । २ । १ । ३४ ।

प्राप्तापन्न इत्येतौ सुबन्तौ तया द्वितीयान्तेन सह समस्यते वा स तत्पुरुषसमासो भवति । तत्संनियोगे च तयोरकारादेशः ॥ प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । प्राप्तगवः । प्राप्ता जीविकां प्राप्तजीविका । आपन्नगवी । अद्वचनं स्त्र्यर्थम् ॥

ईषद्गुणवचनैः । २ । १ । ३५ ।

ईषदित्येतत्सुबन्तं गुणवचनैः सह समस्यते वा स तत्पुरुषसमासः । गुणमुक्तवन्तो गुणवचनाः । ईषदल्पं पिङ्गलः ईषत्पिङ्गलः । ईषदुन्नतः । ईषद्रक्तः । ईषत्कडारः । ईषत्पिङ्गस्येदमीषत्पिङ्गलः ।

तृतीया तत्कृतैः २ । १ । ३६ ।

तृतीयान्तं तत्कृतैस्तृतीयान्तार्थः कृतार्थैर्गुणवचनैस्समस्यते वा स तत्पुरुषसमासो भवति ॥ शंकुलया कृतः खण्डः शङ्कुलाखण्डः देवदत्तः । शङ्कुलाखण्डो देवदत्तस्य गिरिकाणः । क्षारेण शुक्लः क्षारशुक्लः । त्रिभिः कृतो भागः त्रिभागः । कृतार्थो वृत्तावन्तर्भूतः ॥ तत्कृतैरिति किम्? अक्ष्णा काणः । पादेन खञ्जः ॥ गुणवचनैरिति किम् ? धान्येन धनवान् ॥

साधनं कृता ॥ २ । १ । ३७ ॥

साधनं कारकं क्रियानिर्वर्तकम् । तदिह कर्ता करणं च तद्वाचि तृतीयान्तं कृत्प्रत्ययान्तेन सुपा समस्यते वा स च समासस्तत्पुरुषो भवति ॥ आत्मना कृतम् आत्मकृतम् । परकृतम् ।

दात्रलूनम् । परशुच्छिन्नम् । देवदत्तनखनिर्भिन्नम् । अधिकार्थवचनेऽप्यमा समासमाहुः काकपेया नदी । श्वलेह्यकूपः । कण्टकसंचेयः ओदनः । बाष्पाछेद्यानि तृणानि । कुक्कुटसंपात्या ग्रामाः ॥

पूर्वाद्यनार्थैः ॥ २ । १ । ३८ ॥

पूर्वादिभिरूनार्थैश्च सुबन्तैः तृतीयान्तं समस्यते वा स च तत्पुरुषसमासः ॥ मासेन पूर्वः मासपूर्वः । मासावरः । धन्यार्थः हिरण्यार्थी ॥ ऊनार्थैः मासोनम् । मासविकलम् । कार्षापणोनम् । कार्षापणविकलम् ॥

चतुर्थी प्रकृतिस्वार्थार्थादिभिः ॥ २ । १ । ३९ ॥

स्वार्थेत्यर्थविशेषणं प्रकृतिः-परिणामि द्रव्यम् । तद्वाचिना सुबन्तेनार्थाद् विकृतिवाचिनार्थेन चतुर्थ्यर्थाभिधायिना शब्देन तदादिभिश्चान्यैस्सुबन्तैस्सह चतुर्थ्यन्तं समस्यते वा स समासस्तत्पुरुषो भवति ॥ रथाय दारुः रथदारुः । कुण्डलहिरण्यम् । स्वार्थार्थे पित्रे इदं पित्रर्थम् । स्वार्थ्यर्थम् । श्यर्थम् । कुण्डलार्थम् । तदादि कुवेरवलिः । प्रजाहितम् । अश्वघासः । हस्तिविडा धर्माय रक्षितश्चोरः धर्मरक्षितः ॥

तयालम् ॥ २ । १ । ४० ॥

तया चतुर्थ्यन्तेन अलमित्येतत्समस्यते वा स च तत्पुरुषसमासः ॥ अलं जीविकायै अलंजीविकः । अलंकुमारिः ॥ तयेति किम् ? अलमतिप्रसङ्गेन ॥

पञ्चमी भयादिभिः २ । १ । ४१ ॥

पञ्चम्यन्तं भयादिभिस्सुबन्तैस्समस्यते वा स च तत्पुरुषसमासः ॥ वृकाद् भयं वृकभयम् । धर्मापेतमित्यादयः ॥

क्तेनासत्त्वे ॥ २ । १ । ४२ ॥

असत्त्वे वर्तमाना या पञ्चमी तदन्तं क्तप्रत्ययान्तेन सुपा समस्यते वा स च तत्पुरुषसमासः ॥ स्तोकान्मुक्तः । कतिपयान्मुक्तः । दूरादागतः । अन्तिकादागतः । स्तोकान्मुक्तिः ॥

षष्ठ्ययत्नात् ॥ २ । १ । ४३ ॥

षष्ठ्यन्तं सुबन्तं सुबन्तेन सह समस्यते वा स च तत्पुरुषसमासो भवति न चेत्सा यत्नात् विशेषात् प्रापिता भवति ॥ राज्ञः पुरुषः राजपुरुषः । ब्राह्मणकम्बलः । राज्ञां गोक्षीरः राजगोक्षीरः । राजगव्याः क्षीरं राजगवीक्षीरम् । देवदत्तस्य यो गुरुः तस्य कुलं देवदत्तस्य गुरुकुलम् । वृद्धस्य राज्ञः पुरुषः इत्यादौ सापेक्षस्यागमकत्वान्नास्ति समासः ॥ अयत्नादिति किम्? शतस्य द्यूतम् सर्पिषो ज्ञानमित्यादौ न भवति । धर्मानुस्मरणमर्थानुचिन्तनमिति कृद्योगे षष्ठी सा च न कर्तरीत्यादिप्रतिषेधात् समस्यते ॥

याजकादिभिः ॥ २ । १ । ४४ ॥

याजक इत्येवमादिभिः शब्दैः षष्ठ्यन्तं समस्यते वा स च तत्पुरुषसमासः ॥ ब्राह्मणानां याजकः ब्राह्मणयाजकः । साधुपूजकः ॥

पत्तिरथं गणकेन ॥ २ । १ । ४५ ॥

पत्तिरथ इत्येतौ षष्ठ्यन्तौ गणकेन सुपा समस्यते वा स च तत्पुरुषसमासः । पत्तीनां गणकः पत्तिगणकः । रथगणकः ॥

वुनाजीवे । ॥ २ । १ । ४६ ॥

वुप्रत्ययान्तेन सुपा षष्ठी समस्यते सच तत्पुरुषसमासः ? आजीवे आजीवः समासार्थः न वाक्येन गम्यत इति नित्य समासः ॥ दन्तलेखकः । नखलेखकः । रमणीयकारकः ॥ अन्यत्र ओदनस्य भोजकः । पयसः पायकः ॥

न कर्तरि ॥ २ । १ । ४७ ॥

कर्तरि या षष्ठी सा वुप्रत्ययान्तेन न समस्यते ॥ भवत आसिका । भवतश्शायिका । भवतोग्रगामिका ॥ कर्तरीति किम् ? इक्षुभक्षिका मे धारयसि ॥

कर्मणि त्रा च ॥ २ । १ । ४८ ॥

कर्तरीति वर्तते । तदिह वोविशेषणं कर्तरि विहितो यो वुप्रत्ययः तृप्रत्ययश्च तदन्तेन सुपा कर्मणि षष्ठी न समस्यते ॥ ओदनस्य भोजकः । सक्तूनां पायकः । अपां स्रष्टा । पुरां भेत्ता । कर्मणीति किम् ? जनि कर्ता गुणो गुणी विशेषकः भूभर्तेते याजकादि ।

तृतीया यां ३ । १ । ४९ ॥

कर्तरि तृतीयायां सत्यां कर्मणि षष्ठी न समस्यते आश्चर्यो गवां दोहः । अगोपालकेन । साध्विदं शब्दानामनुशासनमाचार्येण ॥ तृतीयायामिति किम् ? साध्विदं शब्दानामनुशासनमाचार्यस्य : साध्विकटचिकीर्षा देवदत्तस्य ॥

तृप्तार्थाव्ययनिर्धार्यडच्छत्रानशमतिपूजाधारे ।२।१।५०॥

तृप्तार्थैरव्ययैर्निर्धार्यवाचिभिर्डदन्तैश्शत्रन्तैर्मतिपूजार्था इति मत्यर्थात् पूजार्थाच्च वर्तमाने यः क्तः गत्यकर्मण्याधारे च यः क्तः तदन्तैश्च सुबन्तैः षष्ठी न समस्यते ॥ तृप्तार्थैः फलानां तृप्तः तुहितः पूर्णः आशितः । अव्ययं राज्ञः साक्षात् । ग्रामस्य पुरस्तात् । देवदत्तस्य कृत्वा । जिनदत्तस्य प्रकृत्य । अव्ययीभावस्याप्यन्वर्थाविज्ञानादयं प्रतिषेध इष्यते । देवदत्तस्योपकुम्भमित्येके । निर्धार्ये गवां कृष्णा गौः सम्पन्नक्षीरतमा । डत् तीर्थंकराणां षोडशः चक्रधराणां पञ्चमः शान्तिः । छात्राणां द्वितीयः । शत् देवदत्तस्य पचन् पश्यन् द्विषन् । आनश् देवद-

त्तस्य पचमानः पठ्यमानाः । मतिक्तः राज्ञां मतः सम्मतः इष्टः बुद्धः विदितः । पूजार्थक्तः राज्ञां पूजितः अर्चितः । आधारक्तः इदमहिसृप्तं यातम् । इदमेषामासितं शयितं भुक्तं पीतम् ॥ एतैरिति किम् ? ऋषिकर्तव्यम् । फलशातनः ॥

गुणैरस्वस्थैः ॥ २ । १ । ५१ ॥

अस्वस्थैर्गुणैः सह षष्ठ्यन्तं न समस्यते ॥ काकस्य कार्ष्ण्यम् । बलाकायाः शौक्ल्यम् । वृषलस्य धार्ष्ट्यम् । कण्टकस्य तैक्ष्ण्यम् । देवदत्तस्य शुक्लः । कम्बलस्य कृष्णः । घृतस्य तीव्रः । चन्दनस्य मृदुः । अत्र दन्तावर्णः । गन्धः इत्यस्मात्प्रकरणाद्वा अपेक्ष्य निर्ज्ञाने समासः प्राप्नोति ॥ अस्वस्थैरिति किम् ? घटवर्णः । कन्यारूपम् । चन्दनगन्धः । कपित्थरसः । स्तनस्पर्शः । अविशेष्यलिङ्गसंख्याः स्वस्थाः । ग्रन्थगौरवमित्यादि बहुलाधिकारात् ॥

सप्तमी शौण्डादिभिः । २ । १ । ५२ ।

सप्तम्यन्तं शौण्डादिभिस्सुबन्तैस्सह समस्यते वा स च समासः तत्पुरुषः ॥ अक्षेषु प्रसक्तः । शौण्ड इव व्यसनी । अक्षशौण्डः । युद्धशौण्डः । अक्षधूर्तः । आहवशौण्डः । युद्धनिपुणः । स्थालीपक्वः । चक्रबन्धः । इत्यादयः ॥

नाम्नि ॥ २ । १ । ५३ ॥

संज्ञायां विषये सप्तम्यन्तं सुपा समस्यते स च समासस्तत्पुरुषः । नाम्निविहितत्वान्नित्यसमासः ॥ अरण्ये तिलकाः । अरण्ये माषकाः । वने हरिद्रकाः ॥

ण्यपावश्यके ॥ २ । १ । ५४ ॥

ण्यप्रत्याहारगृहीतप्रत्ययान्तेन सुपा सप्तम्यन्तमावश्यके अवश्यं भावनियोगे गम्यमाने नित्यं समस्यते स च समास-

स्तत्पुरुषः ॥ मासे अवश्यं देयं मासदेयम् । संवत्सरदेयम् । पूर्वाण्हेदेयम् । प्रातरध्येयम् । ग्रामदेयम् । ध्यापायप्रत्ययान्तेनैव समासमाहुः । संवत्सरकर्तव्यमिति बाहुलकादेव व्यवस्था ॥

तत्राहोरात्रांशं क्तेन ॥ २ । १ । ५५ ॥

तत्रेत्येतदहरवयववाचि रात्र्यवयववाचि च सप्तम्यन्तं क्तप्रत्ययान्तेन सुपा समस्यते वा स च समासस्तत्पुरुषः ॥ तत्रकृतम् । तत्रभुक्तम् । पूर्वाण्हेकृतम् । पूर्वाण्हकृतम् । अपराण्हकृतम् । पूर्वरात्रकृतम् । अपररात्रकृतम् ॥ अंश ग्रहणं किम् ? अह्निकृतम् ॥

काकादिभिश्च क्षेपे ॥ २ । १ । ५६ ॥

काकप्रकारैः क्तान्तेन च सुपा सप्तम्यन्तं समस्यते क्षेपे गम्यमाने स च समासस्तत्पुरुषः । तीर्थकाकः । नगरवायसः । तीर्थकुक्कुटः । तीर्थसृगालः । अनवस्थिता एवमुच्यन्ते । क्तेन अवतप्तेनकुलस्थितम् । कार्येष्वनवस्थितत्वमुच्यते । भस्मनिहुतम् । प्रवाहेसूत्रितम् । उदकेविशीर्णम् । निष्फलकृतमुच्यते । सर्वत्रात्रोपमानात् क्षेपः ॥

पात्रेसमितादयः ॥ २ । १ । ५७ ॥

पात्रेसमितादयः सप्तमीतत्पुरुषा निपात्यन्ते क्षेपे ॥ पात्रेसमिताः । पात्रेबहुलाः । अत्र पात्र एव समिता नान्यत्र कार्ये इत्यवधारणात् क्षेपः । उदुम्बरमशकः । कूपकच्छपः । कूपमण्डूकः । अत्रोपमया । मातरिपुरुषः । प्रतिषिद्धसेवनेन । पिण्डिशूरः । गेहे[१]क्ष्वेली । गेहेनर्दी । गेहेव्यालः गर्भेतृप्तः । गोष्ठेशूरः । गोष्ठपण्डितः । कर्णेटिरिटिरिः । अत्र निरीहतया । निपातनात् पदान्तरेणासमासः । परमाः पात्रेसमिता इति ॥

विशेषणं व्यभिचार्येकार्थं कर्मधारयश्च ॥२।१।५८॥

१ 'क्ष्वेली' इत्यपि पाठः पुस्तकान्तरे ।

भेदकं विशेषणं भेद्यं विशेष्यं तत्र चान्यत्र च संभवद्व्यभिचारि तद्विशेषणवाचि एकार्थं समानाधिकरणं सुबन्तं विशेष्यवाचिना सुबन्तेन सह वा समस्यते स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञकश्च भवति ॥ नीलमुत्पलं नीलोत्पलम् । कृष्णतिला । पुङ्गवखञ्जकुण्डः । कुण्डखञ्जः । पूर्वा च सा उत्तरा च सा पूर्वोत्तरा । उत्तरपूर्वा[१]दिक् । नीलोत्पलादिषूत्पलादिजातिशब्दो विशेष्यमेव । खञ्जकुण्डादावनियमः । विशेषणमितीति किम्? लोहितस्तक्षकः ॥ व्यभिचारीति किम्? तक्षकः सर्पः । बहुलाधिकारात् क्वचिदव्यभिचारेऽपि भवति । पृथिवीद्रव्यम् । आम्रवृक्षः । मेरुपर्वतः । क्वचिद्व्यभिचारेऽपि न भवति । रामो जामदग्न्यः । संज्ञायां नित्यम् । कृष्णसर्पः । गौरखरः । लोहितशालयः । च शब्दस्समुच्चयार्थः । कर्मधारयेत्यधिकार आ "मयूरव्यंसकादय" इति ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलम् ॥ २ । १ । ५९ ॥

पूर्वः कालो यस्य स भवति पूर्वकालः । तद्वाचीनि एकादीनि चैकार्थानि सुपा समस्यन्ते स च समासस्तत्पुरुषः कर्मधारयश्च ॥ पूर्वकालोऽपरकालेन । पूर्वं स्नातः । पश्चादनुलिप्तः । तार्किकः दग्धप्ररूढम् । एकशुक्लः । सर्वशुक्लः । जरद्वैद्यः । पुराण तार्किकः । नववैयाकरणः । केवलवैयाकरणः । केवल जरत् । केवलपुराणम् । विशेषणमित्येव सिद्धे पूर्वपदनियमार्थं प्रकरणम् ॥

दिगधिकं संज्ञातद्धितोत्तरपदे ॥ २ । १ । ६० ॥

दिग्वाचि अधिक इत्येतच्च सुबन्तमेकार्थं सुपा समस्यते वा संज्ञायां तद्धिते प्रत्यये विषयभूते उत्तरपदे च परे स च समा-

१ "वा विदिक्" इति पाठोऽन्यपुस्तके ।

सस्तत्पुरुषः कर्मधारयश्च ॥ संज्ञायाम्–दक्षिणाः कोसलाः दक्षिणकोसलाः । उत्तरपाञ्चालाः । तद्धिते दक्षिणस्यां शालायां भवः दाक्षिणशालः । अधिकया षष्ठ्या क्रीतः, अधिकां षष्ठीं भूतो भावी वा अधिकषाष्टिकः । उत्तरपदे-दक्षिणशालाप्रियः । अधिगवधनः ॥ सञ्ज्ञातद्धितोत्तरपदेषु नित्यः समासः अन्यथा तदभावात् ॥

संख्या समाहारे च द्विगुश्चानाम्न्ययम् । २।१। ६१ ॥

अनेकस्य कथंचिदेकत्वं समाहारः । संख्या सुबन्तमेकार्थं सुबन्तेन सह समस्यते वा संज्ञातद्धितोत्तरपदेषु समाहारे चाभिधेये स च समासस्तत्पुरुषः कर्मधारयश्च भवति द्विगुसंज्ञकश्च ॥ न चेत्समासो नाम्नि ॥ संज्ञायाम्–पञ्चाम्राः । पञ्चवटाः । सप्तर्षयः । दशार्हाः ॥ तद्धिते–पञ्चकपालः । अध्यर्धशूर्पः । अर्धपञ्चमशूर्पः ॥ उत्तरपदे पञ्चगवधनः । पञ्चनावप्रियः । द्व्यह्नजातः ॥ समाहारे-पञ्चपूली । पञ्चराशी । दशगवम् ॥ अनाम्नीति किम् ? सप्त ऋषीणामिदं साप्तर्षम् अत्र द्विगुर्न स्यात् ॥ 'अयम्' ग्रहणमसितःनेव सूत्रे द्विसंज्ञार्थम् ॥

निन्द्योऽपापाणकेन ॥ २ । १ । ६२ ॥

निन्द्यः कुत्स्यः । निन्द्यवाचि सुबन्तमेकार्थं पापअणक इत्येतद्वर्जितेन निन्दावाचिना सुपा समस्यते वा स च समासस्तत्पुरुषः कर्मधारयश्च ॥ खसूची निष्प्रतिभो वैयाकरणः वैयाकरणखसूचिः । तार्किकवठरः । याज्ञिककितवः । मीमांसकदुरूटः । क्षत्रियभीरुः । भिक्षुविटः ॥ निन्द्य इति किम् ? वैयाकरणश्चोरः। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तनिन्दायामयं समासः । चोरत्वेन च वैयाकरणत्वं न निन्द्यते, किं तर्हि ? तदाश्रयः पुमान्॥ अपापाणकेनेति किम् ? पापकुलालः । अणकनापितः ॥

गौणस्तेन ॥ २ । १ । ६३ ॥

गुणादागतो गौणः । गौणशब्दैकार्थो येन गुणेन संप्रवर्तते तत् समान्यनिमित्तेन सुपा समस्यते वा स च समासस्तत्पुरुषः कर्मधारयश्च ॥ शस्त्रीव शस्त्री शस्त्री चासौ श्यामा च शस्त्रीश्यामा देवदत्ता । एवं शरकाण्डा गौरी । न्यग्रोधपरिमण्डला । सिंहशूरः । कुमुदश्येनी । हंसगद्गदा । मृगचपला ॥ तेनेति किम्? अग्निर्माणवकः गौर्वाहीकः ॥

व्याघ्रादिभिर्गौणैस्तदनुक्तौ ॥ २ । १ । ६४ ॥

एकार्थं सुबन्तं व्याघ्रादिभिर्गौणैस्सुबन्तैस्सह समस्यते वा स च समासस्तत्पुरुषः कर्मधारयश्च । येन गुणेन ते व्याघ्रादयः प्रवर्त्तन्ते स चेद्गुणः शब्देन न प्रतिपाद्यते ॥ व्याघ्र इव व्याघ्रः पुरुषः पुरुषव्याघ्रः । पुरुषसिंहः । पुरुषवृषभः । मुखपद्मम् । पाणिपल्लवम् । नृपचन्द्रः ॥ गौणैरिति किम्? वृषभः सिंह इव वृषभसिंहः ॥ तदनुक्ताविति किम्? पुरुषव्याघ्रः । शूर इति मा भूत् ॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ।२।१।६५।

पूर्वादीनि सुबन्तानि एकार्थानि सुपा समस्यन्ते वा स च समासस्तत्पुरुषः कर्मधारयश्च ॥ पूर्वः पुरुषः पूर्वपुरुषः । अपरपुरुषः प्रथमपुरुषः । चरमपुरुषः । जघन्यपुरुषः । समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । वीरपुरुषः ॥ विशेषणमित्येव एकवीरः ॥

श्रेण्यादिः कृतादिभिश्च्वौ ॥ २ । १ । ६६ ॥

श्रेणी इत्यमादि सुबन्तमेकार्थं कृतादिभिस्सह च्व्यर्थे गम्यमाने समस्यते वा स च समासस्तत्पुरुषः कर्मधारयश्च ॥ अश्रेणयः श्रेणयः कृताः श्रेणिकृताः पुरुषाः । ऊककृताः । पूग-

कृता: । श्रेणिमिता: । श्रेणिमता: । श्रेणिभूता: । च्व्यर्थेऽयं समास: । च्व्यौ नित्यमेव-श्रेणीकृता: । ऊरीकृता ॥

क्तान्नञादिभिन्नैः ॥ २ । १ । ६७ ॥

क्तान्तमेकार्थं सुबन्तं नञ्प्रकारैरेव भिन्नैस्सुबन्तैस्समस्यते वा स च समासस्तत्पुरुष: कर्मधारयश्च ॥ कृताकृतम् । भुक्ताभुक्तम् । पूतापवितम् । शाताशितम् । कृतापकृतम् । भुक्तविभुक्तम् ॥ नञादिभिन्नैरिति किम् ? कृतं प्रकृतम् ॥ अवधारणं किम् ? सिद्धं चाभुक्तं च कृतं चाकर्तव्यं च ॥

नानिटेट् ॥ २ । १ । ६८ ॥

नञादिभिन्नेन क्तान्तेनानिटा इट्क्तान्तस्सेट् न समस्यते क्लिशिता क्लिष्टम् । पविता पूतम् । इति मा भूत् ॥ अनिटेति किम् ? अशितानशितेन जीवति ॥

सन्महत्परमोत्तमोत्कृष्टं पूजायाम् ॥ २ । १ । ६९ ॥

सदादिस्सुप्सुपा सह समस्यते वा पूजायां गम्यमानायां स च समासस्तत्पुरुष: कर्मधारयश्च ॥ सत्पुरुष: । महापुरुष: । परमपुरुष: । उत्तमपुरुष: । उत्कृष्टपुरुष: ॥ अन्यत्र—सन्जीव: । उत्कृष्टो गौ: कर्दमात् ॥

वृन्दारकनागकुञ्जरैः ॥ २ । १ । ७० ॥

वृन्दारकादिभिस्सुबन्तैस्सुबन्तमेकार्थं समस्यते वा पूजायां स च समासस्तत्पुरुषः कर्मधारयश्च ॥ गौर्वृन्दारक इव गोवृन्दारक: । गोनाग: । गोकुञ्जर: ॥

कतरकतमं जातिप्रश्ने ॥ २ । १ । ७१ ॥

करतकतम सुबन्तौ एकार्थौ सुपा समस्यते वा जातिप्रश्ने गम्यमाने स च समासस्तत्पुरुषः । कतरो गार्ग्य: कतरगार्ग्य: । कतमो गार्ग्य: कतमगार्ग्य: । अन्यत्र कतरो भवतो देवदत्तः ।

किं क्षेपे ॥ २ । १ । ७२ ॥

किमित्येतत्सुबंतं सुपा समस्यते वा क्षेपे गम्यमाने स च समासस्तत्पुरुषः । सकिंराजा यो न रक्षति । सकिंसखा योऽभिद्रुह्यति । सकिं गार्ग्यो यो न वहति । अन्यत्र–को राजा पाटलीपुत्रस्य

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणी प्रवक्तृश्रोत्रियाध्यापकधूर्तप्रसंसारुढैर्जातिः ।२।१।७३।

पोटादिभिःप्रसंसारुढैश्च सुबन्तैःसह जातिवाचि सुबेकार्थं समस्यते वा स च तत्पुरुषः ॥ ब्राह्मणपोटा । आर्यपोटा । पुरुषवेषधारिणी स्त्री पोटा । गर्भे एव दास्यं गता वा । इभयुवतिः । नागयुवतिः । अग्निस्तोकम् । विषस्तोकम् । दधिकतिपयम् । उदश्वित्कतिपयम् । गोगृष्टिः । गोधेनुः । गोवशा । गोवेहत् । गोवष्कयणी । वेहद्वहति या गर्भम् । वशाया नोपजायते । सकृत् प्रसूता गृष्टिः स्यात् । वष्कयस्त्वेक हायनः प्रवक्तृ । कठप्रवक्ता । कालापश्रोतियः । कठाध्यापकः । कठधूर्तः । प्रसंसारुढः । मत्तल्लिकादयः । आविष्टलिङ्गास्तैः । गोमतल्लिका । गोमचर्च्चिका । गोप्रकाण्डम् । गोकुमारी । रूढग्रहणादिह न भवति । गौः शोभना ।

चतुष्पाद्गर्भिण्या ॥ २ । १ । ७४ ॥

चतुष्पादा जातिस्तद्वाचि सुबेकार्थं गर्भिणीशब्देन सुपा समस्यते वा स च समासस्तत्पुरुषः गर्भिणी गौः । गो गर्भिणी । चतुष्पादिति किम् । ब्राह्मणी गर्भिणी ।

खलतिजरत्पलितवलिनैर्युवा । २ । १ ।७६ ॥

युवशब्दैकार्थं खलत्यादिभिस्सुबन्तैस्समस्यते वा स च समासस्तत्पुरुषः । युवा खलतिः युवखलति । युवरजन् । युवपलितः । युववलिनः । लिंगविशिष्टस्यापि । युवतिःखलतीः

युवखलतीत्यादि ।

घ्यप्तुल्याख्याअजात्या ॥ २ । १ । ७६ ॥

ध्यप्प्रत्यान्तं तुल्यपर्यायं च सुबन्तमजातिवाचिना सुपा समस्यते वा स च समासस्तत्पुरुषः । भोज्योष्णम् । भोज्य-लवणम् । पानीयशीतम् । जलम् । भरणीय पूर्णो घटः । भृत्यभ रणीयः । एकोऽत्रघ्यप् । आर्होर्थेऽन्य शक्य र्थे तुल्याख्यं ॥ तुल्यश्वेतः । मद्गृशमहान् । अजात्येति किम् ? भोज्य ओदनः । तुल्यो वैश्यः ।

वर्णोवर्णः । २ । १ । ७७ ॥

वर्णविशेषवाचि विशेषणं सुबेकार्थं वर्णविशेषवाचिना विशेष्येण सुपा समस्यते वा स च समासस्तत्पुरुषः । शुक्लः कृष्णः । शुक्लकृष्णः । रोहितपांडु । शुक्लभ्रुः । हरितबभ्रुः कृष्णसारंगः ।

कुमारः श्रमणादिना ॥ २ । १ । ७८ ॥

कुमार इत्येतत्सुबन्तं विशेषणं श्रमणादिभिः सुबन्तैः सह समस्यते वा स च समासः तत्पुरुषः । कुमारी श्रमणा । कुमार-श्रमणा । कुमारतापसी । कुमाराऽभिरूपकः ।

मयूरव्यंसकादयः । २ । ७८ ।

मयूरव्यंसकादयस्तत्पुरुषसमासा निपात्यंते । व्यंसको मयूरः मयूरव्यंसकः । विलुप्ते विस्तृते वा अंशे अस्येति व्यं-सस्तत्त ल्ये। व्यंमकः । व्यंसयति छलयतीति वा व्यंसकः । एवं छात्रव्यंसकः । अपेहि प्रकसं दूरमिति यस्यां सा अपेहिप्रकसा । एहि स्वागतमिति यस्यां सा एहिस्वागता । उदक्च अवक्च उच्चावचं । उच्चैश्च नीचैश्च उच्चनीचम् । न विद्यते किंचन अस्य स अकिंचनः । आख्यातमाख्यातेन क्रियासातत्ये अश्नीते

पिबतेति सततं वर्तते । अश्नीतपिबता । गतप्रत्यागतादयः गतञ्च तत् प्रत्यागतं च गतप्रत्यागतम् ।

यातानुयातम् । शाकपार्थिवादयः । शाकभोजी पार्थिवः शाकपार्थिवः । ओदनप्रधानः प्राणिनिः ओदनप्राणिनिः । दध्युपसिक्त ओदनः दध्योदनः । गुडसंमिश्रा धानाः गुडधानाः । गुडपृथुकाः । अश्वयुक्तो रथः अश्वरथः । दधिपूर्णो घटः दधिघटः । घृतघटः । बहुवचनादाकृतिगणोऽयम् । तेनाविहितलक्षणः तत्पुरुषश्शिष्टैः प्रयुज्यमानो मयूरव्यंसकादिरिति साधुर्मंतव्यः । निपातनादेव पदान्तरेण न समासः । परमोमयूरव्यंसक इति ॥

द्वंद्वः सहोक्तौ ॥ २ । १ । ८० ॥

सुबन्तं सुबन्तेन सहवचने समस्यते स च समासो द्वंद्वसंज्ञो भवति । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । धवाश्वकर्णदन्तोष्टम् । वाक् च त्वक् च वाक्त्वचम् । लघ्वयजादिरित्येक ग्रहणात् बहुनामपि द्वंद्वः । होतृपोतृनेष्टोद्गातारः । सहोक्ताविति किम्? प्लक्षश्च न्यग्रोधश्च । अहरहर्नयमानो गामश्वम् । पुरुषम् । पशुं । वैवश्वतो न तृप्यति

समानामेकः ॥ २ । १ । ८१ ॥

समानानां तुल्यार्थानां शब्दानामर्थस्य सहवचने तेषामेक एव प्रयोक्तव्यः । बहुवचनमतंत्रम् । वक्रश्च कुटिलश्च वक्रौ । कुटिलौ वा । सितश्च शुक्लश्च सितौ । शुक्लौ वा । द्वंद्वासह वा दोषसारंभः ।

सुप्यसंख्येयः ॥ २ । १ । ८२ ॥

सुपि सर्वत्र ये शब्दास्समाना एकरूपा भवन्ति तेषां सहोक्तावेक एव प्रयोक्तव्यः संख्येयवाचि शब्दरूपं वर्जयित्वा । अक्षश्च शकटाक्षः । अक्षश्च देवनाक्षः । अक्षश्च विभीताक्षः ।

अक्षा एवं पादाः । माषाः । श्येनी च श्येनी च श्येन्यौ । हरिण्यौ । वृक्षश्च वृक्षश्च वृक्षौ । एवं वृक्षाः । सुपीति किम् ? मातृमातरौ । जनयित्री । धान्यमातृवाचिनो औटि मातरौ । मातारावित्ति रूपं भिद्यते । अभेदे मातृभ्यां मातृभिरित्येके । तेषां यस्मिन् सुपि ये शब्दाः समानास्तस्मिन्नेव सहवचने एकः प्रयोक्तव्य इत्यर्थः । असंख्येय इति किम् ? एकश्च एकश्च । द्वौ च द्वौ द्वाविति न भवति । द्वंद्वोपि न भवत्यभिधानात् । विंशतिश्च विंशतिश्च विंशती । अत्र संख्यानवाचित्वादेकशेषः ।

त्यदादिः ॥ २ । १ । ८३ ॥

त्यदादिनाऽन्येन च त्यदादेस्सहवचने त्यदादिरेवैकः प्रयुज्यते ॥ स च देवदत्तश्च तौ । अयं देवदत्तश्च इमौ । त्यदादिना मिथो यद्यद् परं तदेवैकं प्रयुज्यते । स च त्वं च युवां । त्वं चाहं चावाम् । त्वञ्च भवांश्च भवन्तौ । भवाँश्चाहं चावाम् ।

भ्रातृपुत्राःस्वसृदुहितृभिः ॥ २ । १ । ८४ ॥

भ्रात्रर्थस्य स्वस्रर्थेन सहोक्तौ भ्रात्रर्थः पुत्रार्थस्य दुहित्रर्थेन पुत्रार्थ एवैकः प्रयुज्यते । भ्राता च स्वसा च भ्रातरौ । सौदर्यश्च स्वसा च सौदर्यौ । भ्राता च भगनी च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ । सुतश्च दुहिता च सुतौ । पुत्रश्च सुता च पुत्रौ । बहुवचनं पर्य्यायार्थम् ।

पिता मात्रा वा ॥ २ । १ । ८५ ॥

पितृशब्दस्य मातृशब्देन सहोक्तौ पितृशब्दैवैकः प्रयुज्यते वा । पिता च माता च पितरौ ! मातापितरौ वा ।

श्वशुरः श्वश्रूभ्याम् ॥ २ । १ । ८६ ॥

श्वशुरशब्दस्य श्वश्रूशब्देन सहोक्तौ श्वशुरश्चैवैकः प्रयुज्यते वा । श्वशुरश्च श्वश्रूश्च श्वशुरौ । श्वश्रूश्च श्वशुरौ वा । द्विवचनं जातिपरिग्रहार्थम् ।

वृद्धो यूनानन्यार्थप्रकृतौ ॥ २ । १ । ८७ ॥

वृद्धस्य यूना सहोक्तौ वृद्धवाच्यैवैकः प्रयुज्यते । न चेद् वृद्धाद्यूनो युवद्वाचिन्यो भिन्नोऽर्थोऽन्या च प्रकृतिर्भवति । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । दाक्षिश्च दाक्षायणश्च दाक्षी । औपगवश्च औपगवीश्च औपगवौ । वृद्ध इति किम् ? गर्गगार्ग्यायणौ । अन्यार्थप्रकृताविति किम् ? भागवत्तिभागवित्तिकौ । अत्र गहस्सौवीरस्वं चान्योऽर्थः । वात्स्यायनशौनकायनौ । अत्रान्या प्रकृतिः ।

पुरुषः ॥ २ । १ । ८८ ॥

वृद्धायाः यूनो सहोक्तौ वृद्धवाच्यैवैकः प्रयुज्यते । सा च वृद्धास्त्री, पुरुषः-पुरुष इव भवति । गार्गी च गार्ग्यायणश्च गार्ग्यौ । वात्स्यौ । दाक्षी च दाक्षायणश्च दाक्षी । औपगवी च औपगविश्च औपगवौ । अर्थातिदेशात् । गार्गी च गार्ग्यायण च गर्गाः । गर्गान् ।

स्त्रिया ॥ २ । १ । ८९ ॥

पुरुषस्य पुंसः प्राणिनः स्त्रिया सहोक्तौ पुरुषवाच्यैवैकः प्रयुज्यते अनन्यार्थप्रकृतौ । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । कुक्कुटौ । पटुश्च पट्वी च पटू । गौश्चायम् । गौश्चेयम् । इमौ गावौ । प्राणिग्रहणम् । तीरं नदनदीपतेः । घटपटीशरांवोदंचनानां । अनन्यार्थप्रकृताविति किम् ? इंद्रेंद्राण्यौ । अत्र दवयोगेऽन्यार्थः । दूणी कच्छपौ । अत्र प्रकृतिः ।

ग्राम्यद्विखुरसंघेऽशिशौ स्त्रीप्रायः ॥ २ । १ । ९० ॥

ग्राम्या ये द्विखुराः पशवः तेषां संघेऽशिशावतरुन संबंधिनि स्त्रीपुरुषाणां सहोक्तौ प्रायः स्त्रीवाच्यैवैकः प्रयुज्यते अनन्यार्थप्रकृतौ। गावश्चेमे। गावश्चेमाः। इमा गावः। इमाः अजाः। ग्राम्यग्रहणं किम्? रुरवश्चेमे। रुरवश्चेमाः। इमे रुरवः। प्रषताश्च प्रषत्यश्च प्रषताः। द्विखुरग्रहणं किम्? इमे अश्वाः। गर्दभाः। मनुष्याः। पक्षिणः। संघ इति किम्? गौश्चायम्। गौश्चेयम्। इमौ गावौ। अशिशाविति किम्? इमे बालाः। बर्कराः। प्राय इति किम्? उष्ट्राश्च उष्ट्र्यश्च उष्ट्राः छागाः। अनत्यार्थप्रकृताविति किम्? गोबलीवर्धम्।

नपुंसकमन्येनैकं च वा ॥ २ । १ । ८१ ॥

नपुंसकं शब्दस्वरुपमन्येनऽनपुंसकेन सहोक्तावेकं प्रयुज्यते अनन्यार्थप्रकृतौ। तच्चैकं प्रयुज्यमानमेकार्थं वा भवति। शुक्लं च वस्त्रम्। शुक्लश्च कंबलः। ते इमे शुक्ले। तदिदं शुक्लं वा। शुक्लं च वस्त्रम्। शुक्ला च बृहतिका। ते इमे शुक्ले तदिदं शुक्तं वा। अन्येनेति किम्? शुक्लं च शुक्लं च शुक्ले। शुक्लानि। एकं चेति न भवति। अन्यार्थप्रकृताविति किम्? हिमहिमान्यौ।

पुष्यार्थात् पुनर्वसुर्ज्योतिषि । २ । १ । ८२ ॥

पुष्यार्थात् शब्दात् ज्योतिषि वर्तमानात्परः पुनर्वसुशब्दो ज्योतिष्ये वर्तमानस्सहोक्तौ विषये द्व्यर्थस्सन्नेत्यमेकार्थो भवति। उदितौ। पुष्यपुनर्वसू। तिष्यपुनर्वसू। सिध्यपुनर्वसू। पुष्यार्थादिति किम्? आर्द्राः पुनर्वसवः। ज्योतिषीति किम्। पुष्यपुनर्वसवो माणवकाः।

द्वंद्वो वा । २ । १ । ८३ ॥

द्वंद्वसमासः एक एकार्थो वा भवति। देवदत्तजिनदत्तम।

देवदत्तजिनदत्तौ । वधूवरम् । वधुवरौ । तिष्यपुनर्वसु । तिष्यपुनर्वसू । ब्राह्मणक्षत्रियम् । ब्राह्मणक्षत्रियाः । स्थावरजङ्गमम् स्थावरजङ्गमाः ।

विरोध्यद्रव्यमभेदे । २ । १ । ८४ ॥

विरोधियदद्रव्यं गुणाद्याधारो न भवति । तदवयवो द्वंद्वैकार्थो वा भवत्यभेदे । न चेद्भिन्नोऽन्योऽवयवो भवति । शीतोष्णं शीतोष्णे । सुखदुःखम् । सुखदुःखे । जीवितमरणम् । जीवितमरणे । लाभालाभम् । लाभालाभे । विरोधीति किम् ? कामक्रोधौ । रूपरसगंधस्पर्शाः । अद्रव्यमिति किम् ? शीतोष्णे इमे उदके । अभेद इति किम् ? बुद्धिसुखदुखानि । पूर्वेणैव सिद्धे सर्वोऽयं विकल्पे नियमार्थः प्रत्युदाहरणं व्यवच्छेद्यम् ।

अश्वबडबपूर्वापराधरोत्तराः । २ । १ । ८५ ॥

अश्वबडबादयो द्वंद्वा एकार्था वा भवन्त्यभेदे । अश्वबडबम् । अश्वबडबौ । अत एव निपातनादादौनिवृत्तिः । पूर्वापरम् । पूर्वापरौ । अधरोत्तरम् । अधरोत्तरे ।

पशुव्यंजनानि । २ । १ । ८६ ॥

पश्ववयवो व्यंजनावयवश्च द्वंद्व एकार्थो वा भवत्यभेदे । गोमहिषम् । गोमहिषौ । दधीघृतम् । दधीघृते । शाकसूपम् शाकसूपौ । बहुवचनं पशुद्वंद्वे सेनाङ्गैकत्वबादनार्थम् । हस्त्यश्वम् । हस्त्यश्वाः । अभेद इति किम् ? गोनरौ । दधीवारिणी । दध्युष्ट्रौ ।

तरुतृणधान्यमृगपक्षिबह्वर्थांशः । २ । १ । ८७ ॥

बहवोऽर्थाः येषान्ते बह्वर्थाः । अंशा अवयवा यस्य स तर्वाद्यवयवो द्वंद्व एकार्थो वा भवत्यभेदे । तरु-लपक्षाश्च न्यग्रो-

धाश्च प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । तृण—कुशकाशम् । कुशकाशाः । धान्य—व्रीहियवम् व्रीहियवाः । तिलमाषम् । तिलमाषाः । मृग–रुरुपृषतम् । रुरुप्रषताः । पक्षि हंसचक्रवाकम् । हंसचक्रवाकाः । बह्वर्थांश इति किम ? प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ ।

सेनाङ्गक्षुद्रजन्तु ॥ २ । १ । ९८ ॥

वेति निवृत्तम् । सेनायाः अंगान्यवयवाः क्षुद्रजन्तवो ऽल्पकायाः प्राणिन नकुलं समर्थ्यंते । सेनाङ्गावयवः क्षुद्र-जन्त्ववयवश्च बह्वर्थांशो द्वंद्व एकार्थो नित्यं भवत्यभेदे । अश्वाश्च रथाश्चाश्वरथम् । रथिकाश्वारोहकम् । यूकालिक्षम् । दंशमशकम् । बह्वर्थांश इति किम् ? अश्वरथम् । अभेद इति किम् ? हस्ति-मशकाः ।

फलं जातिः ॥ २ । १ । ९९ ॥

फलं या जातिस्तदवयवो बह्वर्थांशो द्वंद्व एकार्थो नित्यं भवत्यभेदे । बदराणि च अमलकानि च बदरामलकम् । जातिरिति किम् ? द्रव्यपदबाधनायैतानि बदरामलकानि तिष्ठंति ।

शेषोऽप्राणी ॥ २ । १ । १०० ॥

शेषा व्यञ्जादिभ्यो योऽन्यो प्राणी प्राणिवर्जिता या द्रव्यजातिः तदवयवो द्वंद एकार्थो भवत्यभेदे । आराशस्त्री धानाशष्कुलि । युगवस्त्रम् । शेष इति किम् ? दधीघृते । अप्राणीति किम् ? ब्राह्मणक्षत्रियविट्छूद्राः ।

प्राणीतूर्याङ्गम् ॥ २ । १ । १०१ ॥

प्राण्यंगावयवस्तूर्याङ्गावयवश्च द्वंद्व एकार्थो भवत्यभेदे । अङ्गमवयवः । पाणिपादम् । शिरोग्रीवम् । शंखपटहम् । भेरीमृदङ्गम् ।

चरणां स्थेणोर्लुङ्यनुवादे ॥ २ । १ । १०२ ॥

लुङ्परयोः स्था इण् इत्येतयोर्यत्कर्तृ चरणं वेदशाखाध्ययनाः पुरुषास्तदवयवको द्वंद्वोऽनुवादविषये एकार्थो भवत्यभेदे । उदगात्कठकालापम् । प्रत्यष्ठात्कठकौतुमम् । अन्यत्रोदगुः । प्रत्यष्ठुः । कठकालापाः ।

नित्यवैरावैरे ॥ २ । १ । १०३ ॥

नित्यं सदा वैरद्वेषो येषां तदवयवो द्वंद्वो वैरे एकार्थो भवत्यभेदे । देवासुरम् । अहिनकुलम् । मार्जारमूषिकम् । काकोलूकम् । वैर इति किम् ? देवासुरैरमृतमंबुनिधेर्ममंथे ।

पात्र्यशूद्रानपुंसकाध्वर्युक्रत्वधीत्यासन्नविलिंगनदीपूर्देशगवाश्वादि ॥ २ । १ । १०४ ॥

पात्र्यशूद्रः अनपुंसकाध्वर्युक्रतुः अधीत्यासन्नः विलिंगनदी विलिंगपुरं विलिंगदेशो वा गवाश्वादिश्च द्वंद्व एकार्थो भवत्यभेदे । येषां भुक्तं पात्रं संस्कारेण शुध्यति ते पात्रमर्हन्तीति । पात्र्याः तच्छूद्रावयवः । तक्षायस्कारम् । कुलालवरुटम् । पात्र्यग्रहणंकिम् ? चंडालमृतपाः । अध्वर्यवो यजुर्वेदविदः । तेषां क्रतुः अध्वर्युक्रतुः यो नपुंसकलिंगो न भवति तदवयवः । अर्काश्वमेधम् । पौंडरीकातिरात्रम् । अधित्यासन्नः । पाठेनाऽविप्रकृष्टः । तदवयवः । पदमधीयानः पदकः । एवं क्रमुकः । पदकक्रमुकं । क्रमकपात्रिकम् । विरुद्धं भिन्नम् लिङ्गं यासां ताः । नद्योऽवयवा यस्य सः । गंगा च शोणश्च गंगाशोणम् । विलिंगपुरावयवः । मथुरा पाटलीपुत्रम् । विलिंगदेशावयवः । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं । गवाश्वादिः । गावाश्वम् । अजैगम् । कुब्जवामनम् । पुत्रपौत्रम् ।

न दधिपयआदिः ॥ २ । १ । १०५ ॥

दधिपय आदिर्द्वंद्व एकार्थो न भवति । दधिपयसी । मधुसर्पिषी । ऋक्सामे । वाङ्मनसे । आद्यवसाने ।

संख्याने । २ । १ । १०६ ।

वृत्तिः-पदार्थानां संख्याने इयत्तापरिच्छेदे द्वंद्व एकार्थो न भवति । दशहस्त्यश्वाः । शतं यूकालिक्षाः । बहवः पाणिपादाः । कति मार्दङ्गिकपाणविकाः । एतावंतो गला गवाश्वाः ।

वाऽन्तिके । २ । १ । १०७ ॥

संख्यानस्यान्तिके समीपे द्वंद एकार्थो वा भवति । उपदशं हस्त्यश्वम् । उपदशा हस्त्यश्वाः ।

सूक्तं पूर्वम् । २ । १ । १०८ ।

समासविधानेषु प्रथमान्तेन निर्दिष्टं पूर्वं प्रयोक्तव्यम् । द्वितीया । कृष्णश्रितः । तृतीया । चतुर्भिः कृतो भागश्चतुर्भागः । शंकुलया खंडः शंकुलाखंडः । राजपुरुषकं बलादौ । राज्ञः पुरुषः राजपुरुषः । राजपुरुषस्य कंबलः राजपुरुषकंबलः । इत्यनुगमः ।

राजदंतादौ । २ । १ । १०९ ।

राजदंतादौ समासगणे अप्राप्तपूर्वनिपातनं पूर्वं निपतति । दन्तानां राजा राजदन्तः । वनस्याग्रे । अग्रेवनम् । पाथादलुक् । जायापती । दंपती । जंपती । जायाशब्दस्य इह पाठाज्जंभावदंभावो वा ।

विशेषणसर्वादिसंख्यं बहुव्रीहौ ॥२।१।११०॥

विशेषणं सर्वादिसंख्यावाची च शब्दरूपं बहुव्रीहौ समासे पूर्वं प्रयोक्तव्यम् । चित्रगुः । कंठे कालो यस्य सः कंठेकालः सर्वादिः । सर्वं शुक्लं यस्य सः सर्वशुक्लः । विश्वमित्रः । संख्यायां त्रिकृष्णाः । पंचरक्तः । सुक्तमित्यनियमेवचनम् ।

क्ताः । २ । १ । १११ ।

क्तप्रत्ययान्तं बहुव्रीहौ पूर्वं प्रयोक्तव्यम् । कृतः कटोऽनेन कृतकटः । कटं कृतमनेन कृतकटः । कृतविश्वः । कृतत्रिकः । कृतप्रियः । बहुवचनं प्रियार्थम् ।

कालाकृतिसुखादिभ्यो वा । २ । १ । ११२ ।

कालवाचिनः आकृतिर्जातिः तद्वाचिनः सुखादिभ्यश्च शब्देभ्यः बहुव्रीहौ क्तान्तं पूर्वं वा प्रयोक्तव्यम् ॥ मासयाता । यातमासा । आकृतिः पलांडुभक्षिती । भक्षितपलांडुः । सुखादिः—सुखयाता । यातसुखाः । दुःखयाता । यातदुःखाः । इत्यादयः ।

प्रहरणात् सप्तमी च २ । १ । ११३ ।

प्रहरणवाचिनः सप्तम्यंतं क्तान्तं च बहुव्रीहौ पूर्वं वा प्रयोक्तव्यम् । दंडःपाणौ यस्य सः दंडपाणिः । पाणिदंडः । वज्रहस्तः । हस्तवज्रः । अस्युद्यतः । उद्यतासिः । मुसलोद्यतः । उद्यतमुसलः ।

गड्वादिभ्यः । २ । १ । ११४ ।

गड्वादिभ्यः सप्तम्यंतं पूर्वं वा प्रयोक्तव्यम् । गडुः कण्ठे यस्य सः गडुकंठः । क्वचिन्न वहेगडुः ।

भार्योढादिषु । २ । १ । ११५ ।

भार्योढ इत्येवमादिषु बहुव्रीहिषु अप्राप्तपूर्वनिपातनं पूर्वं निपतति वा । भार्योढः । ऊढभार्यः । अर्थगतः । गतार्थः । पुत्रजातः । जातपुत्रः । घृतपीतः । पीतघृतः ।

प्रियः । २ । १ । ११६ ।

प्रियशब्दो बहुव्रीहौ पूर्वं प्रयोक्तव्यो वा ॥ प्रियगुडः । गुडप्रियः । प्रियविश्वः । विश्वप्रियः । प्रियद्विः । द्विप्रियः ।

कडारादयः कर्मधारये ॥ २ । १। ११७ ॥

कडारादयः कर्मधारये समासे पूर्वं वा प्रयोक्तव्याः । कडारजैमिनिः । जैमिनिकडारः । गडुलशांडिल्यः । शांडिल्यगडुलः । कर्मधारय इति किम् ? ईषत्कडारः ।

धर्मार्थादिषु द्वंद्वे ॥ २ । १ । ११८ ॥

धर्मार्थादिषु द्वंद्वेष्वप्राप्तपूर्वनिपातनं पूर्वं वा निपातति । धर्मार्थौ । अर्थधर्मौ । कामार्थौ । अर्थकामौ । शब्दार्थौ अर्थशब्दौ । आद्यन्तौ । अन्तआदी ।

लघ्वघ्यजाद्यदल्पाजर्च्यमेकम् ॥ २ । १ । ११९॥

द्वंद्वे समासे लघ्वक्षरं घिसंज्ञमजाद्यन्तमल्पाच् अर्च्यं चैकं पूर्वं प्रयोक्तव्यम् । लघु-कुशकाशम् । तृणकाष्ठम् । घि-अग्निधूमम् । वायुतोयम् । अजाद्यन्तम्-अस्त्रशस्त्रम् । इन्द्रचन्द्रौ । इन्द्राग्नी । अल्पाच्—प्लक्षन्यग्रोधौ । वागग्नी । वागर्थौ । अर्च्यम्—श्रद्धामेधे । मातापितरौ । वधूवरौ । वासुदेवार्जुनौ । स्वर्धे परं परं पूर्वं निपततीति शेषः । एकमिति किम् ? अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे । गुरुरविभास्करतनयाः । रविभास्करतनयगुरवः । एतन्न भवति । भास्करयनतरविगुरुव इति धनपतिरामकेशवा इति । रामशब्दस्योत्तरेण वृत्तस्य पूर्वेण वृत्तिः ।

वर्णभ्रात्रनुपूर्वम् ॥ २ । १ । १२० ॥

वर्णो भ्राता च द्वंद्वे पूर्वः पूर्वं प्रयोक्तव्यः । ब्राह्मणक्षत्रियौ । क्षत्रियवैश्यौ । वैश्यशूद्रौ । ब्राह्मणक्षत्रियविट्छूद्राः । भीमसेनार्जुनौ । युधिष्ठिरभीमसेनार्जुनाः । अनुग्रहणादेकमिति निवृत्तम् ।

भर्त्वेकसंख्याच् ॥ २ । १ । १२१ ॥

भं नक्षत्रं ऋतुश्च एकसंख्या च समसंख्याक्षरमनुपूर्वः पूर्वं प्रयोक्तव्यम् । कृत्तिकारोहिण्यौ । अश्विनिभरणिकृत्तिकाः । मृग-

शिरपुनर्वसू । हेमन्तशिशिरे । हेमन्तशिशिरवसन्ताः । एकसंख्याजिति किम् ? आर्द्रामृगशिरसी । ग्रीष्मवसन्तौ ।

संख्याल्पा समासे । २ । १ । १२२ ।

समासे अल्पा संख्या महत्यास्संख्यायाः पूर्वं प्रयोक्तव्याः । द्वित्राः । द्विशती । त्रिचतुराः । द्विदशाः ॥ त्रयोदश । अशीतिशतम् । समासग्रहणं द्वंद्वनिवृत्यर्थम् ।

न्यग्गोष्यतोऽनंशी[1] योबहुव्रीहेर्ह्रस्वः । २ । १ । १२३ ।

न्युपसर्जनं यो गोशब्दः यश्च ष्यत्प्रत्याहारगृहीतप्रत्ययान्तः तदन्तस्य समासस्य ह्रस्वादेशो भवत्यनंशीयो बहुव्रीहिः न चेदसावंशी समास ईयसोयः ष्यदीकारस्तदन्तश्च बहुव्रीहिर्भवति । चित्रा गावो यस्य सः चित्रगुर्देवदत्तः । पंचभिः गोभिः क्रीतः पंचगुः । खट्वामतिक्रान्तोऽतिखट्वः । प्रिया खट्वा यस्य स प्रियखट्वः । निष्कौशाम्बिः । अतिब्रह्मबंधुः । न्यग्रहणं किम् ? सुगौः । अतिगौः । नक्षत्रमाला । गोष्यद्ग्रहणं किम्? अतिलक्ष्मीः । अतिश्रीः । अतिभूः । अनंशीयो बहुव्रीहेरिति किम् ? अर्धपिप्पली । बहुश्रेयसी । बहुकुमारीकः । बहुब्रह्मबंधुकः । इत्यत्र परत्वात् ह्रस्वादेशात्पूर्वं समासान्ते कृते ष्यदंतता नास्ति ।

अन्तः । २ । १ । १२४ ।

समासस्यान्त इत्यधिकार आपादपरिसमाप्तेः ।

---

१ न्यञ्चतीति न्यक् । गच्छतीति गौः । ष्यत्प्रत्याहारगृहीतप्रत्ययः ष्यत् । गौश्चष्यच्च गोष्यात् न्यक् च तत् गोष्यच्च तस्य न्यग्गोष्यतः । ईयाश्चासौबहुव्रीहिश्च इयोबहुव्रीहिः । अंशी चासौ ईयोबहुव्रीहिश्चांशीयोबहुव्रीहिः । न विद्यते अंशीयोबहुव्रीहिर्यस्य तदनंशीयोबहुव्रीहिः तस्य । ष्यद्ग्रहणं किम् ? अतितंत्रीः । अतिलक्ष्मीः । अतिश्रीः । अतिभूः ।

न नञः । २ । १ । १२५ ।

नञ्पूर्वात् समासादृगाद्यन्ताद् समासान्तो न भवति । न ऋक् अनृक् । न राजा अराजा । न सखा असखा । न पंथा अपंथा अपथमिति पथशब्दस्य यथा कुपथं । नञिति प्रतिपदोक्तसमासप्रतिपत्तिरत्र भवति । न विद्यते धूरस्याधुरं शकटम् । राज्ञामभाव: अराजम् । वर्तते ।

किमः क्षेपे । २ । १ । १२६ ।

क्षेपे यः किम्शब्दः तस्मात्परेभ्यः ऋगादिभ्यस्समासान्तो न भवति । सा किं धूः या तथा गुर्वी । सा किं गौः या न वहति । अन्यत्र कस्य राजा किंराजा । कस्य सखा किंसखा ।

प्राक् टात् स्वतेः पूजायाम् ॥ २ । १ । १२७ ॥

पूजायां यौ सु अति इति ताभ्यां परे यो ऋगादयस्तदन्तात्समासात् बहुव्रीहेः काष्टेट इति ट प्रत्ययात्प्राक् यः समासन्तो वक्ष्यते स न भवति । शोभना धूः सुधूः शकटम् । अतिधूः । सुराजा । अतिराजा । प्राक्टादिति किम् ? अत्यंगुलं काष्ठम् । स्वंगुलम् । अत्यंगुली । स्वंगुली यष्टिः । अन्यत्र धुरमतिक्रान्तः अतिधुरः ।

बहोर्डे ॥ २ । १ । १२८ ॥

डः प्रसंगो यत्र ततो बह्वन्तात् समासात् समासान्तो डः कच्च न भवति । आसन्नबहवः । उपबहवः । बहोरिति किम् ? द्वित्राः । उपदशाः । प्रमाणीसंख्याड्डु इति डो भवति । ड इति किम् ? प्रियबहुकः ।

कज् नाम्नि ॥ २ । १ । १२९ ॥

नाम्नि विषये कज् समासान्तो न भवति । बहुदेवदत्तः । विश्वयशाः । पद्मश्रीः ।

ईयसः ॥ २ । १ । १३० ॥

ईयसांतात्समासात् कज् न भवति । बहुश्रेयान् । बहुप्रेयान् । विद्यमानप्रेयसी ।

सहात्तुल्ये ॥ २ ॥ १ । १३१ ॥

सहशब्दादेः बहुव्रीहेः कज् न भवति तुल्ययोगे वर्तमाने । पदार्थस्य वृत्यर्थेन सह क्रियादिना साधारणेन सबन्धे । सपुत्र आगतः । सपुत्रः स्थूलः । अन्यत्र सहविद्यमानानि लोमानि यस्य सः सलोमकः । सपक्षकः ।

भ्रातुस्स्तुतौ ॥ २ । १ । १३२ ॥

भ्रात्रन्तात्समासात् कज् न भवति स्तुतौ । भ्रातुः समासार्थस्य वा प्रशंसायाम् । सुभ्राता । बहुभ्राता । अन्यत्र दुर्भ्रातृकः ।

नाडीतन्त्र्यास्स्वाङ्गे ॥ २ । १ । १३३ ॥

स्वाङ्गे यौ नाडीतंत्रीशब्दौ तदन्तात् समासात् कज् न भवति । बहुनाडिः कायः । बहुतंत्री[१]: ग्रीवाः । स्वांग इति किम्? बहुनाडीकः स्तंभः । बहुतंत्रीका वीणा ।

निष्प्रवाणिः । २ । १ । १३४ ।

निष्प्रवाणिरिति कजभावो निपात्यते । प्रवाणीतंतुवायशलाका सा निर्गता अस्मादिति निष्प्रवाणिः पटः । कंबलश्च निष्पन्नो नैव इति वार्यः ।

इज्युद्धे । २ । १ । १३५ ।

युद्धे यः समासो विहितः तस्मादिज् समासान्तो भवति । केशा[२]केशि । दंडादंडि । ज इत् ।

---

१ नात्र ह्रस्वं भवति स्त्रीप्रत्यान्तत्वाभावात् ।

२ केशेषु केशेषु प्रवृत्तं युद्धमिति केशाकेशि ।

द्विदण्ड्यादिः । २ । १ । १३६ ।

द्विदंडी इत्येवमादयः समासाः इजन्ताः साधवो भवन्ति द्वौ दंडावस्मिन्प्रहरणे द्विदंडि । द्विमुसलि । उभादंडि । उभयादंडि । प्रहरति ।

खोऽषडक्षाशितंग्वलंकर्मालं पुरुषात् ।२।१।१३७

अषडक्षादिभ्यः खः समासान्तो भवति । अद्रष्टयानि षडक्षीणयस्याषड्क्षीणो मंत्रादिः । आशिता गावो यस्मिन् तदाशितंगवीनमरण्यम् । निपातनान्मम् । अलंकर्मणी । अलंकर्मीणः । अलंपुरुषीणः ।

वाऽञ्चोऽदिक् स्त्रियाम् । २ । १ । १३८ ॥

अंचत्यन्तात् समासात् खप्रत्ययो वा भवति । न चेत् स दिक् स्त्रियां वर्तते । प्राक् प्राचीनः । प्राचीना शाला । प्राक् । प्राचीनं उदक् । उदीचीनम् । रमणीयम् । दिश्यपि श्लुगन्तम् नपुंसकम् । सम्यक् । समीचीनम् । रमणीयम् । अन्यत्र । प्राची । उदीची । दिक् ।

ऋक्पूः पथ्यपोऽत् । २ । १ । १३९ ।

ऋगाद्यन्तात् समासाकारस्समासान्तो भवति । अर्धर्चः । उपर्चम् । श्रीपुरम् । उपपुरम् । जलपथः । उत्पथः द्विर्गता आपोऽस्मिन् द्वीपम् । समीपम् । बह्वपम् । तटाकम् ।

धुरोऽनक्षस्य । २ । १ । १४० ।

या धूरक्षसंबंधिनी न भवति तदन्तादत्समासान्तो भवति । राजधुरा । महाधुरं शकटम् । उपधुरम् । अनक्षस्येति किम् ? अक्षधूः । दृढधूरक्षः ।

संख्योदक्पाण्डुकृष्णाद्भूमेः । २ । १ । १४१ ।

संख्यावाचिन उदक्पाण्डुकृष्णेभ्यश्च परो यो भूमिशब्द-

स्तदन्तात् समासान्तो भवति ॥ द्वयोर्भूम्योस्समाहारः द्विभूमम् । द्विभूमः । त्रिभूमम् । त्रिभूमः प्रासादः । उदीचीभूमिः । उदग्भूमम् । उदग्भूमो देशः ।

उपसर्गादध्वनः । २ । १ । १४२ ।

उपसर्गात् परादध्वनः अत् समासान्तो भवति ॥ प्रगतमध्वानं प्राध्वं शकटम् । अध्वानमुपक्रान्तः उपाध्वो रथः ।

प्रत्यन्ववात् सामलोम्नः । २ । १ । १४३ ।

प्रत्यादिभ्यः परो यः सामन्लोमन्शब्दौ तदन्तादत् समासान्तो भवति । प्रतिगतं साम प्रतिसामम् । एवमनुसामम् । प्रतिलोमम् । अनुलोमम् । अवलोममित्यादि । अव्ययीभावे तु परत्वाद्विकल्पः ।

प्रतेरुरसस्सप्तम्याः । २ । १ । १४४ ।

प्रतिशब्दात् परो यः उरश्शब्दः सप्तम्यन्तः तदन्तादत्समासान्तो भवति । प्रत्युरसं वर्तते । उरसि वतत इत्यर्थः । उरसि प्रतिष्ठितं प्रत्युरसम् ।

समवान्धात्तमसः । २ । १ । १४५ ।

समादिभ्यः परो यः तमश्शब्दस्तदन्तादत् समासान्तो भवति । संततंतमः संततं तमसो संततं तमोऽस्मिन्निति वा संतमसम् । अवतमसम् । अन्धतमसम् । अंधं करोतीत्यन्धम् ।

तप्तान्ववाद्रहसः । २ । १ । १४६ ।

तप्तादिपूर्वाद्रहसः अत् समासान्तो भवति । तप्तमय इवानधिगम्यं रहः । तप्तरहसम् । तप्तं रहो ऽस्येति वा तप्तरहसम् । एवमनुरहसं अवरहसमित्यादि ।

ब्रह्महस्तिराजपल्याद्वर्चसः । २ । १ । १४७ ।

ब्रह्मादिभ्यः परो यः वर्चस्शब्दः तदन्तादत्समासान्तो भवति ॥ ब्रह्मवर्चसम् । हस्तिवर्चसम् । राजवर्चसम् । पल्यवर्चसम् । राजवर्चस्वीति समासान्तस्य क्वचिदनित्यत्वात्तच्च जीविकोपनिषदिवे इति निर्देशाद्विज्ञायते ।

अक्ष्णोऽप्राण्यङ्गे । २ । १ । १४८ ।

अक्षशब्दान्तादत् समासान्तो भवति । न चेत् सोऽक्षशब्दः प्राण्यङ्गे वर्तते । पुष्करमिव अक्षि यस्य तत् पुष्कराक्षम् । गवाक्षम् । नहिषाक्षो गुगुलः अन्यत्र अजाक्षी ।

संकटाभ्याम् ॥ २ । १ । १४९ ॥

संकट इत्येतत्पूर्वादक्षिशब्दादत् समासान्तो भवति । समक्षम् । कटाक्षम् । कटाक्षः । प्राण्यंगर्थो योगः ।

प्रत्यनोरव्ययीभावात् । २ । १ । १५० ।

प्रति अनु इत्येतत्पूर्वो योऽक्षिशब्दस्तदन्तादव्ययीभावादत् समासान्तो भवति । प्रत्यक्षम् । अन्वक्षम् । वर्तते ।

शरदादेः । २ । १ । १५१ ।

शरदाद्यन्तादव्ययीभावादत् समासान्तो भवति । उपशरदम् । प्रतिशरदम् । उपत्यदम् । प्रतित्यदम्

जराया ङश्च । २ । १५२ ।

जराशब्दान्तादव्ययीभावादत् समासान्तो भवति । ङसित्ययं चादेशः । उपजरसम् । प्रतिजरसम् । ङेत् ।

अनः । २ । १ । १५२ ।

अनन्तादव्ययीभावादत् समासान्तो भवति । प्रतिराजम् । उपतक्षम् । अध्यध्वम् । अध्यात्मम् ।

नपुंसकाद्वा । २ । १ । १५४ ।

यदन्नन्तं नपुंसकं तदन्तादव्ययीभावादत् समासान्तो भवति वा । प्रतिकर्म । प्रतिकर्मम् । प्रतिसाम । प्रतिसामम् । अनुलोम । अनुलोमम् । वर्तते ।

गिरिनदीपौर्णमास्याग्रहायणीजयः । २ । १ । १५५ ॥

गिर्याद्यन्ताज्जयन्ताच्चाव्ययीभावादत् वा भवति ॥ गिरेरन्तः अन्तगिरम् । अन्तर्गिरी । नद्याः समीपमुपनदम् । उपनदी । उपपौर्णमासम् । उपपौर्णमासी । उपाग्रहायणम् । उपाग्रहायणी । उपदृषदम् । उपदृषत् ।

संख्याया नदीगोदावर्याः । २ । १ । १५६ ।

संख्यावाचिनः परौ यौ नदीगोदावरीशब्दौ तदन्तादव्ययीभावादत् समासान्तो नित्यं भवति । पंचनदम् । सप्तनदम् । द्विगोदावरम् । सप्तगोदावरम् । नदीग्रहणं नित्यार्थम् ।

सरजसोपशुनाऽनुगवम् । २ । १ । १५७ ।

सरजसादयोऽव्ययीभावा अदंता निपात्यन्ते ॥ सह रजसा सरजसम् अभ्यवहरति । शाकल्येऽव्ययीभावः । शुनः समीपमुपशुनं तिष्ठति । निपातनादुत् । गवामन्वयातमनुगवं यानम् । दैर्घ्येऽनुरित्यव्ययीभावः । अन्यत्र गवां पश्चादनुगु यानम् ।

जातमहद्वृद्धादुक्ष्णः कर्मधारयात् । २ । १ । १५८ ।

जातादिभ्यः परो यः उक्षन्शब्दः तदन्तात् कर्मधारयादट् भवति । जात उक्षः जातोक्षः । महोक्षः । अन्यत्र जातस्योक्षा जातोक्षा ।

स्त्रियाः पुंसो द्वंद्वाच्च । १ । २ । १५९ ।

स्त्रीशब्दात् परो यः पुंस इति शब्दः तदन्तात् द्वंद्वात् कर्मधारयाच्चात् समासान्तो भवति । स्त्री च पुमांश्च स्त्री-

पुंसम्, स्त्रीपुंसौ, स्त्रीपुन्साः । विस्मयंगताः । स्त्रीभूत्वा पुमान्जातः स्त्रीपुन्सः शिखंडिः ।

धेन्वनडुहर्ग्यजुषाहोरात्रनक्तंदिवरात्रिंदिवाहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम् ॥ १ । २ । १६० ॥

(१) मङ्गीकुर्वन्तो—पा॰ २ पु॰ ।

एके तु वह्नित्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकवत् तृणादिकं तृणत्वाद्यवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकवान् वह्निरित्यादिकं प्रत्ययं कल्पयन्तस्तृणादिषु सङ्कीर्णां जातिं वह्निवृत्तीनि च वैजात्यानि[1] कल्पयन्ति । केचित्तु कार्यता कारणता च सर्वत्र निरवच्छिन्नैव तन्तुः पटकारणमित्यादिको हि लोकानामनुभवो न तु तन्तुत्वादिनापि द्रव्यत्वेन न तन्तोः पटकारत्वं किं तु तन्तुत्वेनेत्यादिकाः प्रतीतयस्तु केवलतान्त्रिकाणामेवेत्याहुः । केन रूपेणेति । न हि तेषां शुद्धदशरथत्वादिनोपस्थितिः संभाव्यतापि तथाऽननुगमात् नापि प्रमेयत्वादिना दशरथत्वादिप्रकारकोपस्थितिः ततः प्रमेयवानित्याकारकशाब्दबोधस्यैव भाव्यत्वादिति भावः । विभावनीयमिति । शुद्धदशरथत्वादिनैव तदुपस्थितिरितरथा तथा शाब्दबोधानुपपत्तेः । न च कारणाबाधः प्रमेयवानित्याकरकसंस्काराढेव प्रमेयत्वांशे उद्बोधकरहितात् तथा स्मरणसम्भवात् । तत्प्रकारकस्मृतिं प्रति तत्प्रकारकानुभवत्वेनैव हेतुत्वं न तु निरवच्छिन्नतत्प्रकारताकस्मृतिं प्रति तादृशानुभवत्वादिनापि गौरवात् मानाभावाच्च । अपि च प्रमेयमभाववदित्याकारकज्ञानात्संसर्गविधया शुद्धदशरथत्वादिस्वरूपप्रतियोगित्वलक्षणसम्बन्धविषयकज्ञानलक्षणाप्रत्यासत्तेः शुद्धदशरथत्वादिप्रकारको मानसानुभवोऽपि सुलभः । एतेनान्वयव्यतिरेकाभ्यां शुद्धतत्प्रकारकस्मृतितादृशानुभवत्वादिना हेतुत्वेऽपि न क्षतिः । वस्तुतः तेषां शुद्ध-

(१) वह्निनिष्ठवैजात्यानि—पा॰ २ ।

दशरथत्वादिना शाब्दधीरेव न भवति । परं तु दशरथादिपदवाच्यत्वादिनैव शाब्दबोधः । एवं च लक्षणया दशरथादिपदवाच्यत्वप्रकारकं वाच्यत्वसम्बन्धेन दशरथादिपदप्रकारकं वा स्मरणमेवापेक्षितं तच्च दशरथादिपदवाच्यत्ववति दशरथादिपदशक्यसम्बन्धप्रकारकाद्वा वाच्यत्वसंसर्गेण दशरथादिपदवृत्तिशक्यसम्बन्धसंसर्गेण दशरथादिपदप्रकारकाद्वा मानसबोधादेवोत्पत्स्यत इति युक्तमुत्पश्यामः ॥

७५।१। न गुण इति। न गुणपदार्थ इत्यर्थः । गुणादिष्विति गुणपदार्थतया उभयाभ्युपेतेष्वित्यादि । तद्वत्तेति । एकरूपमित्याद्याकारकसंख्यावत्ताप्रत्ययादित्यर्थः । एकेति । एकस्मिन्नर्थे द्वयोः समवाय इत्यर्थः । यच्च संख्यायाः समवायस्तच्च गुणादेरपि समवायोऽस्तीति तेन सम्बन्धेन प्रतीतेः प्रमात्वमेवेति भावः । ननु महारजनरक्तपटादौ लौहित्यप्रतीतीनां समवायसमवायिसंयोगात्मकविलक्षणसम्बन्धविषयकत्वेऽपि अविलक्षणप्रकारकत्वादविलक्षणत्वं तथेहापि भवीष्यतीत्यत आह। घटत्वादौ चेति सम्प्रदायः । वस्तुतस्त्वविलक्षणाया इत्यस्याविलक्षणसम्बन्धविषयिण्या इत्यर्थः। तत्त्वं चानुभवसिद्धमिति भावः। महारजनरक्तपटादौ च विलक्षणसम्बन्धविषयकत्वमनुभवसिद्धम् यच्च चाविलक्षणसम्बन्धविषयकत्वानुभवस्तच पटादावपि लौहित्यादिप्रतीतेः । समवायसम्बन्धविषयकत्वमिष्यत एव परं तु बाधकबलात्तस्या भ्रमत्वं कल्प्यते। न चैवं तत्राबाधितप्रमाण्यानुभवो न स्यात् परम्परासम्बन्धविषयीकरणेऽपि तदुपपत्तेरिति

दक् । द्वित्वादीति । द्वयं घटत्वमित्यादीत्यर्थः । ननु समवाय-वदेकार्थसमवायेनापि नैकस्मिन् द्वित्वाकं पर्याप्नोतीति न तथा प्रतीतिरित्यत आह । रूपत्वादौ चेति । तत्सम्भव इति एकार्थसमवायसम्भव इत्यर्थः । यत्तु तत्राप्येकार्थसमवेतसमवा-यात् संख्याप्रत्यय इति तन्न उक्तोत्तरत्वात् ॥

७६।१। गन्धादिमत्तेति । अथ गन्धादिमत्ता गन्धादिसम-वायो गन्धादिकं वा प्रष्टव्यः प्रथमं चेन्न तथा प्रतीतेरदृष्टत्वात् चरमं चेत् न तत्र गन्धादिसमवायसत्त्वेऽपि गन्धादेरभावादिति। अथ तदीयसम्बन्धवत्त्वं तद्वत्त्वनियतमतो गन्धादिमत्ताप्रतीतेराप-त्तिरिति चेन्न गगनीयसंयोगे व्यभिचारारात् । वृत्तिनियामक-त्वविशेषणान्नैवमिति चेन्न घटवृत्तिताऽनियामककपालसंयोगवत् कपालस्य स्वाभाववत्त्वेन व्यभिचारात् । उक्तसंयोगस्यापि च घटादि[1]वृत्तिनियामकत्वात् अप्रयोजकत्वाच्च यच्च तद्वृत्तिता-नियामकः संसर्गस्तत्र तद्वत्तानियम इति चेदनुमतमेतत् । न चैतावता आयाति तोयादेर्गन्धादिमत्ता तदेतरसिद्धेःसन्नपि पयसि गन्धसमवायः कथं तद्वृत्तिनियामक इति चेदनुभवं पृच्छ यद्व-सौ समवायेन पयसि गन्धो नास्तीत्याकारको जायतेऽनुभूयते चेति चेत् । अत्राहुः जलेस्नेहस्य समवायो न गन्धस्येत्यादि-प्रतीतेरेव समवायस्य नानात्वं तत्रैव च ग्रन्थाकृतस्तात्पर्यमिति। ननु समवायस्य नानात्वे कथमनुगता समवेताकारधीर्गन्धादि-ष्वित्यत आह । समवायत्वमिति । तथा च तदनुगमादनुगता-

(१) पटादि—पा० २ पु० । एवं पूर्वस्मिन्नपि ।

धीरीति भावः । अत्र चानुगतमतेरनुगतविषयनियम्यतया समवायस्यैकत्वे सिद्धे जले न गन्धसमवाय इत्यादिप्रतीतेर्विशिष्टाभावो विषय इति वदन्ति ॥

७६।४। वैशिष्ट्यमपीति । भूतलादावभावसम्बन्ध इत्यर्थः । निमित्तेति । संसर्गविधया विषयतयेत्यर्थः । तथेति अभाववत्ताप्रत्ययविषयेत्यर्थः । तत्रापि रूपादिमत्ताप्रतीतावपि । सुवचत्वादिति । अथास्तु समवायस्याप्युच्छेद इति चेन्न विलक्षणस्वरूपसम्बन्धांशे ऽविलक्षणानां रूपादिघटाभावादिमत्त्वप्रत्ययानामनुपपत्तेः । अयं घट इत्यादेरिवाचास्य समवाय इति प्रतीतेरानुभाविकत्वाच्च ॥

७८।१। ज्ञानादीत्यादिपदादिच्छादिपरिग्रहः । विषयतादिपदाद्विषयित्वप्रतियोगित्वानुयोगित्वावधित्वावधिमत्त्वाधारत्वाधेयत्वदिक्कालनिरूपितविशेषणत्वविशेष्यत्वावच्छेदकत्वावच्छेद्यत्वादयः परिगृहीताः व्याख्याता इति । पटादौ ज्ञानादिमत्ताबुद्धिनिमित्ततया तेषां सिद्धेरिति भावः । परे तु सम्बन्धांशे ऽविलक्षणरूपादिमत्ताप्रत्ययमात्रस्य समवाय इत्यादिकं प्रत्ययमुपलभन्तः समवायिविशेषणतादिकं सकलमेवातिरिक्ततया मन्यन्ते । केचित्तु कार्यकारणभावावच्छेदकसम्बन्धविधया समवायिविशेषणत्वविषयित्वादिकमतिरिक्तं सिद्ध्यति अन्यथा सम्बन्धाननुगमादननुगतकार्यकारणभावापत्तेः । अत एव ग्रन्थकृतापि निमित्ततयेत्युक्तम् । तदर्थश्च हेतुतयेति । यथाश्रुत एवेत्यर्थः । न्यायचतुर्थाध्याये शून्यतोपादानकत्वनिराकरणप्रकरणे पूर्वपक्षे उक्तम् ॥

७८।२। नानुपमृद्येति । बीजादिकं महापटादि चानुपमृद्याङ्कुरादेः खण्डपटादेश्च प्रादुर्भावस्य जन्मनोऽभाव इत्यर्थः । एतावता जनकत्वं सिध्यदस्तु ति बाधके उपादानकारणत्वमेव सिध्यतीति तेषामभिमानः । इदमुपलक्षणं तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेरित्यपि न्यायचतुर्थाध्यायसूत्रं तेषां रागद्वेषमोहानां रागमोहयोर्द्वेषमोहयोर्वा मध्ये मोहः पापीयान् बलवद्द्वेषविषयः अमूढस्य रागद्वेषानुत्पत्तेरिति तदर्थः । अस्मन्मते कलञ्जभक्षणं पापाजनकत्वाभाववदित्येवार्थः । प्रकृत्यर्थे विध्यर्थस्य पापजनकत्वस्य नञाऽभावबोधनादतो गुरूणामित्युक्तम् । विषयः कारणम् तन्मते कलञ्जभक्षणाभावेन निषेधापूर्वजननात् । कार्यं कृतिसाध्यं तच्च तन्मते विध्यर्थः । एतादृश इति । प्रकृत्यर्थान्वितनञर्थविभक्त्यर्थयोरन्वय इत्यर्थः । स्थलविशेषे तादृशप्रयोगस्थले ।

७९।२। पदार्थान्तरमिति । न चान्यथासिद्धनिरूपकनियतपूर्ववर्त्तितावच्छेदकधर्मवत्त्वेनैव तथा व्यवहारोपपत्तेरतिरिक्तकारणत्वे मानाभावः । अन्यथासिद्धे दुर्वचत्वात् नियमस्य चाननुगतत्वेनानुगतप्रत्ययानुपपत्तेश्च । मम तु कारणत्वत्वेनाखण्डोपाधिना तथा प्रत्ययात् । एतेनान्यथासिद्ध्यनिरूपकधर्मावच्छिन्नस्य नियतोत्तरवर्तितावच्छेदकधर्मत्वं कार्यत्वमित्यपास्तम् । कार्यभेदादिति । नात एककार्यकारणस्य सकलकार्यकारणत्वप्रसङ्गः कार्यभेदश्च कार्यतावच्छेदकावच्छिन्नभेदः कार्यतावच्छेदकभेद इति फलितार्थः । तेन घटव्यक्तीनां भेदेऽपि घटत्वस्य कार्यतावच्छेदकस्यैकत्वात् तासां कारणत्वमेकमेवेति मन्तव्यम् । अव-

न्त्रभ्रमनिवृत्तेर्ज्ञानं विनापि भावात्सादित्त्वाच्च तन्निवारणं, प्रागभावे तद्वारणाय भावत्वे इत्युक्तं अविद्यासंबंधादौ तद्वारणाय साक्षादिति तत्संबंधादेरज्ञाननिवृत्त्यैव निवृत्त्युपपत्तेर्न साक्षात्तन्निवर्त्यत्वमतस्तद्वारणं आत्मनि तद्वारणाय ज्ञाननिवर्त्यमित्युक्तं । नन्वज्ञानं न निवर्तते अनादित्वे सति भावत्वाद्ब्रह्मवदिति चेन्न । "भूयश्चांते विश्वमायानिवृत्तिः" इत्यादिश्रुत्या,

विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते ।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥

इत्यादिस्मृत्या च बाधात् पीलुपाकत्रादिमते पार्थिवपरमाणुगतरूपादौ व्यभिचाराच्च ब्रह्माज्ञानं तज्ज्ञाननिवर्त्यमज्ञानत्वात् शुक्तिज्ञाननिवर्त्यतदज्ञानवदित्यादिना सत्प्रतिपक्षत्वात्, एकमेवाद्वितीयं नेह नानाऽस्ति किञ्च न उदरमंतरं कुरुतेऽथ तस्य भयं भवतीत्याद्येकत्वपरश्रुतिविरोधाच्च-नापि प्रमाणाभावः न जानामीत्यनुभवस्य तत्र मानत्वात् नचायमन्यविषय इति वाच्यं तदनिरूपणात् तथाहि,-किं तद्विषयं मिथ्याज्ञानं ज्ञानात्यंताभावो वा तद्ध्वंसो वा वृत्तिज्ञानप्रागभावो वा ? नाद्यः मिथ्याज्ञानस्य ज्ञानत्वाधिकरणत्वात् अज्ञानस्य तत्त्वाभावात् न द्वितीयः ज्ञानात्यंताभावस्यात्मन्यसंभवात् अज्ञानस्य च तद्धर्मित्वात् न तृतीयः ज्ञानध्वंसस्य तत्संस्कारातिरेकेणाभावात् संस्कारस्यातींद्रियत्वाच्च न तद्विषयत्वं नापि चतुर्थः प्रतियोगिज्ञानाज्ञानाभ्यां प्रागभावज्ञानायोगात् यद्विषयेऽपि कदापि ज्ञानं न भविष्यति तत्रापि न जानामीत्यनुभवाच्च; तस्मान्न जानामीत्यनुभवस्तथाविधाज्ञाने प्रमाणं अनुमानमपि तत्र मानमस्ति संशयविपर्यासान्यतरविषयविषयकं प्रत्यक्षज्ञानं स्वविषयावरणपूर्वकं स्वनिवर्त्यपूर्वकं वा अप्रकाशितार्थप्रकाशकत्वात् अंधकारस्थघटादिसंशयनिवर्तकप्रदीपप्रभावत् धर्माधर्मादिगोचरशाब्दज्ञानस्य सुखादिसाक्षात्कारस्य च पक्षबहिर्भावात् नांशतो बाधापत्तिः न च वृत्तिज्ञानप्रागभावेनार्थांतरं तस्याभावत्वेन नानात्वेन च गौरवादनुमानविषयत्वायोगात्, अत एव "समवायसाधकं ईश्वरसाधकं चानुमानं लाघवादेकमेव समवायं ईश्वरं च साधयतीति" परसिद्धांतः अत एव न भ्रांतिज्ञानेन तत्संस्कारेण वाऽर्थांतरं लाघवसहकृतानुमानेन एकस्य भावरूपस्य तस्य सिद्धेः न च द्वितीयसाध्ये इच्छाप्रागभावेनार्थांतरता तत्र ज्ञानस्य प्रकाशकत्वेनानिवर्त्तकत्वात् प्रकाशकत्वेन तन्निवर्त्यस्यैव इह साध्यस्य विवक्षितत्वात् संशयविपर्यासान्यतरविषयविषयकत्वे सति तदन्यतरानिवृत्तौ निरपेक्षहेतुत्वं अप्रकाशितार्थ-

प्रकाशकत्वेन विवक्षितं । न च प्रदीपप्रभाया संशयादिनिवृत्तौ तज्जन्य-प्रत्यक्षज्ञानसापेक्षत्वाद् दृष्टांते साधनवैकल्यमिति वाच्यं तस्यास्संशयादि-निवृत्तौ ज्ञानप्रकाशसापेक्षत्वेऽपि सजातीयबाह्यप्रकाशानपेक्षत्वात् निर-पेक्षपदेन सजातीयप्रकाशानिरपेक्षत्वस्य विवक्षितत्वात्। न च धारावाहि-कद्वितीयादिज्ञाने व्यभिचारः तत्रैकज्ञानत्वाभ्युपगमात् अत एव न द्विती-यादिप्रभायां व्यभिचारः तत्राप्येतन्न्यायेन स्वविरोधिप्रभापर्यंतस्थायित्वा-भ्युपगमात् मंदप्रभानंतरभाविप्रौढप्रभायाः स्वविषयकेशरेखादिसूक्ष्मपदा-र्थावरणभंजकत्वात् अतिप्रौढप्रभानंतरभाविन्याश्च मंदप्रभायाः स्वविष-यावरणपूर्वकत्वाभावेऽपि तन्निवृत्तिस्वरूपयोग्यत्वाच्च न व्यभिचारः तदेवं लाघवसहकृतानुमानमनाद्येकभावरूपाज्ञानलक्षणावरणे प्रमाणं, तथा मिथ्यार्थतज्ज्ञानलक्षणाध्यासानुपपत्तिरपि तत्र मानं, तथाहि—अस्तिताव-च्छुक्तौ रजतज्ञानाद्रजतार्थिप्रवृत्तिः इदं रजतमितिसामानाधिकरण्यव्यपदेश-श्चेति सर्वजनसिद्धं तद्रजतज्ञानं तु नेदं रजतमितिज्ञानेन तद्विषयबाधात् मिथ्या; तन्मिथ्यात्वं च स्वरूपतस्तद्बाधाभावात् मिथ्यार्थविषयत्वेनैव अर्थस्य च मिथ्यात्वं स्वाधिष्ठाने पारमार्थिकत्वावच्छिन्नात्यंताभावप्रतियोगि-त्वेनैव तथा च तदुभयाध्यासस्याज्ञानं विनाऽनुपपत्त्या तत्कारणाज्ञानसि-द्धिः । न च मिथ्यार्थतदवभासयोरात्मतत्वज्ञानाभावाभ्यामेवोपादाननिमि-त्तकारणाभ्यामुपपत्तेस्तत्कारणतया नाज्ञानसिद्धिरिति वाच्यं आत्मनो-ऽपरिणामित्वेनानुपादानत्वात् अन्यथाऽध्यासस्यापि सत्यत्वापत्तेः दोषा-घटितभ्रांतिज्ञानपुष्कलकारणे सति तत्वज्ञानाभावविलंबात् तद्विलंबाभावेन तस्य तत्कारणत्वायोगाच्च; अतो मिथ्यार्थतदवभासान्यथानुपपत्तिस्तदुपा-दानमिथ्याज्ञाने प्रमाणं तच्च अज्ञानं तत्तज्जडावच्छिन्नचैतन्यावरणतत्तद्गत-विक्षेपहेतुत्वात्ततज्जडावच्छिन्नचैतन्याविषयमेव न तु शुक्त्यादिविषयं प्रमा-णवैकल्यादेव तदग्रहणसिद्धौ तत्रावरणाभावात् तदेवं प्रत्यक्षानुमानार्थापत्त-यस्तत्तच्चैतन्यविषयाज्ञाने प्रमाणं। शुद्धचैतन्यविषयमूलाज्ञाने तु प्रयुज्यते—ब्रह्मसाक्षात्कारः अनादिभावनिवर्तकः भ्रमोपादाननिवर्तको वा तत्त्वसाक्षा-त्कारत्वात् शुक्त्यपरोक्षज्ञानवदिति । नन्वनुमानादिप्रमाणेन मूलाज्ञाना-वगमेपि न मायासिद्धिः मायाविद्ययोर्लोके प्रसिद्धभेदत्वात् न हि मिथ्या-श्रये पुरुषे मंत्रौषधादिना मायामयहस्त्यश्वरथादिनिर्मातरीव मायावि-शब्दं प्रयुंजते ततश्च प्रमाणाभावान्न मूलमायासिद्धिरिति चेन्न लोकेऽपि मायाविद्ययोर्भेदासिद्धेः तथाहि न तावल्लक्षणतो लोके तयोर्भेदः अनाद्यनि-

वचनीयत्वस्य विपर्ययोपादानत्वस्य च लक्षणस्य मायाविद्ययोरविशेषात् । ननु मंत्रौषधादि सत्यवस्त्वेव माया नानिर्वचनीयेति चेन्न तत्रापि शुक्तिरूप्याद्यध्यासोपादानवत् अनाद्यनुगतस्यानिर्वचनीयाज्ञानस्यैव लाघवेनोपादानत्वकल्पनात् अन्यथा मंत्राद्युपादानत्वेन मायाविनिर्मितहस्त्यादेरपि सत्यत्वापत्तेः मंत्राद्यन्वयव्यतिरेकानुविधानस्य च काचाद्यन्वयाद्यनुविधानवत् निमित्तकारणविषयतयाऽप्युपपत्तेः नापि व्यवहारभेदाद्भेदः आवरणविक्षेपोभयशक्तिविशिष्टायां एकस्यामेव शक्तौ आवरणशक्तिप्राधान्यविवक्षया अविद्याविक्षेपशक्तिप्राधान्याविवक्षया मायेतिव्यवहारभेदोपपत्तेः । केचित्तु माया परमेश्वरनिष्ठा वियदादिप्रपंचहेतुः अविद्या जीवनिष्ठा स्वप्नरूप्यादिभ्रमहेतुः अतएवाज्ञो जीवः परमेश्वरस्तु मायावीति व्यपदिश्यते ब्रह्मसाक्षात्कारेण च जीवगताज्ञानं निवर्तते विभेदजनकेऽज्ञाने इत्याद्युक्तेः न माया निवर्तते ' मामेव ये प्रपद्यंते मायामेतां तरंति ते " इति मायायाः सेतुवत् तरत्व्यत्वमात्रोक्तेः अतएवैकमुक्तावप्यन्येषां प्रपंचोपलंभः वियदादिप्रपंचोपादानमायाया अनिवृत्तेः, नचैवं मुक्तस्यापि प्रपंचोपलंभापत्तिः प्रपंचदर्शनहेत्वविद्याया ऽ विच्छेदात्; तस्मादस्ति मायाविद्ययोर्भेद इत्याहुः, तन्न मायाया सत्यत्वे अद्वैतहानात् मिथ्यात्वे च अज्ञानरूपत्त्वाज्ज्ञाननिवर्त्यत्वसंभवेन नोक्तदोषः उदाहृतस्मृतावपि तरणं विनाश एव तरति ब्रह्महत्यामित्यादौ निवृत्तौ तच्छब्दप्रयोगात् अन्यथा "भूयश्चांते विश्वमायानिवृत्तिः" इत्यादिश्रुतिविरोधात् तस्मान्मूलाज्ञानस्यैव मायात्वमिति सिद्धं । नन्वस्तु मूलाज्ञानं माया तथापि न तदैक्यसिद्धिः इंद्रो मायाभिरितिबहुवचनश्रुतिविरोधेन लाघवानुगृहीतस्याप्यनुमानस्य मायैकत्वे प्रमाणत्वायोगादिति चेन्न एकत्वेऽपि वह्नेर्दाहप्रकाशनादिशक्तिभेदवत् मायैकत्वेपि प्रपंचवैचित्र्यदर्शनेन तदनुकूलनानांगीकृतमायाशक्तिविषयतया बहुवचनोपपत्तेः "अजामेकां लोहितशुक्लकृष्णां इत्यादिश्रुत्यनुसारेण मायागतगुणभेदविषयतया वा तदुपपत्तेः मायां तु प्रकृतिं विद्यान्मायामेतां तरंति त इत्याद्येकवचनश्रुतिस्मृतिविरोधेन बहुवचनश्रुतेः मुख्यार्थत्यागे दोषाभावाच्च, किंच किं मायाभिरितिबहुवचनान्मायाभेदोऽभिप्रेतः मायाविद्याभेदो वा ? नाद्यः उक्तैकवचनश्रुतिस्मृतिविरोधात्, न द्वितीयः "तरत्यविद्यां मायां योगी" इत्यत्र मायाविद्याशब्दयोस्सामानाधिकरण्येन ज्ञाननिवर्त्यत्वनिर्देशेन तयोर्भेदाभावात् । ननु न प्रमाणबहुत्वमात्रान्मायैकत्वसिद्धिः केनापि बलवता बहूनां बाधदर्शनादिति चेन्न, लाघवानुग्रहात् एकत्वश्रुत्यादीनामेव

प्राबल्यात्। ननूक्तलक्षणे प्रमाणाभ्यामेकाज्ञानसिद्धावपि न तदुपादानकत्वं शुक्तिरजतादेरुपपद्यते तत्र मानाभावादिति चेन्न, रजताद्यध्यासः साक्षाद्विद्योपादानं अन्यानुपादानत्वे सति सोपादानत्वादाकाशवदित्यनुमानात् मायां तु प्रकृतिं विद्यादित्यादिश्रुत्या वियदादेरविद्योपादानत्वावगमान्न साधनवैकल्यं, न च अंतःकरणस्य तदुपादानत्वसंभवेनार्थांतरमिति वाच्यं अंतष्करणस्य सादित्वेनोपादानापेक्षायां अज्ञानस्य तदुपादानत्वेनावश्यकत्वात् प्रातिभासिकस्वाप्नगजाद्यध्यासे तस्योपादानत्वेन कृप्तत्वाच्च, न च विपक्षे बाधकाभावः मिथ्यार्थावभासानुपपत्तेरेव बाधकत्वात्। ननु किमिदमध्यस्तत्वं ? न तावद्भ्रमविषयत्वं भ्रमस्यानिरूपणात् तथाहि भ्रमत्वं यदि दोषजन्यज्ञानत्वं तदा सर्वस्य कार्यस्याविद्यादोषजन्यतया ब्रह्मसाक्षात्कारस्यापि तज्जन्यत्वेन तत्रातिव्याप्तिः नापि दोषत्वेन तज्जन्यत्वं भ्रमत्वं काचादिसाधारणदोषत्वस्यानिर्वचनात् न च संस्कारजन्यानुभवत्वं तत्वं प्रत्यभिज्ञायामतिव्याप्तेः नचासद्विषयत्वं असद्व्याप्त्यनभ्युपगमात् नापि व्यधिकरणप्रकारकज्ञानत्वं घटे रूपं घटे घटत्वमित्यादिज्ञानेऽतिव्याप्तेः नापि रजतस्याध्यस्तत्वे प्रमाणमस्ति प्रत्यक्षेणाननुभवात् न च दृश्यत्वादिना तदनुमानं दृष्टांताभावात्, तस्माल्लक्षणप्रमाणाभावात् न युक्तं रजतादेरध्यस्तत्वमिति चेत्. अत्राहुः प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टसजातीयत्वमध्यासलक्षणं स्मर्यमाणे घटादावतिव्याप्तिवारणाय आद्यविशेषणं प्रतीतिनियतसत्ताकाध्यासस्यात्र लक्ष्यत्वेन सुखादेरपि तथात्वान्न तत्रातिव्याप्तिः अभिनवोत्पन्नवस्तुन्यतिव्याप्तिवारणाय द्वितीयविशेषणं, अध्यासमात्रलक्षणं तु परत्र परावभासत्वं, पारमार्थिकत्वावच्छिन्नस्वात्यंताभावाधिकरणे प्रतीयमानत्वमिति फलितम्। नचात्र प्रमाणाभावः सदिदं रजतमितिस्वाधिकरणे पारमार्थिकत्वेन प्रतिपन्नस्य रजतस्य नेदं रजतमितिबाधप्रत्यक्षेण तदवच्छिन्नाभावप्रतियोगित्वावगमात् सदितिप्रतीयमानं रजतं स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यंताभावप्रतियोगि बाध्यत्वात् यन्नैवं तन्नैवं यथेदंतेत्यनुमानाच्च, तस्माद्रजतमध्यस्तमिति सिद्धेन दृष्टांतासिद्धिः तथाचेदंतावदवस्थात्रयेऽप्यबाधिते सत्ये ब्रह्मणि निविष्टचित्तानां तत्वदर्शिनां रजतवदसद्रूपशीतोष्णादिद्वंद्वदुःखसहने कियानायासः स्वप्ने सर्पदृष्टस्य जागरे तत्प्रतीकार इवेति भाव इत्यप्येके वदंति ॥ १६ ॥

ननु सदिति सामान्यं वा उत स्वरूपं वा ? आद्ये तस्य विशेषापक्षत्वेन प्रलयदशायामशेषविशेषविनाशे विनाशः स्यात् विशेषाणामपि

कार्यत्वेन तत्र विनाशस्यावश्यकत्वात् सामान्यस्यापि तद्धर्मत्वेन विनाशोपपत्तेः द्वितीयेपि तस्य व्यावृत्तत्वे रज्जुसर्पदण्डधारादिवत् कल्पितत्वाद्विनाशित्वमायातं अनुवृत्तत्वे तु तस्यैव सामान्यत्वेनोक्तदोषापत्तिरित्याशङ्क्य सतो न कथंचिदपि विनाश उपपद्यते तस्य सामान्यविशेषभावशून्यत्वादित्युत्तरमाह,–

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं ॥

विनाशमव्ययस्यास्य न कश्चित्कर्त्तुमर्हति ॥१७॥

अविनाशित्विति। इदं परिदृश्यमानमविद्याकार्यं सर्वं जगदसद्रूपं येनातिसूक्ष्मेण विभुना सद्रूपेण मरीचया जलप्रवाहवत् ततं अंतर्बहिश्च व्याप्तं तत् सच्छादितं वस्तु अविनाशि असद्वस्तु विनष्टुं विनाशविक्रियाविषयतां प्राप्तुमनर्हं शीलं स्वभावः सत्ता यस्य तदविनाशि सदतिसूक्ष्मत्वादतिमहत्वाच्च विनाशक्रियाशून्यत्वान्नित्यमेवेत्यर्थः, आत्मा नित्यः पूर्णत्वाद् गगनवदिति नित्यत्वेऽनुमानं मानं, नष्टेप्येकस्मिन्देहे रविवत्सर्वप्रकाशके सत्येवात्मनि पदार्थास्सर्वत्र सर्वेषामुपलभ्यंत इति पदार्थोपलब्ध्यन्यथानुपपत्तिप्रसूताऽर्थापत्तिश्च मानं, अत्रात्मनो नाशं वदन् वादी प्रष्टव्यः किमात्मनो नाशः स्वतो वा परतो वा किमाश्रयनाशात् वा संबंधिनाशाद्वा उत कारणनाशाद्वा कार्यनाशाद्वेति ? नाद्यः निरवयवत्त्वादात्मनः सावयवस्य स्वावयवापचयान्नाशः स्यात् आत्मनस्तु निरवयवस्य स्वतो नाशो नोपपद्यते, नापि द्वितीयः परस्याप्यात्मत्वेन स्वं प्रति स्वस्य कर्तृकर्मत्वायोगेन नाशासंभवात्, न तृतीयः "कस्मिन्भगवः प्रतिष्ठित इति स्वे महिम्नीति" आत्मनः । स्वातिरिक्ताश्रयाभावश्रवणादाश्रयनाशहेतुकनाशानुपपत्तेः, नापि चतुर्थः आत्मनो निरवयवत्वेन द्रव्यगुणक्रियादिभिः संबंधस्यासंभवात्तद्विश्लेषप्रयुक्तनाशानुपपत्तेः, नापि पंचमः न चास्य कश्चिज्जनितेति ब्रह्मणः कारणाभावश्रवणात्तन्नाशप्रयुक्तनाशायोगात्, नैव च षष्ठः न तस्य कार्यं करणं च विद्यत इति ब्रह्मणः कार्याभावश्रवणात्तन्नाशनिमित्तकनाशासंभवात् । इदं सद्ब्रह्म न केनापि प्रकारेण व्येति विनश्यतीत्यव्ययं तस्य अव्ययस्य नित्यसिद्धसत्ताकस्यात्मनो विनाशमभावं कर्त्तुं वक्तुं च कोपि वादिविशेषो नार्हति तथात्वे स्वस्यैव नाहमस्मीत्यभावप्रसंगात् बहुश्रुतिप्रत्यक्षादिप्रमाणविरोधप्रसंगाच्चेति भावः ।

अपरे तु वदंति—ननु किं पुन स्तत्सद्यत्सदेव सर्वदेत्युक्तमित्याशंक्य

सामान्यविशेषभावशून्यमखंडकरस सदेवत्यादिश्रुतिप्रमेयं सर्वक्रियारहितं वस्तु प्रकृतं सद्विवक्षितमित्युत्तरमाह, अविनाशीति । न विनष्टुं, शीलमस्येत्यविनाशि तद्विद्धि जानीहि देहादिद्वैतासद्व्यावृत्त्यर्थं सतो विशेषणं, स्वतो नाशराहित्यमिति द्योतनाय तु शब्दः, किं तदित्याकांक्षायां सदात्मनो विनाशराहित्ये सर्वव्यापकत्वं हेतुमभिप्रेत्याह, येनेति । सद्रूपेण ब्रह्मणा सर्वमिदं जगत् ततं व्याप्तं आकाशेनेव घटादि, विमतं अविनाशि व्यापकत्वात् आकाशवत् न हि प्रमितमेवोदाहरणं किंतु प्रसिद्धमपीति भावः । आत्मनो नाशमिच्छता स्वतो वा परतो वा विनाशोऽगीक्रियते इति विकल्प्योभयपक्षनिरासायाह, विनाशमिति । नखल्वस्य ब्रह्मणो विनाशं कर्तुं कश्चिदर्हतीत्यन्वयः, न कश्चिदस्याभावं कर्तुं शक्नोतीत्यत्र तु हेतुमाह अव्ययस्येति । नश्यतीति नेत्यव्ययस्तस्य ब्रह्मणो न तावद्देहादिवत्स्वरूपेण विनाशो निरवयवत्वात् नाप्यात्मीयेनात्मीयाभावाद्देवदत्तस्य धनहान्येव इत्येवं स्वरूपेण स्वसंबंधिना वा विनाशशून्यस्येत्यर्थः ? किंचास्य नाशोऽन्येन कृतः स्वेन वा ? नाद्योऽन्यस्याभावात् न द्वितीयः एकस्य युगपदेकक्रियां प्रति कर्तृकर्मभावविरोधादितिभावः ।

अन्येतु नन्वेतादृशस्य सतो ज्ञानात् भेदे परिच्छिन्नत्वापत्तेर्ज्ञानात्मकत्वमभ्युपेयं ज्ञानस्य च धात्वर्थत्वेन क्रियात्वादुत्पत्तिविनाशवत्त्वं घटज्ञानमुत्पन्नं नष्टं चेतिप्रत्ययसिद्धं, एवमहं घटं जानामीत्यनेन तस्य साश्रयत्वं सविषयत्वं चेत्येवं ज्ञानस्य देशकालवस्तुपरिच्छिन्नत्वात् कथं तद्रूपस्य सतो देशादिपरिच्छेदशून्यत्वम् इत्याशंक्याह, अविनाशित्विति । देशतः कालतो वस्तुतो वा विनाशः परिच्छेदोऽस्य नास्तीत्यविनाशि सर्वप्रकारपरिच्छेदशून्यं तु एव तदेवं सद्रूपं स्फुरणं त्वं विजानीहि, किं तत् ? येन सद्रूपेण स्फुरणेनैकेन नित्येन विभुना सर्वमिदं दृश्यजातं स्वतःसत्तास्फूर्तिशून्यं ततं व्याप्तं स्वसत्तास्फूर्त्यध्यासेन रज्जुखंडेनेव सर्पादि स्वस्मिन् समावेशितं तदविनाश्येव विद्धीत्यर्थः। कस्मात् ? यस्माद्विनाशं परिच्छेदं अव्ययस्यापरिछिन्नस्य अस्यापरोक्षसर्वानुस्यूतस्फुरणरूपस्य सतः कश्चित् कोप्याश्रयो वा विषयो वा इंद्रियसन्निकर्षादिरूपो हेतुर्वा न कर्तुमर्हति समर्थो न भवति कल्पितस्याकल्पितपरिच्छेदकत्वायोगात् आरोपमात्रे चेष्टापत्तेः अहं घटं जानामीत्यत्र ह्यहंकार आश्रयतया भासते घटस्तु विषयतया भासते उत्पत्तिविनाशवती काचिदहंकारवृत्तिस्तु सर्वतो विप्रसृतस्य सतः स्फुरणस्य व्यंजकतया भासते तदुत्पत्तिविनाशेनैव च तदुपहिते स्फुरणरूपे सति उत्पत्ति-

विनाशप्रतीत्युपपत्तेर्नैकस्य स्फुरणस्य स्वत उत्पत्तिविनाशकल्पनाप्रसंगः घटाद्यवच्छेदेनाकाशवत् अहंकारस्तु तस्मिन्नध्यस्तोपि तदाश्रयतया भासते सद्रूपस्फुरणस्य तद्वृत्तितादात्म्याध्यासात् सुषुप्तावहंकाराभावेऽपि तद्वासनावासिताज्ञानभासकस्य चैतन्यस्य स्वतः स्फुरणात् अन्यथा तावंतं कालमहं किमपि नाज्ञासिषमिति सुषुप्तोत्थितस्मरणं न स्यात्। न च सुषुप्तिकालीन आत्मा ज्ञानसामान्याभाववान् अस्मर्यमाणत्वात् संप्रतिपन्नचत्वरादिवत् इतिज्ञानाभावानुमितिरेवेयं सुप्तोत्थितस्य न तु स्मृतिरिति वाच्यं, सुषुप्तिकालज्ञानाभावात्तदवच्छिन्नपक्षरूपस्यात्मनोऽसिद्ध्याऽनुमानाप्रवृत्तेः प्रतिपन्ने हि धर्मिण्यनुमानप्रवृत्तिरिति नियमात्। न च विमतौ उदयास्तमयसमयौ अंतरालकालवंतौ उदयास्तमयसमयत्वात् संप्रतिपन्नार्केन्दूदयास्तमयसमयवत् उक्तोदयास्तमयसमयांतरकालः आत्मवान् कालत्वात् संप्रतिपन्नकालवादित्यनुमानाभ्यां सुषुप्तिरूपावांतरकालावच्छिन्नात्मरूपधर्मिसिद्धिरिति वाच्यं तथाप्युक्तहेतोरुपेक्षाविषये पथगततृणादौ व्यभिचारात्, तर्हि नियमेनास्मर्यमाणत्वादित्येव हेतुरस्तु तत्रोक्तदोषाभावादुपेक्षाविषयस्य नियमेनास्मर्यमाणत्वासंभवादिति चेत् तथापि स्मरणाजनकनिर्विकल्पज्ञानविषये व्यभिचारतादवस्थ्यात्, तर्हि ज्ञानसामग्रीवैकल्यादित्येव हेतुस्तत्रोक्तदोषाभावादिति चेन्न तत्सामग्र्यभावस्याप्यन्योन्याश्रयग्रस्तत्वात् तथाहि ज्ञानरूपकार्याभावे तत्सामग्र्यभावः सामग्र्यभावे तत्कार्यज्ञानाभाव इति। यद्वैतन्न पश्यति पश्यन्वै तद् द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टे विपरिलोपो विद्यते विनाशित्वात् इत्यादिश्रुतिरपि सुषुप्तौ स्वप्रकाशस्फुरणसद्भावं नित्यतया दर्शयति, सत्यं ज्ञानमनंतमिति च ज्ञानस्य अनंतत्वं त्रिविधपरिच्छेदशून्यत्वं स्वाध्यस्तसर्वसंबंधित्वं च दर्शयति तस्मादेकस्य सर्वानुस्यूतस्वप्रकाशस्फुरणरूपस्य सतः सर्वप्रकारपरिच्छेदशून्यत्वादुपपन्नं "नाभावो विद्यते सत इति।"

केचित्तु अथोक्तयुक्तिसिद्धमर्थमाह, अविनाशीति। तत्सत्यं वस्तु अविनाशीति विद्धि जानीहि, तत्किं? येनाध्यासाश्रयीभूतेनाधिष्ठानेन सर्वमिदं दृश्यजातं ततं विस्तारं प्राप्तं यतो न सत्याश्रयं विनाध्यस्तं सत्यवद्भासते शुक्तिकाया असत्वे रजतमिव अतोऽस्याव्ययस्य विनाशं कर्तुं कोऽर्हति न कोपीत्यर्थ इत्याहुः॥ १७॥

एवं सदसतोरनंतरप्रकृतयोर्मध्ये स्वरूपाव्यभिचारित्वेन सर्वथा

अबाध्यत्वरुपं सच्छब्दार्थं निर्धार्य अथ किं पुनस्तदसद्यत्स्वात्मसत्तां व्यभिचरतीत्याकांक्षायां देहादिरनात्मवर्गोऽसच्छब्दार्थ इत्याह —

अंतवंत इमे देहा नित्यस्योक्ता शरीरिणः ॥

अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ ३८ ॥

अंतवंतइति। हे भारत अन्तो विनाशो विद्यते येषां तेऽन्तवन्त इमेऽपरोक्षा देहा उपचितापचितरुपा स्थूलसूक्ष्मकारणरुपाः नित्यस्याविक्रियस्य कूटस्थस्य अनाशिनो नाशरहितस्य अप्रमेयस्य प्रमाणातीतस्य शरीरिणोऽध्यासिकसम्बन्धेन देहवत एकस्यात्मनः स्वप्रकाशरूपस्य सम्बन्धिनः दृश्यत्वेन भोग्यत्वेन च उक्ता विवेकिभिरित्यर्थः, तेषां स्वातंत्र्यं निरस्यति नित्यस्येति, आकाशादिव्यावृत्यर्थमाह शरीरिणइति, परिणामिनित्यत्वं निरस्यति अनाशिन इति, प्रत्यक्षाद्यविषयत्वमाह अप्रमेयस्येति । नन्वात्मनोऽप्रमेयत्वमयुक्तं तंत्वौपनिषदं पुरुषं पृच्छामीत्याद्यागमोवरोधात् किं च प्रत्यक्षादेरपि 'अज्ञातज्ञापकं प्रमाणमिति' प्रमाणलक्षणानुरोधेन तद्विषयकत्वमवश्यं वाच्यं अन्यत्रावरणकृत्याभावेनाज्ञातत्वासंभवेन तत्रैव तत्संभवादितिचेत् आगमस्य स्वतो भासमानस्यात्मनो विषयत्वमनापाद्यैव तत्राध्यस्तानात्मनिवर्त्तकत्वेन प्रामाण्यमुपपद्यते प्रत्यक्षादेरप्यनात्मविषयत्वात् तत्र च व्यवहारकालेऽज्ञातत्वसंभवाद्व्यवहारिकप्रामाण्यमुपपद्यते इत्येवंहि देहादेरवस्तुत्वादात्मनश्चैकरूप्यात् युद्धे स्वधर्मे प्रवृत्तस्यापि तव न हिंसादिदोषसंभावनेत्याह तस्मादिति, युद्धादुपरमं माकार्षीरित्यर्थः, अत्र स्वत एव युद्धे प्रवृत्तस्यार्जुनस्य शोकमोहप्रातिबंधननिवृत्तस्य तन्निरासमात्रं क्रियते अतो युध्यस्वेत्यनुवादमात्रं न विधिरिति भावः, भरतवंश्योद्भवत्वात्तव युद्धत्यागोऽयुक्तइति संबोधनाशयः।

अन्येतु अशोच्यानित्यत्र त्वंपदवाच्यार्थो देहादिर्जन्मादिमत्वेनानित्यत्वादशोच्य एव त्वंपदलक्ष्यार्थोऽप्यात्मा स्वयमजत्वेन नित्यत्वादशोच्य एवेत्युभयोरप्यशोच्यत्वेऽनित्यत्वनित्यत्वज्ञानं कारणत्वेन सूचितं तेन निवृत्तशोकमर्जुनमालक्ष्य तदेव ज्ञानं सुखतो विस्पष्टयन् स यस्मिन्नर्थे स्वयमेव पूर्वं प्रवृत्तस्तत्रैव तं प्रोत्साहयति भगवान् अंतवंतइति। प्रत्यक्षादिप्रमाणैः प्रमापयितुमशक्योऽप्रमेयो नहि प्रत्यक्षादेर्विषयतात्मनोऽस्ति,तथाहि — न तावत् आत्मा प्रत्यक्षविषयो "अशब्दमस्पर्शमित्यादिश्रुत्या" शब्दादिशून्यत्वोक्तेः

नाप्यनुमानविषयो "नैव च तस्य लिंगमिति" लिंगाभावश्रवणात्, नापि उपमानाविषयः 'हेतुदृष्टांतवर्जितमिति" सादृश्याभावश्रवणात्, नापि शब्दविषयः "यत्तदद्रेश्यमग्राह्यमगोत्रमिति" नामरूपजात्यादिशब्दप्रवृत्तिनिमित्ताभावश्रवणात् यतो वाचो निवर्तंते इति साक्षात्तन्निषेधाच्च । नन्वेवं "तंत्वौपनिषदमिति" श्रुतेरप्रामाण्यं स्यादिति चेन्न, तस्याः निर्विशेषात्मनो लक्षणावृत्त्या ज्ञाप्यत्वाभिप्रायेण प्रामाण्योपपत्तेः सविशेषत्वेनात्मनो ज्ञातत्वेपि निर्विशेषत्वेनाज्ञातत्वादज्ञातज्ञापकत्वेन श्रुतेः प्रमाणलक्षणसंभवात् तथापीदंतया साक्षान्निर्देष्टुमशक्यत्वादात्मा श्रुतेरविषय एवेति ज्ञेयं । नापि अर्थापत्तेर्विषयः आत्मनि विषयाऽनुपपत्तेरभावात्, नाप्यनुपलब्धेर्विषयो भावत्वात्, नाप्यैतिह्यविषयो वागविषयत्वादित्यात्मनोऽप्रमेयत्वं सिद्धं, किं च सर्वेषां प्रमाणानां प्रमेयानां च यतः प्रामाण्यसिद्धिस्तं कि प्रमापयेत् "विज्ञातारमरे केन विजानीयादिति श्रुतेः," स्वस्मिन्नध्यस्तसर्वप्रमाणप्रमेयसद्भावासद्भावप्रकाशकत्वात् स्वप्रकाशत्वाच्चात्मनः स्वत एव प्रामाण्यं न तु परतोऽतएवाप्रमेयस्तस्य, अविनाशिनो विनाशः सत्ताऽदर्शनं परिछित्तिस्तदभावोऽस्यास्तीत्यविनाशी अनंतः "सत्यं ज्ञानमनंतमिति" श्रुतेः तस्याविनाशिनोऽपरिच्छिन्नस्य परिपूर्णस्यातएव नित्यस्य, ननु परिच्छिन्नस्यापि परमाणोर्नित्यत्वमस्तीति चेन्न, तन्नित्यत्वे मानाभावात् आत्मनश्च "सर्वगतश्चानित्य इति, यो वै भूमा तदमृतमिति" नित्यत्वश्रवणादपरिच्छिन्नस्यैव भूम्नो नित्यत्वं न तु परिच्छिन्नस्य "यदल्पं तन्मर्त्यमिति" तन्मर्त्यत्वश्रुतेः । ब्रह्मादिस्तंबपर्यन्तानि शरीराण्युपलब्धिस्थानत्वेन अस्य संतीति शरीरी सर्वप्राणिशरीरोपाधिकस्तस्य शरीरिणः सर्वशरीरेषु अहमित्युपलभ्यमानस्य एकस्यात्मनः इमे उभयोस्सेनयोर्मध्ये दृश्यमाना भीष्मादिशब्दवाच्या, उक्ता "आचार्याः पितरः पुत्रा इत्यादिना" त्वयोक्ता देहा अंतवंतो अन्तो अवसानमदर्शनं तद्वज्जन्मादिमत्वेन प्रतीतिमात्रत्वेन चानियतसत्ताका इति यावत् न हि शुक्तिरजतवदधिष्ठानभ्रमकल्पितानां देहादीनां सत्ता संभवति तदुत्तरक्षणेऽधिष्ठानसाक्षात्कारेण बाध्यत्वात् अतः त्वमेव देहादीनामंतवत्त्वं देहिनस्त्वात्मनो नित्यत्वं चाविज्ञाय पूर्वं मदीया एते म्रियंते इति शोचितवानसि इदानीं तु श्रुतियुक्त्यनुभवैर्विचार्यमाणे आत्मनो देहादीनां चाशोच्यत्वं सिद्धं अनुभूतं च त्वया यस्मात्तस्मात् हे भारत विवेकविज्ञानसंपन्न युद्धयस्व युद्धाय यतस्वेति पूर्वमेव युद्धे प्रवृत्तमर्जुनं भ्रांत्या शोचंतं तच्छोकमूलभ्रममपनीय स्वकार्यं कुर्वित्यनुजानीते भगवान् बुभुक्षुं

शंकितं शंकामपास्य भुंक्ष्वेतिवत् न तु युद्धं कुर्विति नियुंक्ते ज्ञानकांडे कर्मविधेरनुपयुक्तत्वात् तथाच प्रयास्यंतं प्रयाहीतिवत् योत्स्यंतं युद्ध्यस्वेत्यनुमतिमात्रे भगवद्वचनस्य तात्पर्यं । यद्वा "एतं वै तमात्मानं विदित्वा ब्राह्मणा व्युत्थायाथ भिक्षाचर्यं चरंतीति" ब्रह्मविदां सर्वेषणाभ्यो व्युत्थितवतां ब्राह्मणानां देहयात्रार्थं भिक्षाविधिः श्रूयते अन्येषामपि ब्रह्मविदां प्राणत्राणमवश्यं कर्तव्यमिति सूचयितुमात्मज्ञानिनो अर्जुनस्य च क्षत्रियत्वेन संन्यासवनस्थत्वयोरनुपपत्तौ राज्ञोऽस्य राज्येनैव देहयात्रा भवितव्या राज्यस्य च पराक्रांतत्वेन तज्जयाय यतस्वेति शरीरयात्राऽत्र ज्ञानप्रकरणे भगवता विधीयते "शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः" इत्यग्रे उच्यते च अतो नात्र कर्मविधिरिति बोध्यमित्याहुः ।

अथ यदर्थमयमुपक्रमस्तदाह, अंतवंतइति । नित्यस्य सर्वदैकस्वभावस्य अतएवानाशिनः अप्रमेयस्यापरिच्छिन्नस्य शरीरिणः शरीरावच्छिन्नस्य परमात्मनः इमे सुखदुःखयोनयो देहास्तत्वदर्शिभिः अंतवंतः क्षणभंगुरा उक्ताः घटांतर्गताकाशस्य घटा इव एकस्यैव नटस्य वहुभिः स्वरूपैर्नटत इव वेत्यर्थः । यद्वा इमे स्वप्नावस्थायामनुभूयमाना उच्चावचदेहा अंतवंतो जाग्रदवस्थायां नश्वरा उक्ता वेदेन "अथैतत्स्वप्नया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छती"त्येनेन प्रतिपादिताः संति स्वप्नया स्वप्नावस्थया चरति व्यवहरति तेऽस्यात्मनो लोका भोगस्थानानीत्यर्थः, कस्य ? शरीरिणः, तत्तच्छरीरावच्छेदेन तत्तद्भोगान् भुंजानस्यात्मनो नित्यस्य अवस्थात्रयेप्यनुस्यूतस्य शेषं पूर्ववत् इत्यर्थः इत्यपरे ॥ १८ ॥

अथैतान्न हंतुमिच्छामीति, पापमेवाश्रयेदस्मानिति, संकरो नरकायैव कुलघ्नानामिति, कथं भीष्ममहं संख्ये, इत्यात्मनो हननादिक्रियाकर्तृत्वं पापक्रियाश्रयत्वं तत्फलभोक्तृत्वं च मन्यसे तत् आत्मस्वरूपाज्ञानकृतमेव सति तु आत्मतत्वे विज्ञाते न कस्यापि विकल्पस्यावकाशोस्तीति आत्मयाथात्म्यमवबोधयितुं तत्प्रकाशनपरौ "न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं उभौ तौ न विजानीतो नायं हंति न हन्यते अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महांतं विभुमात्मानं मत्वा धीरो न शोचतीति" कठशाखीयौ मंत्रावर्थतः पठति तत्र

आद्येनात्मनः क्रियाश्रयत्वं तद्विषयत्वं यो मन्यते स श्रुतवेदांतोऽपि मूढ एवेत्याह—

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतं ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१८॥

य एनमिति यस्तु अहमिमं हन्मीत्यहंप्रत्ययविषयमेनं प्रकृतमात्मानं हंतारं हननक्रियायाः कर्त्तारं मन्यते योऽहमनेन हतोस्मीत्यनेनात्मानं परेण हतं तद्धननाक्रियायाः विषयभूतं च मन्यते तौ एवमात्मानं हननक्रियायाः आश्रयं विषयं च मन्यमानौ उभौ पुरुषौ आत्मानं न विजानीतः यथाभूतमात्मतत्वं साक्षात् न विदितवंतौ यतोऽयमात्मा न स्वयं यंच कंचन हंति येन केनापि न हन्यते देहेंद्रियादिषु व्यापृतेषु सत्स्वयमात्मा चलितेऽपि च वृक्षे तदंतस्थाकाश इव कूटस्थासंगाचिद्रूपेण सर्वत्रोदासीनतया तूष्णीमास्त इत्यर्थः "न तदश्नाति किंचन न तदश्नाति कश्चने"ति श्रुतेः, आत्मा निष्क्रिय एव निरवयवत्वादाकाशवदित्यादियुक्तिभिर्निष्कलं निष्क्रियं शांतमिति साक्षी चेता केवलो निर्गुणश्चेत्येवमादि श्रुतिभिश्चात्मा निष्क्रिय एवेति श्रुत्वा मत्वा च स्वं कर्त्तारं भोक्तारं सुखिनं च यो मनुते नासौ आत्मतत्वं विजानाति अपि तु तस्य श्रवणादिक्रिया मृतप्रस्वाः प्रसवक्रियावच्छ्रमैकफलैवेति सूचितं भवतीत्येके वदंति ।

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्त्तकमित्येतस्य गीतार्थस्योत्प्रेक्षामात्रमूलत्वं निराकर्तुं तन्मूलभूतं मंत्रद्वयं भगवानानीतवान् तत्र युद्धे भीष्मादयो मया हन्यंते अहमेतेषां हंतेत्येतां बुद्धिं निराकर्त्तुं प्रथममंत्रं पठति, यएनमिति । य एनं प्रकृतं देहिनं अदृश्यत्वादिगुणकं हंतारं हननक्रियायाः कर्त्तारं वेत्ति अहमस्य हंतेति विजानाति यश्चान्य एनं मन्यते हतं देहहनने हतोहमिति हननक्रियायाः कर्मभूतं विजानाति तावुभौ देहाभिमानित्वादेनमविकारिणमकारकस्वभावमात्मानं न विजानीतो न विवेकेन जानीतः शास्त्रात्, कस्मात्? यस्मान्नायमात्मा हंति न हननक्रियाया कर्त्ता भवति न हन्यते न च कर्म भवत्यविक्रियत्वादात्मन इत्यर्थः । अत्र य एनं वेत्ति हंतारं हतं चेत्येतावति वक्तव्ये यदावृत्तिर्वाक्यालंकारार्था, य एनं वेत्ति हंतारं तार्किकादिः आत्मनः कर्तृत्वाभ्युपगमात् यश्चैनं मन्यते हतं चार्वाकादिः आत्मनो विनाशित्वाभ्युपगमात् तावुभौ न विजा-

नीत इति वादिभेदख्यापनार्थं वा पृथगुपन्यासः, अत्र पूर्वार्द्धे हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतमिति श्रौतपाठ इत्यन्ये ॥ १९ ॥

जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति यास्कोक्त षड्भावविकारनिषेधेनाविक्रियत्वं हेतुं साधयितुं द्वितीयं मंत्र पठति—

न जायते म्रियते वा कदाचित्
नायं भूत्वा भविता वा न भूयः ॥
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २० ॥

नेति । वाशब्दौ भवतश्चार्थौ कदाचिच्छब्दः सर्वविक्रियानिषेधैः संबध्यते अयमात्मा न कदाचित् कस्मिन्नपि काले न जायते न म्रियते चेति जन्मविनाशनिषेधः, कस्मान्नोत्पद्यते ? यस्मादयमात्मा न भूत्वा प्रागभूत्वा भूयः पुनर्भविता न, यो ह्यभूत्वा भवति स उत्पद्यते अयं तु प्रागस्त्येव अतो नोत्पद्यत इत्यर्थः जन्माभावे तत्पूर्वकालित्वविकारोऽप्यर्थादात्मनो नास्तीति बोध्यं, कस्माच्च न म्रियते ? यस्मादयमात्मा प्राग्भूत्वा कदाचित् भूयपुनर्न भविता न यो हि प्राग्भूत्वा उत्तरकाले न भवति स म्रियेत अयं तूत्तरकालेप्यस्त्येवातो न म्रियते इत्यर्थः। यतो नोत्पद्यतेऽतो न म्रियतेऽतविनाशायोग्य इत्यर्थः वाशब्दाद्वाक्यद्वयलाभः । अत्र न जायते म्रियते वेति प्रतिज्ञा कदाचिदित्यादिना तदुपपादनं अतो नित्य इति तु तदुपसंहार इति विभागो बोध्यः । यद्यपि जन्मविनाशयोर्निषेधे तन्मध्यवर्तिनां निषेधो जातः तथापि तन्मध्यवर्तिनां विकाराणां स्वनिषेधवाचकशब्दैरपि निषेधः क्रियते जन्मविनाशयोर्निषेधो अनुक्तानामपि यौवनादिविकाराणामुपलक्षणाय, तत्र शाश्वत इति शश्वत्सर्वदा भवति नापक्षीयते नापचीयते कूटस्थनित्यत्वान्निरवयवत्वाच्चात्मनो न स्वरूपतोऽपक्षयः संभवति देहादेस्तु सावयवत्वेन विकारित्वात्संभवत्येव कस्तूरिकादेरपि सगुणत्वाद्गंधादिगुणनाशेन सोऽस्त्येव आत्मनस्तु निर्गुणत्वाद्गुणनाशेनापि तदभाव इत्यर्थः । यदि नापक्षीयते तर्हि वर्धतामिति ? नेत्याह, पुराण इति। पुरापि नव एकरूपो नत्वधुना नूतनां कांश्चिदवस्थामनुभवति यो ह्यवयवागमेनोपचीयते स वर्धते अभिनव इति चोच्यते लोके यथा फलपुष्पादिकं अयं त्वात्मा निरवयवत्वात्सर्वदैकरूपत्वाच्च नोपचीयते चेति पुराणो न वर्द्धते इत्यर्थः, तथा न हन्यते न विपरिणम्यते हन्यमानेऽपि विपरिणम्यमानेऽपि शरीरे न विप-

रिणमते इत्यर्थः पूर्वावस्थात्यागेनावस्थांतरापत्तिर्विपरिणामस्तदर्थोऽत्र हंति-रिष्यते हिंसार्थत्वे तु न म्रियते चेत्यनेन पौनरुक्त्यापत्तेरिति बोध्यं. "सर्व-प्रकाराविकाररहित आत्मेति" महावाक्यार्थः । यस्मादेवमविक्रिय आत्मा अत उभौ तौ न विजानीत इति पूर्वमंत्रेण संबंधो बोध्यः ।

परे तु न हन्यते इत्येतदेव षड्भावविकारशून्यत्वेन दृढयति, नेति । न जायते न म्रियते वेतिजन्मविनाशनिषेधः वाशब्दौ चार्थे न चायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भजते किंतु प्रागेव स्वतः सत्स्वरूप, कस्मात्? यस्मादजः यो हि जायते स जन्मानंतरमस्तित्वं भजते यस्तु स्वमेवास्ति स न भूयोप्यन्यदस्तित्वं भजते इत्यर्थः नित्यः सर्वदैकरूपो न वर्द्धत इत्यर्थः । शश्वद्भवः शाश्वतो नापक्षीयते इत्यर्थः पुराणो न परिणमते पुराऽपि नव एव न तु परिणामतो रूपांतरं प्राप्य नवो भवतीत्यर्थः, यद्वा न भवितेत्य-स्यानुषंगं कृत्वा भूयोऽधिकं यथा भवति तथा न भावितेति वृद्धिनिषेध-अजो नित्य इति चोभयं वृद्ध्यभावे हेतुरित्यपौनरुक्त्यमिति बोध्यं । यदर्थमेते विकारा निरस्ताः तं प्रस्तुतं विनाशाभावमुपसंहरति न हन्यते हन्यमाने शरीर इत्याहुः ।

अन्ये तु तर्ह्यात्मतत्त्वं कथंभूतमित्याकांक्षायां यास्कपठितजन्मादिषड्-भावविकाररहिततया कूटस्थासंगाचिद्रूपत्वमेवात्मनः स्वाभाविकं तत्वमि-त्यात्मतत्वनिर्द्धारणाय द्वितीयं मंत्रं पठति नेति । अत्र अज इत्यजत्वेन सर्व-विकारासंभवे प्राप्तेऽपि स्वयं श्रुतिः कंठरवेण प्रत्येकं तान्निषेधति आत्मनो निर्विकारत्वज्ञानस्य निःसंशयत्वाय, अजः यत्साक्षात्काराद्विद्वान् पुनर्न जायते सोऽजः स्वयं जननरहितो वा अजोऽयमात्मा कदाचिन्न जायते नोत्पद्यते "निष्कलं निष्क्रियमिति, न चास्य कश्चिज्जनिता न चाधिप इति" निरव-यवत्वनिष्कारणत्वश्रवणादात्मनो जनिक्रिया नोपपद्यत इति जन्मरूपप्रथम-विकारनिषेधः, तेनैव हेतुना न म्रियते च अयमात्मा नाशक्रियां न प्राप्नोतीति षष्ठविकारनिरासः, अयमात्मा भूत्वा जनिक्रियां प्राप्य पुनर्न भविता अस्ति मान्न भवति घटवज्जन्मानंतरभाव्यस्तित्वं न प्राप्नोति किंतु मृद्वज्जन्यनपे-क्षितप्राक्तनसत्तावानेव भवतीति द्वितीयविकारनिरासः, निरवयवत्वादयमा-त्मा नित्य एकरूप इति विपरिणामरूपचतुर्थविकारनिरासः, एकरूपयैव सत्तया सर्वदा भवतीति शाश्वत इत्यपक्षयरूपपंचमविकारनिरासः, निरवय-वत्वादयमात्मा पुराप्यधुना च सर्वदा नवत्वात्पुराण इति वृद्धिरूपतृतीय-विकारनिरासः, एवं षड्भावविकारवर्जितत्वे प्रतिपादिते सत्यात्मनो नित्य-

कूटस्थासंगचिदानंदरूपत्वमाद्यंतशून्यत्वमाद्वितीयत्वं च सिद्धं भवति तथाप्यस्य श्रोतुर्देहनाशादात्मनाशभ्रमो न नष्ट इति मत्वा यत्र भ्रमस्तत्रैव पुमान्पुनः सम्यग्बोधनीय इति तस्य भ्रमं छेत्तुं पुनरप्याह न हन्यत इति अस्मिन् शरीरे खड्गादिना हन्यमाने छिद्यमाने सत्यप्ययमात्मा निर्विकारत्वात्स्वयं घटे भिद्यमाने घटाकाशवन्न हन्यते हननक्रियाविषयो न भवति देहे नष्टे सत्यप्यात्मा स्वयं स्वरूपेणैव तिष्ठति घटे नष्टे घटाकाशवत् "अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मेति" श्रुतेरित्याहुः ॥ २० ॥

एवमात्मनोऽहमर्थस्य निर्विकारत्वेन नित्यकूटस्थासंगाचिदानंदरूपत्वं पारमार्थिकं तत्वमित्येतत्प्रतिपाद्य ईदृशमात्मतत्वं विदितवतो विदुषः सर्वकर्मसन्यास एवाधिकारो नान्यत्रेति सूचयितुमाह—

वेदाविनाशिनं नित्यं य एनमजमव्ययं ॥
कथं स पुरुषः पार्थ कं घातयति हंति कं ॥२१ ॥

वेदेति । यो ब्रह्मचर्याहिंसादिविवेकवैराग्यशमदमादिश्रुत्याचार्येश्वरप्रसादादिलक्षणया नियतया श्रवणादिसाधनसंपत्त्या युक्तो मोक्षैककामो अधिकारी ब्रह्मविद्गुरुसंनिधौ श्रद्धाभक्तिभ्यामजस्रं कृतश्रवणादिजन्यज्ञानेन अनुभूयमानमेनं प्रत्यग्रूपमात्मानमजं जन्मादिविकारशून्यमतएवाव्ययं येन केनापि प्रकारेण न व्येति न हीयते इत्यव्ययं अविनाशिनं विनाशः प्रमाणेन रज्जुसर्पादेरिव सत्ताबाधः द्रव्यगुणादिभिः परिच्छेदे वा तदभावोऽस्यास्तीत्यविनाशी परिपूर्णस्तं अतएव नित्यमेकरसमद्वितीयमात्मतत्वं वेद इदमेवाहमस्मीति साक्षात् करोति स पुरुषः सर्वात्मभावं गतो विद्वान् कथं केन प्रकारेण कं हंति कं विषयीकृत्य हननक्रियां करोति कं घातयति कं हननक्रियायां प्रवर्त्तयतीत्यर्थः सर्वत्र किंशब्दः आक्षेपार्थक एव न तु प्रश्नार्थकः प्रत्युत्तरादर्शनात् तथाच कथमितिसाधनमाक्षिप्य कमितिविषयाक्षेपः कं घातयतीतिप्रयोज्याक्षेपः एवं क्रियातत्साधनाद्यसंभवं निर्विकारब्रह्मात्मदर्शिनः सर्वकर्मसंन्यास एवाधिकार इति सिद्धं । ननु निर्विकारब्रह्मदर्शिनः कथं हंति कं हंति कं घातयतीति साधनाद्याक्षेपेण हननक्रियाया एव निवृत्तिरुच्यते न तु सर्वकर्मणामतः कथं सर्वकर्मसंन्यास एवाधिकारइत्युक्तमिति चेन्न, अविक्रियात्मज्ञानस्य क्रियामात्रनिवृत्तौ हेतोस्तुल्यत्वाद्यत्र यत्राविक्रियात्मज्ञानं तत्र तत्र न प्रवृत्तिरिति निर्विकारात्मज्ञानस्य प्रवृत्तिमात्रनिवृत्ति-

हेतुत्वं नियंतुं शक्यते अतोऽविक्रियाद्वितीयब्रह्मात्मज्ञानिनो न किंचित्कर्त्तव्यं कारयितव्यं चास्तीति सिद्धं । ननु न जायते इत्यादिना जन्मादिसर्वविक्रियाशून्यत्वं ज्ञेयस्य ब्रह्मण उक्तं ज्ञाता तु विद्वान्विकारीत्युभयोर्निर्विकारत्वसविकारत्वविरुद्धधर्माभ्यां परस्परभिन्नत्वाद्विकारिविदुषोऽविक्रियत्वज्ञानासंभवात्सर्वकर्मसंन्यासो नोपपद्यते, अविक्रियं ब्रह्मेति ज्ञानं संन्यासकारणमस्त्येवेति चेन्न तस्य ज्ञेयब्रह्मविषयत्वेनासाधनत्वात्, न ह्यचलः पर्वत इति ज्ञानं क्रियानिवृत्तिकारणं भवति अतो विदुषो विकारित्वेनाविक्रियोहमित्यविक्रियात्मत्वज्ञानासंभवात्संन्यासोऽनुपपन्न एवेति चेत्, अत्र भवान्प्रष्टव्यः- इदमहं जानामीतीदमर्थस्य ज्ञाताऽहंप्रत्ययार्थो देहो वा प्राणो वा इंद्रियाणि वा मनो वा अहंकारो वा विश्वो वा तैजसो वा प्राज्ञो वा उतात्मा वेति? आद्येऽपि स्वप्नदेहो वा जाग्रद्देहो वा उतोभयं वा ? नाद्यः जागरेऽहंप्रत्ययानुदयप्रसंगात् स्वप्नदेहनाशादहमर्थस्य ज्ञातुरपि नाशसंभवात्तादिष्टापत्तिरेवेति चेन्न, जाग्रति नाहमस्मीति तव स्वाभावप्रत्ययप्रसंगात्प्रत्यक्षविरोधाच्च, न द्वितीयः स्वप्नेऽहमस्मीत्यहंप्रत्ययानुदयप्रसंगात्, अहं व्रजामीत्युक्त्वा देह एव व्रजति अतो देह एवाऽहंशब्दार्थ इति चेन्न, देवानिष्ट्वा अहं स्वर्गं व्रजामीतिप्रत्ययानुपपत्तेः मृते देहे विद्यमानेप्यहंप्रत्ययादर्शनाच्च, न तृतीयः द्वयोः सामानाधिकरण्यासंभवात् । नाप्याद्यद्वितीयः, प्राणस्य स्वभावजडत्वाज्जाग्रति स्वप्ने वा स्वस्यान्यस्य वा ज्ञानासंभवादहमर्थत्वासिद्धेः । तृतीयेप्येकस्य वेंद्रियस्य सर्वेषां वाऽहमर्थत्वं ? नाद्यः शब्दादिष्वेकस्यैवार्थस्योपलब्धिप्रसंगाच्छब्दादेः सर्वस्य सर्वत्रोपलब्धिदर्शनेन प्रत्यक्षविरोधप्रसंगाच्च, न द्वितीयः अहं ब्राह्मण इत्यत्र श्रोत्रादीनां प्रत्येकं ब्राह्मणशब्दार्थत्वापत्त्या ब्राह्मणानेकत्वसिद्धावयमेको ब्राह्मण इति ब्राह्मणैकत्वप्रत्यक्षाविरोधप्रसंगात् योऽहं चक्षुषा घटमद्राक्षं सोऽहं पाणिना स्पृशामीति घटदर्शनस्पर्शोभयविषयकप्रत्ययबलेन श्रोत्रादिभ्यो भिन्नस्याहमर्थत्वासिद्धौ इन्द्रियाणां तदनुपपत्तेश्च । नापि चतुर्थः, मनसा ह्येव पश्यतीति मनसश्चक्षुरादिवत्करणत्वश्रवणेनाहमर्थत्वासिद्धेः । नापि पंचमोऽहंकारस्य विकारित्वेन ज्ञातृत्वानुपपत्तावहमर्थत्वासिद्धेः. नन्वहं जानामीत्यहंकारस्यापि ज्ञातृत्वं प्रतीयत इति चेन्न, स्वतोजडत्वाज्ज्ञातृत्वानुपपत्तेः प्रत्ययस्त्वहं मनुष्य इत्यन्यधर्माध्यासप्रत्ययवत् ज्ञाताहमित्यन्यधर्माध्यासेनाप्युपपद्यत एव अतो जडत्वेन ज्ञातृत्वमस्य न संभवति ज्ञातृत्वस्य चेतनधर्मत्वाद्वन्हेर्दग्धृत्ववत् शैशवे मया द्राक्षा भुक्तेति तेन तेन विकारेण सहैव विनश्यतो विकारिणोऽहंकारस्य शैश-

वभुक्तद्राक्षानुभूतिश्चिरकालिका वृद्धत्वेनोपपद्यते; अतस्तदन्यथानुपपत्त्या तद्भिन्नस्यैवाहमर्थत्वं नत्वहंकारस्य ममायमहंकारो दुष्ट इति स्वातिरिक्तस्य तस्य ज्ञेयत्वानुभवाच्च ज्ञातृत्वानुपपत्तावहमर्थत्वासिद्धिः। नापि षष्ठो, नापि च सप्तमो, नाप्यष्टमश्च, विश्वादीनामेकैकावस्थाभिमानित्वेन त्रयावस्थातद्धर्मविज्ञानासंभवाज्ज्ञातृभिन्नत्वेनाहमर्थत्वायोगात्, यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं जागर्मीत्यवस्थात्रयज्ञातुर्विश्वादिभ्यो भिन्नत्वं नित्यत्वमविकारित्वं चावगम्यतेऽतः परिशेषादात्मैव ज्ञाता नान्योऽतोऽस्ति विज्ञाता- इति श्रुतिसिद्धोऽभ्युपगंतव्यः । ननु निरवयवस्यात्मनो बुद्धितद्वृत्तीन्द्रियैस्तदर्थैश्च संबंधासंभवात्कथं ज्ञातृत्वमिति चेन्न, बुद्ध्यादिभिराध्यासिकसंबंधसंभवेनाविक्रियस्यात्मनो ज्ञातृत्वसिद्धेः अतोऽहं विजानामि विविक्तरूप इति श्रुतिसिद्धस्य विज्ञातुरात्मन एव अहमर्थत्वं तस्मान्निरुक्तविज्ञानस्य विदुषः संभवादात्मैव विद्वान्. एवं विद्वदात्मनोरभिन्नत्वादयमात्मा ब्रह्मेत्यात्मनो ब्रह्माभिन्नत्वश्रवणाच्चाविक्रियोऽहमिति विदुषः स्वस्याविक्रियत्वाद्वितीयत्वज्ञानसिद्धेर्निरंकुशत्वात्, अविक्रियब्रह्मात्मत्वज्ञानबलेन सर्वकर्मसंन्यास उपपद्यत एवेतिसिद्धमित्येके ।

अन्ये तु नाऽयं हंति न हन्यते इति मंत्रकृतां प्रतिज्ञां न जायते इति मंत्रेणात्मनोऽविक्रियत्वहेतुप्रतिपादनेनोपपाद्योपसंहरति, वेदेति न हन्यते इत्येतदुपपादितमिदानीं न हंतीत्युपपादयन्नुपसंहरति वेदेत्यपरे' य एनं पूर्वमंत्रेणोक्तस्वरूपमविनाशिनमंत्यविकाररहितं नित्यं विपरिणामरहितं अजं जन्मरहितं अव्ययमपक्षयरहितं एतादृशं सर्वविकारशून्यं वेद जानाति सोऽविक्रियात्मदर्शी विद्वान्पुरुषोऽधिकृतः कं हंति न कमपि हंति न कथमपि हंति न कथंचित्कंचित् हंति हननक्रियां करोतीत्यर्थः तथा कं घातयति न कथंचित् किंचित् घातयति हंतारं प्रयोजयतीत्यर्थः उभयत्रापि किंशब्द आक्षेपार्थः न प्रश्नार्थः उत्तरत्र प्रतिवचनादर्शनादिति बोध्यं तथा त्वमपि विद्वान्भूत्वा स्वयं हननक्रियाकर्ता' शिखंड्यादिप्रयोजकश्चेति हननकर्तृत्वकारयितृत्वे स्वस्मिन्नाध्यारोपयेत्याशयः; अत्राविक्रियत्वहेतोर्विदुषः सर्वकर्मनिषेधे समानत्वात्सर्वकर्मप्रतिषेध एव प्रकरणार्थो भगवतोऽभिप्रेतः हंतेस्त्वाक्षेपः पुरःस्फूर्तिकत्वेनोदाहरणार्थो न तु हननमात्राक्षेपेण कर्मांतरं भगवताऽभ्यनुज्ञायते इति मंतव्यं अन्यथा तस्य कार्यं न विद्यते इति तद्वचनविरोधापत्तेरिति बोध्यमित्याहुः ।

अन्ये तु न विनष्टुं शीलं यस्य तमविनाशिनं मरणरहितं तत्र हेतुः

स्थायी नश्यति प्रलये इत्यपरं, नित्यस्यैवात्मनो अपूर्वदेहेंद्रियादिसंबंधो जन्म पूर्वदेहेंद्रियादिवियोगो मरणं इदं चोभयं धर्माधर्मनिमित्तकं तदाधारस्य नित्यमेव मुख्यमिति तार्किकाः, नित्यस्याप्यात्मनः कर्णशष्कुलीजन्मना आकाशस्येव देहजन्मना जन्म तन्नाशाच्च मरणं तदुभयमौपाधिकं अमुख्यमेवेत्यन्ये, तत्र अनित्यत्वपक्षेप्यात्मनोऽशोच्यत्वं दर्शयति—

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

अथचेति । अथेतिपक्षांतरे चोऽप्यर्थे परिदुर्बोधत्वादात्मवस्तुनो असकृच्छ्रवणेपि अवधारणासामर्थ्यात् मदुक्तपक्षानंगीकारेण पक्षांतरमभ्युपैषि तत्रापि अनित्यपक्षमेवाश्रित्य यद्येनं प्रकृतमात्मानं नित्यजातं क्षणिकत्वपक्षे नित्यं प्रतिक्षणं पक्षांतरे आवश्यकत्वान्नित्यं नियतं जातं जातोयमिति मृतोयमिति च मन्यसे लोकप्रत्ययेन प्रत्यनेकशरीरोत्पत्तिं जन्म प्रत्यनेकशरीरमृतिं विनाशं च कल्पयसीत्यर्थः वाशब्दश्चार्थे । तदापि परमतानुभाषितं अभ्युपेत्य अहो बत महत्पापं कर्तुं व्यवसिता वयं इत्यादेस्तदीयशोकस्य निरवकाशत्वमित्याह, तथापीति । हे महाबाहो तथापि तथाभाविनि आत्मनि एवंप्रकारं अनुशोकं कर्तुं नार्हसि योग्यो न भवसि पापभयेनैव त्वमनुशोचासि तच्च न संभवति क्षणिकत्वपक्षे देहात्मवादपक्षे देहेन सह जन्मविनाशपक्षे च जन्मांतराभावेन पापभयासंभवात् क्षणिकत्वपक्षे दृष्टदुःखमपि न संभवति बंधुविनाशादर्शित्वादात्मन इत्यधिकं पक्षांतरे च दृष्टदुःखनिमित्तशोकसंभवेपि अदृष्टदुःखनिमित्तशोकस्य सर्वथाऽनुचितत्वामित्यर्थः त्वय्यंतादृशी कुमतदृष्टिः न संभवतीतिसूचनार्थं संबोधनं ।

प्रौढ्याऽऽत्मनो वेदबाह्यवादिसिद्धांतमनित्यत्वमभ्युपेत्यापि शोकं अपाकरोति, अथेति । स्थूलमताभ्युपगमेपि शोको न कार्यः किमुत वैदिकमतांगीकारे इति भावः शोकमकृत्वा बाह्वोर्महत्वं सार्थकं कुर्विति सूचनाय महाबाहो इत्युक्तमिति नव्याः ॥ २६ ॥

जन्मवतो नाशो नाशवतश्च जन्म इत्येतौ मिथो व्याप्तावित्येवं हेतुना शोकाभावं स्पष्टयति—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

वभुक्तद्राक्षानुभूतिश्चिरकालिका वृद्धत्वेनोपपद्यते; अतस्तदन्यथानुपपत्त्या तद्भिन्नस्यैवाहमर्थत्वं नत्वहंकारस्य ममायमहंकारो दुष्ट इति स्वातिरिक्तस्य तस्य ज्ञेयत्वानुभवाच्च ज्ञातृत्वानुपपत्तावहमर्थत्वासिद्धिः। नापि षष्ठो, नापि च सप्तमो, नाप्यष्टमश्च, विश्वादीनामेकैकावस्थाभिमानित्वेन त्र्यावस्थातद्धर्मविज्ञानासंभवाज्ज्ञातृभिन्नत्वेनाहमर्थत्वायोगात्, यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं जागर्मीत्यवस्थात्रयज्ञातुर्विश्वादिभ्यो भिन्नत्वं नित्यत्वमविकारित्वं चावगम्यतेऽतः परिशेषादात्मैव ज्ञाता नान्योऽतोऽस्ति विज्ञाता इति श्रुतिसिद्धोऽभ्युपगंतव्यः। ननु निरवयवस्यात्मनो बुद्धितद्वृत्तीन्द्रियैस्तदर्थैश्च संबंधासंभवात्कथं ज्ञातृत्वमिति चेन्न, बुद्ध्यादिभिराध्यासिकसंबंधसंभवेनाविक्रियस्यात्मनो ज्ञातृत्वसिद्धेः अतोऽहं विजानामि विविक्तरूप इति श्रुतिसिद्धस्य विज्ञातुरात्मन एव अहमर्थत्वं तस्मान्निरुक्तविज्ञानस्य विदुषः संभवादात्मैव विद्वान्. एवं विद्वदात्मनोरभिन्नत्वादयमात्मा ब्रह्मेत्यात्मनां ब्रह्माभिन्नत्वश्रवणाच्चाविक्रियोऽहमिति विदुषः स्वस्याविक्रियत्वाद्वितीयत्वज्ञानसिद्धेर्निरंकुशत्वात्, अविक्रियब्रह्मात्मत्वज्ञानबलेन सर्वकर्मसंन्यास उपपद्यत एवेतिसिद्धमित्येके।

अन्ये तु नाऽयं हंति न हन्यते इति मंत्रकृतां प्रतिज्ञां न जायते इति मंत्रेणात्मनोऽविक्रियत्वहेतुप्रतिपादनेनोपपाद्योपसंहरति, वेदेति न हन्यते इत्येतदुपपादितमिदानीं न हंतीत्युपपादयन्नुपसंहरति वेदेत्यपरे' य एनं पूर्वमंत्रेणोक्तस्वरूपमविनाशिनमंत्यविकाररहितं नित्यं विपरिणामरहितं अजं जन्मरहितं अव्ययमपक्षयरहितं एतादृशं सर्वविकारशून्यं वेद जानाति सोऽविक्रियात्मदर्शी विद्वान्पुरुषोऽधिकृतः कं हंति न कमपि हंति न कथमपि हंति न कथंचित्कंचित् हंति हननक्रियां करोतीत्यर्थः तथा कं घातयति न कथंचित् किंचित् घातयति हंतारं प्रयोजयतीत्यर्थः उभयत्रापि किंशब्द आक्षेपार्थः न प्रश्नार्थः उत्तरत्र प्रतिवचनादर्शनादिति बोध्यं तथा त्वमपि विद्वान्भूत्वा स्वयं हननक्रियाकर्ता' शिखंड्यादिप्रयोजकश्चेति हननकर्तृत्वकारयितृत्वे स्वस्मिन्नाध्यारोपयेत्याशयः, अत्राविक्रियत्वहेतोर्विदुषः सर्वकर्मनिषेधे समानत्वात्सर्वकर्मप्रतिषेध एव प्रकरणार्थो भगवतोऽभिप्रेतः हंतेस्त्वाक्षेपः पुरःस्फूर्तिकत्वेनोदाहरणार्थो न तु हननमात्राक्षेपेण कर्मांतरं भगवताऽभ्यनुज्ञायते इति मंतव्यं अन्यथा तस्य कार्यं न विद्यते इति तद्वचनविरोधापत्तेरिति बोध्यमित्याहुः।

अन्ये तु न विनष्टुं शीलं यस्य तमविनाशिनं मरणरहितं तत्र हेतुः

स्थायी नश्यति प्रलये इत्यपरं, नित्यस्यैवात्मनो अपूर्वदेहेंद्रियादिसंबंधो जन्म पूर्वदेहेंद्रियादिवियोगो मरणं इदं चोभयं धर्माधर्मनिमित्तकं तदाधारस्य नित्यमेव मुख्यमिति तार्किकाः, नित्यस्याप्यात्मनः कर्णशष्कुलीजन्मना आकाशस्येव देहजन्मना जन्म तन्नाशाच्च मरणं तदुभयमौपाधिकं अमुख्यमेवेत्यन्ये, तत्र अनित्यत्वपक्षेऽप्यात्मनोऽशोच्यत्वं दर्शयति—

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं ।

तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

अथचेति । अथेतिपक्षांतरे चोऽप्यर्थे परिदुर्बोधत्वादात्मवस्तुनो असकृच्छ्रवणेपि अवधारणासामर्थ्यात् मदुक्तपक्षानंगीकारेण पक्षांतरमभ्युपैषि तत्रापि अनित्यपक्षमेवाश्रित्य यद्येनं प्रकृतमात्मानं नित्यजातं क्षणिकत्वपक्षे नित्यं प्रतिक्षणं पक्षांतरे आवश्यकत्वान्नित्यं नियतं जातं जातोयमिति मृतोयमिति च मन्यसे लोकप्रत्ययेन प्रत्यनेकशरीरोत्पत्तिं जन्म प्रत्यनेकशरीरमृतिं विनाशं च कल्पयसीत्यर्थः वाशब्दश्चार्थे । तदापि परमतानुभाषितं अभ्युपेत्य अहो बत महत्पापं कर्तुं व्यवसिता वयं इत्यादेस्तदीयशोकस्य निरवकाशत्वमित्याह, तथापीति । हे महाबाहो तथापि तथाभाविनि आत्मनि एवंप्रकारं अनुशोकं कर्तुं नार्हसि योग्यो न भवसि पापभयेनैव त्वमनुशोचासि तच्च न संभवति क्षणिकत्वपक्षे देहात्मवादपक्षे देहेन सह जन्मविनाशपक्षे च जन्मांतराभावेन पापभयासंभवात् क्षणिकत्वपक्षे दृष्टं दुःखमपि न संभवति बंधुविनाशादर्शित्वादात्मन इत्यधिकं पक्षांतरे च दृष्टदुःखनिमित्तशोकसंभवेपि अदृष्टदुःखनिमित्तशोकस्य सर्वथाऽनुचितत्वमित्यर्थः त्वय्येतादृशी कुमतदृष्टिः न संभवतीतिसूचनार्थं संबोधनं ।

प्रौढ्याऽऽत्मनो वेदबाह्यवादिसिद्धांतमनित्यत्वमभ्युपेत्यापि शोकं अपाकरोति, अथेति । स्थूलमताभ्युपगमेपि शोको न कार्यः किमुत वैदिकमतांगीकार इति भावः शोकमकृत्वा बाह्वोर्महत्वं सार्थकं कुर्विति सूचनाय महाबाहो इत्युक्तमिति नव्याः ॥ २६ ॥

जन्मवतो नाशो नाशवतश्च जन्म इत्येतौ मिथो व्याप्तावित्येवं हेतुना शोकाभावं स्पष्टयति—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।

तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

जातस्येति । जातस्य हि लब्धजन्मनो ध्रुवोऽव्यभिचारी मृत्युर्मरणं मृतस्य च जन्म ध्रुवमव्यभिचारि तस्मात्परिहर्तुमशक्ये जन्ममरणलक्षणेऽर्थे विषये त्वं शोचितुं नार्हसीत्यर्थः ।

अन्ये तु नन्वात्मन आभूतप्रलयस्थायित्वपक्षे नित्यत्वपक्षे च दृष्टादृष्टदुःखसंभवात्तद्भयेन शोचामीत्यत आह, जातस्येति । हि यस्माज्जातस्य धर्माधर्मादिवशाल्लब्धापूर्वदेहादिसंबंधस्य स्थिरस्यात्मनो ध्रुवः आवश्यको मृत्युः तद्देहादिवियोगस्तदारंभककर्मक्षयनिमित्तः "संयोगाः विप्रयोगांता" इत्युक्तेः तथा ध्रुवं जन्म मृतस्य च प्राग्देहकृतकर्मफलोपभोगार्थं तस्मादेव परिहर्तुमशक्ये जन्ममरणलक्षणेऽर्थे विषये त्वमेवं विद्वान्न शोचितुमर्हसि यदि त्वया युद्धेनाहन्यमाना एते जीवेयुरेव तदा युद्धाय शोकस्तवोचितः स्यात् एते तु कर्मक्षयात्स्वयमेव म्रियंत इति तत्परिहारासमर्थस्य तव दृष्टदुःखनिमित्तः शोको नोचित इति भावः एवमदृष्टदुःखनिमित्तेपि शोके तस्मादपरिहार्येऽर्थे इत्येवोत्तरं तथाहि युद्धं हि क्षत्रियस्य नित्यं कर्म अग्निहोत्रादिवद्विहितत्वात् अतोऽग्नीषोमीयादिहिंसावत् न प्रत्यवायजनकं एतच्च 'स्वधर्ममपिच्यावेक्ष्येत्यत्र' स्पष्टीकरिष्यते तथाच युद्धलक्षणेऽर्थे अग्निहोत्रादिवद्विहितत्वात्परिहर्तुमशक्ये तदकरणे प्रत्यवायप्रसंगात् त्वं अदृष्टदुःखभयेन शोचितुं नार्हसीत्यर्थः । यदि तु युद्धं कर्म काम्यमेव तदापि प्रारब्धस्य काम्यस्याप्यवश्यपरिसमाप्यत्वेन नित्यतुल्यत्वादपरिहार्यत्वं तुल्यमेव त्वया युद्धस्यारब्धत्वादिति बोध्यमित्याहुः ।

अपरे तु उक्तश्लोकद्वयं इत्थं योजयन्ति एवं संसारभ्रमविनाशकं आत्मयाथात्म्यविज्ञानमुपदिश्य भगवानेतादृशविज्ञानस्य आत्मप्रसादेन विना लब्धुमशक्यत्वादर्जुने तदनुदयमालक्ष्य पुनः प्रकारान्तरेण तच्छोकं अपाकर्त्तुं इदमाह, अथेति । अथ वा एनमुक्तमात्मानं नित्यजातं यदा यदा देहोत्पत्तिः तदा देहेन सह जातमुत्पन्नं देहे मृते देहेन सहैनं नित्यं मृतं च मूढलोकवत्त्वं यदि मन्यसे तथापि तस्मिन्पक्षेपि एनं नार्हा वयं हंतुं धार्तराष्ट्रानित्युक्तरीत्या शोचितुं नार्हसीत्यर्थः । अस्मिन्पक्षेऽपि शोकस्याकर्त्तव्यत्वे हेतुमाह जातस्येति हि । यस्मात्कारणाज्जातस्य जन्मवतो मृत्युर्मरणं ध्रुवोऽनपायी तथा मृतस्य च जन्म पुनर्जननं ध्रुवं नियतं एवं जन्ममरणयोर्मरणजन्मनोश्चाहोरात्रयोरिव अव्यभिचारी अयं नियमोऽपरिहार्यः तस्मादपरिहार्ये ब्रह्मणापि परिहर्त्तुमशक्येऽर्थे अयं मदीयो

अव्ययं न विद्यते व्ययो अवयवापचयो गुणापचयो वा यस्य निरवयवत्त्वान्नि-र्गुणत्वाच्च तमव्ययं। ननु जन्यत्वे विनाशित्वं अनुमास्यामहे नेत्याह अजं न जायत इत्यजं जनिरहितं तत्र हेतुर्नित्यं सर्वदा विद्यमानं प्रागविद्यमानस्य हि जन्म दृष्टं न तु सर्वदा सत इत्याशयः, यद्वा अविनाशिनं अबाध्यं सत्यं इत्यर्थः नित्यं सर्वव्यापकं तत्र हेतुः अजमव्ययं जन्मविनाशशून्यं जाय-मानस्य विनश्यतश्च सर्वव्यापकत्वसत्यत्वयोः अयोगात् एवं सर्वविकारशून्यं प्रकृतमेनं देहिनं स्वमात्मानं यो वेदशास्त्राचार्योपदेशाभ्यां साक्षात्करोति 'अहं सर्वविकारशून्यः सर्वभासकः सर्वद्वैतरहितः परमानंदबोधरूप इति' स एवं विद्वान्पुरुषः पूर्णरूपः कं हंति न कमपि हंति न कथमपि हंति तथा कमपि न घातयति कथमपि न घातयतीत्यर्थः न हि सर्वविकारशून्यस्य अकर्तुः हननक्रियाया कर्तृत्वं कारयितृत्वं वा संभवतीति भावः। अयमत्र आशयो भगवतः,—वस्तुतः कोपि न करोति न कारयति च किंचित् आत्मनो-ऽद्वितीयत्वात् सर्वविक्रियाशून्यस्वभावत्वाच्च परंतु स्वप्नइव अविद्यया कर्तृत्वभोक्तृत्वादिकं आत्मन्यभिमन्यते मूढो जनः, शुद्धमात्मानं विद्वांस्तु तदज्ञाननिबंधनाध्यासनिवृत्तौ तन्मूलरागद्वेषाद्यभावात् कर्तृत्वभोक्तृत्वाद्य-संभवात् नात्मनि कर्तृत्वादिकमभिमन्यते "ध्यायतीव लेलायतीव" इत्यादि-श्रुतेरितीत्याहुः।

अपरे तु विनष्टुं अदर्शनं गन्तुं शीलमस्येति विनाशि रज्जूरगतुल्यं उपाधित्रयं ततोऽन्यं अविनाशिनं अतएव नित्यं नाशहीनं तत्र हेतुः अजं जन्महीनं। ननु विनाशिस्वकार्यापेक्षया अन्यत्वमजत्वं च प्रधाने नभसि चास्ति इत्यत उक्तमव्ययं न व्ययेति पूर्वावस्थां न त्यजतीत्यव्ययं प्रधानं तु परिणामतः पूर्वावस्थां त्यजति नभस्तु 'तस्माद्वा एतस्मादात्मनः आकाशः संभूत' इत्युत्पत्तिश्रवणात् अंतवत्, अतस्तद्वारणमित्याहुः॥ २१॥

ननु आत्मनः स्वतो विकाराभावेपि पुरातनदेहत्यागे नूतनदेहोपा-दाने च विक्रियावत्वावश्यकत्वात् अविक्रियत्वं असिद्धमित्याशंक्य वासांसि गृह्णतो जहतश्च पुरुषस्य अविक्रियत्वमिव आत्मनोपि देहोपादानत्याग-योरविक्रियत्वमेव इत्यात्मनोऽविक्रियत्वं देहादिभिन्नत्वं तद्धर्मतत्कर्मतद-वस्थाराहित्यं च सूचयितुमाह—

वासांसि जीर्णानि यथा विहाय

नवानि गृह्णाति नरोऽपराणि॥

तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २२ ॥

वासांसीति । नरः पुरुषः स्वयमविक्रियः सन्नेव यथा जीर्णानि दुर्बलतां गतानि वासांसि वस्त्राणि विहाय त्यक्त्वा अपराणि अन्यानि स्वयमविकारात्मना स्थितः सन्नेव नामरूपलक्षणैः पूर्वविपरीतानि नवानि नूतनानि गृह्णाति उपादत्ते तथा तद्वदेव देही आत्मा स्वयमविकारात्मना स्थितः सन्नेव जीर्णानि वयोहानिं गतानि शरीराणि विहाय अन्यानि नामरूपजातिगुणविशेषैः पूर्वविशेषैः पूर्वविलक्षणानि नवानि संयाति संगच्छति विनैव विकारं प्राप्नोतीत्यर्थः, वाससां पुरातनानां त्यागे नवीनानां चोपादाने त्यागोपादानकर्तृलौकिकपुरुषस्य अविकारित्वेनैकरूपत्ववत् आत्मनोपि देहत्यागोपादानयोः अविरुद्धमविक्रियत्वमिति भावः। ननु जीर्णानि वस्त्राणि विहाय नवानि गृह्णन्नरो यथा विक्रियाशून्य एव तथा इत्येतावतैव निर्वाहे अपराणि अन्यानि इति विशेषणद्वयं अनर्थकमिति चेत्, वस्त्राणां शरीराणां च जीर्णत्वनवत्वापरत्वादिमत्वेपि तत्त्यागोपादानकर्त्रोः पुरुषदेहिनोः जीर्णत्वाद्यभावबोधनेन तयोरविक्रियत्वं उच्यत इति न तद्द्वैयर्थ्यमित्यवेहि, अनेन यथा वस्त्राणामेव आगमनिर्गमौ नामरूपवैचित्र्यं शैथिल्यं च न तु पुरुषस्य तथा शरीराणामेव आगमापायौ अवांतरविकारश्च न त्वात्मनो निरवयवस्य इति देहादिभिन्नत्वं अविक्रियत्वं नित्यत्वं चात्मन इति सूचितम् ॥ २२ ॥

पृथिव्यादिभूतचतुष्टयप्रयुक्तविकारभाक्त्वात् असिद्धं आत्मनोऽविक्रियत्वमित्याशंक्य निरवयवत्वादात्मनो न तत्प्रयुक्तविक्रियाभाक्त्वं इत्याह—

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

नैनमिति। शस्त्राणि असयादीनि अतितीक्ष्णान्यपि एनं प्रकृतं देहिनं आत्मानं न छिंदंति अवयवविभागेन द्विधा कर्तुं न शक्नुवंति निरवयवत्वात् उत्तरत्रापि अयमेव हेतुर्योज्यः, तथा पावकोऽग्निः अतिप्रज्वलितोऽपि नैनं दहति भस्मीकर्तुं न शक्नोति आपोऽत्यंतवेगवत्योपि न च एनं आर्द्रीकरणेन विश्लिष्टावयवं कर्तुं शक्नुवंति मारुतो वायुः अतिप्रबलोऽपि न एनं नीरसं कर्तुं शक्नोति तस्य स्नेहवद्द्रव्यस्नेहशोषणेन

तत्र समर्थत्वात् सर्वनाशकाक्षेपे प्रकृतेऽपि युद्धकाले शस्त्रादीनां प्रकृतत्वात् पृथक्कृत्यनिर्देशः आकाशस्य तु नाशकत्वाप्रसिद्धेर्न निर्देशः कृतः, यतो भूतानि न आत्मानं गोचरयितुमर्हन्ति अतो युक्तं आकाशवत्तस्य अविक्रियत्वमिति भावः। एतेन जरारोगादयो भौतिका दैविकाश्च उपद्रवाः सर्वं देहस्यैव न आत्मनोऽहमर्थस्य इति देहादिभिन्नत्वेन आत्मनो देहं निमित्तीकृत्य प्राप्तानर्थागोचरत्वमुक्तं ततः तेषु प्राप्तेष्वपि स्थिरप्रज्ञतया ब्रह्मविद्भिः स्थातव्यमिति सूचितम् ॥ २३ ॥

शस्त्रादीनां तन्नाशकत्वासामर्थ्ये तस्य तज्जनितनाशानर्हत्वे च हेतुमाह-

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।

नित्यः सर्वगतस्थाणुरचलोऽयं सनातनः ॥ २४ ॥

अच्छेद्य इति। यतोऽयं आत्मा अच्छेद्य एव छेत्तमयोग्योऽतो नैनं शस्त्राणि छिदन्ति, यतोऽयं अदाह्योऽतः पावको नैनं दहति, यतोऽयं अक्लेद्योऽतः आपो नैनं क्लेदयंति, यतोऽयं अशोष्योऽतो मारुतो नैनं शोषयति एवकारः प्रत्येकं संबध्यमानो उच्छेद्यत्वाद्यवधारणार्थः, चः समुच्चये हेतौ वा। यतः छेदाद्ययोग्योऽतो नित्यो नित्यत्वात् सर्वगतः सर्वगतत्वात्स्थाणुः स्थिरः स्थिरत्वात् अचलोऽयं आत्माऽतः सनातनश्चिरंतनो न कुतश्चिन्निष्पन्नोऽभिनव इत्यर्थः।

यद्वा उत्तरार्द्धेन छेदाद्ययोग्यत्वे हेतुमाह नित्योऽयं पूर्वापरकोटिरहितोऽनुत्पाद्यः असर्वगतत्वे हि अनित्यत्वं स्यात् अयं तु सर्वगतो विभुः अतो नित्यएव, एतेन प्राप्यत्वं निरस्तं। यदि वा अयं विकारी स्यात् तदा सर्वगतो न स्यात् अयं तु स्थाणुः अविकारी अतः सर्वगत एव, एतेन विकार्यत्वं अपकृतं यदि च अयं चलक्रियावान् स्यात् तदा विकारी स्यात् घटादिवत् अयं तु अचलोऽक्रियो वा अतो न विकारी एतेन संस्कार्यत्वं निरस्तं। यस्मादेवं तस्मात् सनातनोऽयं सर्वदैकरूपो न कस्या अपि क्रियायाः कर्मेत्यर्थः उत्पत्त्यापि विकृतिसंस्कृत्यन्यतरक्रियाफलयोगे हि कर्मत्वं स्यात् अयं तु नित्यत्वान्नोत्पाद्यः अनित्यस्यैव घटादेरुत्पाद्यत्वात् सर्वगतत्वात् न प्राप्यः परिच्छिन्नस्यैव नगरादेः प्राप्यत्वात् स्थाणुत्वात् अविकार्यः विक्रियावतो घृतादेरेव विकार्यत्वात् अचलत्वात् असंस्कार्यः सक्रियस्यैव दर्पणादेः संस्कार्यत्वात् इत्येवं कर्मत्वाभावो बोध्यः। नन्वात्मनोऽविक्रियत्वस्य न जायते म्रियते चेत्यादिना साधितत्वात् तस्यैव पुनः पुनरभिधाने पुनरुक्तिः

इति चेत् पुनः पुनः प्रसंगं आपाद्यापाद्य शब्दांतरेण तदेव वस्तु निरूपयति भगवान्वासुदेवो दुर्बोधत्वात् आत्मवस्तुनः कथंचिदपि संसारिणां बुद्धिगोचरतामापन्नं सत् अव्यक्तं तत्वं संसारनिवृत्तये स्यादित्यवेहि, तदुक्तं भगवता व्यासेन "आवृत्तिसकृदुपदेशादिति"।

अन्ये तु यतो वासांसीत्यनेन देहव्यतिरिक्तत्वं आत्मनः प्रतिपादितं ततो देहस्यैव छेदादयो न तु आत्मनो निरवयवत्वादिति छेदक्लेददहनशोषणानि भूतकार्याणि न प्राप्नुवंत्यात्मनि अतः सनातनोऽनादिः जन्मादिविकारहीनो निरवयवत्वात् 'न तस्य कश्चिज्जनिता न चाधिप' इति तज्जन्मकारणाभावश्रवणाच्च अतएव नित्योऽविनाशी नित्यत्वादेव सर्वगतः परिपूर्णः, नित्यत्वे सर्वगतत्वेपि आत्मनः क्रियाशक्त्याश्रयत्वं स्यात् इति न शंक्यं नित्यत्वादिधर्मवति आकाशे तददर्शनात् अतएव स्थाणुः स्थिरस्वभावः रूपांतरशून्यो अतएव अचलः पूर्वरूपापरित्यागी अयमित्यपरोक्षेण निर्देशः आत्मनो विद्वत्प्रत्यक्षविषयत्वज्ञापनार्थं, सनातनत्वात् नित्यत्वात् पूर्णत्वात् स्थिरत्वात् चलत्वाच्च अयमात्मा अच्छेद्यः छेतुमशक्यः अदाह्यो दग्धुमशक्यः अक्लेद्यः क्लेदनं नाम मृदुत्वहेतोः शिथिलीकरणं तत्कर्त्तुमशक्यः अशोष्यश्च शोषयितुं अशक्य एव यथा देहादि सावयवत्वमूर्त्तत्वद्रवत्वादिधर्मवत्वात् शस्त्रादिना छेदादियोग्यं न तथा आत्मा निरवयवत्वात् मूर्त्तत्वात् अद्रवत्वाच्चेत्यर्थः। सनातनत्वाविशेषणेन निर्विकारत्वं नित्यत्वेन मानांतराबाध्यत्वं स्थिरत्वाचलत्वाभ्यां क्रियाया अनाश्रयत्वमाविषयत्वं पूर्णत्वेनाद्वितीयत्वं आनंदैकरसत्वं चात्मनः सूचितमित्याहुः ॥ २४ ॥

"तरति शोकमात्मवित्" इतिश्रवणात् आत्मनि विज्ञाते शोकनिवृत्तिर्भवति आत्मविज्ञानं तु आत्मानात्मशोधनं विना न सिध्यतीति तच्छोधनमुपक्रम्य वासांसीतिस्थूलशरीरभिन्नत्वं आत्मनः प्रतिपाद्य नैनं छिंदंतीति छेदाद्यविषयत्वे प्रतिपादिते सूक्ष्मकारणयोः शस्त्राद्यविषयत्वसंभवात् आत्मत्वबुद्धिः स्यात् सा मा भूत् इति अव्यक्ताचिंत्यपदाभ्यां तद्भिन्नत्वं प्रतिपादयन् अविकार्यत्वं च वदन् एतल्लक्षणं आत्मानं विदितस्तव न पुनः शोको युक्त इत्युपक्रांतं उपसंहरति—

अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

अव्यक्तोयमिति । अहंकारममकारादिभिः व्यज्यत इति व्यक्तं लिंगशरीरं तद्धर्मतदवस्थासाक्षित्वेन ततो भिन्नत्वात् अयं आत्माऽव्यक्तो व्यक्ताद्भिन्नो ममेदं दुःखं प्राप्तं इति दुःखानुभविता येन ज्ञायते स तस्माद्भिन्न एवेत्यर्थः, तथैव अचिंत्यश्च शोकमोहादिकार्येण अदृष्टादिवाच्चिंत्यतेऽनुमीयत इति चिंत्यं अव्याकृतं अज्ञानं कारणशरीरं तस्माच्चिंत्यादज्ञानात् अयं आत्मा भिन्नो व्यक्तः येन यत् ज्ञायते तत्ततो भिन्नं दृष्टं यथा अयं घट इत्यादिज्ञानविषयो घटादिः तथाऽऽत्माऽपि मां अहं न जानामीति अहमज्ञ इति प्रतीतेः स्वविषयकाज्ञानसाक्षित्वात् चिंत्यादज्ञानात् भिन्न एवेत्यर्थः, तथाऽयं आत्मा निरवयवत्त्वादविकार्यो विकृतेराविषयत्वेन विकर्त्तुमयोग्यः अविकार्यइति अनुत्पाद्यत्वादीनां उपलक्षणं, पुरस्तात्सिद्धं हि ब्रह्मेतिअनादिसिद्धत्वश्रवणात् आत्माऽयं अनुत्पाद्यः नान्योऽतोस्ति विज्ञातेति ज्ञातुः स्वरूपत्वश्रवणादनाप्यः शुद्धोऽबाध्यस्वरूपो बुद्धः सुखस्वरूप इति नित्यशुद्धश्रवणादसंस्कार्यः यस्मादद्वय एवायं आत्मा सन्मात्रो नित्यो शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरेव गत इति श्रुत्योच्यते तस्मात्वमेवं यथोक्तलक्षणं एनमात्मानं अस्थूलं अव्यक्तं अचिंत्यं निष्कलं निष्क्रियं कूटस्थासङ्गचिदानन्दरूपं अहमेवं लक्षण आत्मेति स्वं विज्ञाय नानुशोचितुमर्हसि अहमेतेषां हंता मयैते हन्यंत इति पूर्ववच्छोकं कर्तुं भवान्नार्हतीत्यर्थः । एतेन ब्रह्मविदामद्वैतदर्शिनां न किंचिच्छोच्यमस्तीतिसूचितं भवतीत्येके वदंति ।

अन्ये तु आत्मनो नित्यत्वादिलक्षणं स्पष्टं चेत्किमित्येवं न भासते तत्राह, अव्यक्त इति । त्वंपदार्थशोधनस्य प्रकृतत्वात्तत्रैव हेत्वंतरमाह अव्यक्तोयमिति वा, अव्यक्तो न व्यज्यते इत्यव्यक्तोऽयं रूपादिहीनत्वादिंद्रियागोचरत्वेन अप्रत्यक्षोऽयमात्मेत्यर्थः । माभूत्तर्हि प्रत्यक्षत्वमनुमेयत्वं तु तस्य स्यादित्याशंक्य अप्रत्यक्षत्वादेव तदपि नेत्यह, अचिंत्योऽयं चिंताविषयो ह्यनुमेयो भवति यथा क्वचित्प्रत्यक्षो वन्ह्यादिः गृहीतव्याप्तिकधूमादिदर्शनात् क्वचिदनुमेयो भवति आत्मनस्तु अप्रत्यक्षत्वेन तत्र लिंगव्याप्तिग्रहासंभवान्नानुमेयत्वं इति भावः । नन्वप्रत्यक्षस्यापीन्द्रियादेः सामान्यतोदृष्टानुमानाविषयत्वं दृष्टं यथा रूपाद्युपलब्धिः करणसाध्या क्रियात्वाच्छेदादिक्रियावदित्यादौ तदात्मन्यपि किन्न स्यादित्याशंक्य कूटस्थेन आत्मना व्याप्तलिंगाभावान्न स्यात् इत्याह, अविकार्योऽयं यथा क्षीरं दध्यातंचनादिना विक्रियां प्राप्नोति न तथाऽयं आत्मा विक्रियते निरवयवद्रव्यत्वात् व्यतिरेकेण घटादिवादित्यर्थः ।

ननु निरवयवत्वेऽपि क्रियावत्वे का हानिरिति चेत्, यद्धि सावयवं सक्रियं क्षीरादिद्रव्यं तस्यैव दध्यादिना विक्रियावत्वं दृष्टं न च आत्मनः सावयवत्वं निष्कलं इत्यादिश्रुतिसिद्धनिरवयवत्वविरोधात् अतोऽविक्रियत्वं विक्रियावत्वे च निरवयवत्वहानिरित्यवेहि तथा च विक्रियावत्वादिंद्रियाणां स्वकार्यान्यथानुपपत्त्या कल्प्यत्वेन अर्थापत्तेः सामान्यतोदृष्टानुमानस्य च विषयत्वेऽपि नात्मनः तत्संभवति अविक्रियत्वादितिभावः, लौकिकशब्दस्यापि प्रत्यक्षादिगृहीतसंगतिकत्वेनैव प्रवृत्तेस्तन्निषेधेनैव तत्र तन्निषेधो बोध्यः। ननु वेदविषयत्वं तु स्यादित्यत आह, उच्यत इति। वेदेनापि तात्पर्येण प्रतिपाद्यते न तु मुख्यया वृत्या इत्यर्थः, तंत्वौपनिषदं पुरुषं पृच्छामि नावेदविन्मनुते तं बृहंतं यतो वाचो निवर्तंत इत्यादिश्रुतेः। अशोच्यानित्यादिना व्याख्यातं आत्मयाथात्म्योपदेशं उपसंहरति, तस्मादिति। यस्मादव्यक्तत्वाचिंत्यत्वाविकार्यत्वनित्यत्वसर्वगतत्वादिरूपोऽयमात्मा निर्द्धारितः तस्मादेवं यथोक्तप्रकारेण एनं आत्मानं विदित्वा विज्ञात्वा त्वं नानुशोचितुमर्हसि हंताहमेषां मयैते हन्यंते इत्यनुशोकं कर्तुं न योग्योसीत्यर्थ इत्याहुः।

छेद्यत्वादिग्राहकप्रमाणाभावादपि तदभाव इत्याह, अव्यक्तइत्याद्यर्द्धेन। ननु वेदेनैव तत्र छेद्यत्वादि गृहीष्यत इत्यत आह उच्यते. वेदेनाच्छेद्याऽव्यक्तादिरूपएवाऽयमुच्यते तात्पर्येण प्रतिपाद्यते अतस्तत्प्रतिपादकस्यापि वेदस्य न छेद्यत्वादिप्रतिपादकत्वमित्यर्थः। अत्र नैनं छिंदंतीत्यत्र शस्त्रादीनतन्नाशकत्त्वासामर्थ्याभाव उक्तः अच्छेद्योऽयमित्यादौ तस्य छेदादिकर्मत्वायोग्यत्वमुक्तं अव्ययमित्यत्र छेदादिग्राहकमानाभाव उक्त इत्यपौनरुक्त्यं द्रष्टव्यं। वेदाविनाशिनमित्यादीनां तु श्लोकानां अर्थतश्च शब्दतश्च पौनरुक्त्यं भाष्यकारैः परिहृतं दुर्बोधत्वादात्मवस्तुन इत्यादि वदद्भिः, एवं पूर्वोक्तयुक्तिभिरात्मनो नित्यत्वे निर्विकारत्वे च सिद्धे तत्र शोको नोपपद्यत इत्युपसंहरति तस्मादित्यर्द्धेन एतादृशात्मानमविदित्वा यदन्वशोचस्तद्युक्तमेव आत्मानं विदित्वा तु नानुशोचितुमर्हसि तादृशात्मवेदनस्य शोकनिदानाज्ञाननिवर्त्तकत्वात् "तरति शोकमात्मविदित्यादिश्रुतेः" इत्यर्थ इत्यपरं ॥ २५ ॥

एवमात्मनो निर्विकारत्वेनाशोच्यत्वमुक्त्वा अथ विकारवत्वमभ्युपेत्यापि श्लोकद्वयेनाशोच्यत्वं प्रतिपादयति, तत्र आत्मा ज्ञानस्वरूपः प्रतिक्षणं विनाशीति सौगताः, देह एवात्मा स च स्थिरोप्यनुक्षणपरिणामी जायते नश्यति चेति लोकायतिकाः, देहातिरिक्तोपि देहेन सहैव जायते नश्यति चेत्यन्ये, सर्गाद्यकाल एवाकाशवज्जायते देहभेदेप्यनुवर्त्तमान एवाकल्प-

म्रियत इति त्वं शोचितुं नार्हसीत्यर्थः, इमे भीष्मादिशब्दवाच्या सर्वे देहा मायाकार्यत्वेनासत्वात् एते मदीया इति कदापि न शोचनीयमिति सूचयतीति ॥ २७ ॥

नन्वात्मनो नित्यत्वादशोच्यत्वेपि कार्यकारणसंघातात्मकानि भूतानि उद्दिश्य शोचामीत्याशंक्य परिहरति—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

अव्यक्तादीनीति । उत्पत्तेः प्रागव्यक्तं अनुपलब्धिरादिर्येषां तान्यव्यक्तादीनि भूतानि भूतमयानि शरीराणि न हि कार्यकारणसंघातरूपाणि भूतानि प्रागुत्पत्तेरुपलभ्यंते अतस्तथाव्यपदेशभांजि भवंतीत्यर्थः, तथोत्पत्तेरूर्द्ध्वं मरणाच्च पूर्वं व्यक्तमुपलब्धिः मध्यं व्यावहारिकं सत्वं येषां तानि भूतानि, तथा अव्यक्तमनुपलब्धिः निधनं मरणं येषां तान्यव्यक्तनिधनान्येवेत्यर्थः, "अदर्शनादापतितः पुनश्चादर्शनं गतः" इति पुराणोक्ते भूतसंघ इति शेषः । यद्वा आदौ जन्मनः प्राक् अव्यक्तानि अनुपलब्धानि भूतानि भूतमयानि शरीराणि मध्ये जन्मानंतरं मरणात् प्राक् व्यक्तानि उपलब्धानि संति निधने पुनरव्यक्तान्येव भवंतीत्यर्थः । एवं सति तत्र तेषु अदृष्टदृष्टनष्टेषु पूर्वमदृष्टेषु मध्ये दृष्टेषु पुनरन्ते प्रनष्टेषु भ्रांतिविषयतया घटीयंत्रवच्चक्रीभूतेषु पुत्रमित्रादिकार्यकरणसंघातात्मकेषु शरीरेषु का परिदेवना को वा दुःखप्रलापः शोकनिमित्तस्य प्रलापस्यावकाशो नास्तीत्यर्थः, न हि स्वप्ने बहुविधान्बन्धूनुपलभ्य प्रतिबुद्धः तद्वियोगेन शोचति प्राकृतोऽपि जनः किंपुनस्त्वादृशो अतः शरीराण्युद्दिश्य शोको नोचित इति भावः । यथा भरतादयोऽव्यक्तात् भूत्वा व्यक्त एव लयं गताः तथा इमे इति सूचनाय भारतेत्युक्तं ।

अन्ये तु अव्यक्तं अव्याकृतं अविद्योपहितं चैतन्यमादिः प्रागवस्था येषां तानि, यद्वा प्रमाणैर्न व्यज्यते व्यक्तीकर्त्तुं न शक्यत इत्यव्यक्तं परं ब्रह्म तदज्ञानात् आदिर्जन्म येषां तान्यव्यक्तादीनि शुक्त्यज्ञानाद्रजतवत् आत्माज्ञानाल्लब्धजन्मानीत्यर्थः, तथा व्यक्तं अविद्यकाभ्यामेव नामरूपाभ्यां प्रकटीभूतं न तु स्वेन परमार्थरूपेण मध्यं स्थित्यवस्था येषां तानि, यद्वा सर्वं व्यंजयतीति व्यक्तं अंतःकरणं मध्ये स्थितिकाले येषां तानि देवतिर्यङ्मनुष्यादिभेदं स्त्रीपुंसादिभेदं पितृपुत्रादिभेदं अहं ममायमित्यादिसंबंधं च

कल्पयित्वांतःकरणमेव प्रपंचनिर्वाहं करोति तेन व्यक्तमध्यानि यावदधिष्ठानादर्शनं तावत्तेषां सत्तास्फूर्त्यादीनि सवासनांतःकरणबलादेव भवंति तस्माद्व्यक्तमध्यानि इत्युच्यंते भूतानि, मनोवृत्तिमयं द्वैतमद्वैतं परमार्थत इत्युक्तेः, तथाऽव्यक्ते स्वकारणे मृदीव घटादीनां निधनं प्रलयो येषां तादृशानि भूतान्याकाशादीनि, तत्र तेषु का परिदेवनेतिपूर्ववत् "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेत्यादिश्रुतेः" तथाचाज्ञानकल्पितत्वेन तुच्छानि आकाशादिभूतान्युद्दिश्य शोकोऽनुचितश्चेत् किमु वक्तव्यं तत्कार्याण्युद्दिश्य नोचित इति भावः। यद्वा सत्यधिष्ठानदर्शने पुनरव्यक्तनिधनानि अव्यक्ते स्वाधिष्ठाने ब्रह्मणि निधनं लयो येषां तानि तथाच अधिष्ठानाज्ञानादुत्पन्नानि यावदधिष्ठानं न ज्ञायते तावत् स्वतः स्वरूपवंतीव भूतानि मरीचिजलवत् भान्ति सत्यधिष्ठानदर्शने अधिष्ठानमात्राण्येव भवंति न ततो भिद्यंते तत्र मरुमरीच्युदकवत् प्रातिभासमात्रेऽधिष्ठानाज्ञानविजृंभिते देहादिप्रपंचे अधिष्ठानसंदर्शनेन सर्वं ब्रह्मैवेति पश्यतो विदुषः का परिदेवना परिदेवनायाः प्रविलापनस्य कुतोऽवकाश इत्यर्थः, भारतेत्यनेन शुद्धवंशोद्भवत्वेन शास्त्रीयं प्रमेयं प्रतिपत्तुमर्हासि किमिति न प्रतिपद्यस इति सूचितमित्याहुः।

अपरे तु नामरूपगुणादिभिः न व्यज्यते इत्यव्यक्तं प्रधानं आदिः उत्पत्तेः पूर्वं रूपं येषां तान्यव्यक्तादीनि भूतानि शरीराणि कारणात्मना स्थितानामेवोत्पत्तेः, यद्वाऽव्यक्तात्सकाशात् आदिर्जन्म येषां तानि भवन्तीति भूतानि व्यक्तं व्यक्तता मध्ये येषां तानि व्यक्तमध्यानि देवतिर्यङ्मनुष्यब्राह्मणादय इत्याभासतो मध्ये लब्धस्वरूपाणि, यद्वा व्यक्तमभिव्यक्तं मध्यं जन्ममरणांतरालस्थितिलक्षणं येषां तानि व्यक्तमध्यानि तथा अव्यक्ते मायायां निधनं लयो येषां तान्यव्यक्तनिधनानि ऐंद्रजालिकवत् दृष्टनष्टस्वरूपाणि मायाकार्याणि,—

यथा स्वप्नप्रपंचोऽयं मयि मायाविजृंभितः।
तथा जाग्रत्प्रपंचोऽयं मयि मायाविजृंभितः॥

इत्याद्युक्तेः, एवं स्वप्नार्थवन्मायिकमेवेदं सर्वं इति सर्वस्य मायाकार्यत्वमेव पश्यतः पुरुषस्य तत्र मायाकार्येषु मिथ्याभूतदेहादिपदार्थेषु ममाऽयं हन्यत इति का परिदेवना कः शोकनिमित्तः।विप्रलापः स्वप्नदृष्टबंधुष्विव प्रतिबुद्धस्य शोको न युज्यते इत्यर्थः इत्याहुः॥ २८॥

ननु विद्वांसोऽपि बहवः शोचंति तत्किं मामेव पुनः पुनरेवं उपालभसे इत्यांशक्यान्येषामपि तवेव आत्मापरिज्ञानादेव शोकस्तस्य दुर्विज्ञेयत्वात् इत्यभिप्रेत्यात्मनो दुर्विज्ञेयतामाह—

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥

आश्चर्यवदिति । कश्चित् शमादिसाधनसंपन्नः पुरुषः एनं प्रकृतं देहिनं आश्चर्यवत् आश्चर्यमद्भुतं अदृष्टपूर्वमकस्माद्दृश्यमानं तेन तुल्यं आश्चर्यवत् आश्चर्यमिव संतमप्यसंतामिव स्वप्रकाशचैतन्यरूपमपि जडमिव आनंदघनमपि दुःखिनमिव निर्विकारमपि सविकारमिव नित्यमप्यनित्यमिव प्रकाशमानमप्यप्रकाशमानमिव ब्रह्माभिंन्नमपि तद्भिन्नमिव मुक्तमपि बद्धमिव अद्वितीयमपि साद्वितीयमिवेत्येवं आविद्यकनानाविधविरुद्धधर्मवत्तया असंभाविताविचित्रानेकाकारप्रतीतिविषयं पश्यति शास्त्राचार्योपदेशाभ्यां अविद्यकसर्वद्वैतनिषेधेन परमात्मस्वरूपमात्राकारायां महावाक्यजन्यायां अंतष्करणवृत्तौ प्रतिफलितं साक्षात्करोति कश्चिदेव पश्यति न तु सर्वः, तथा कश्चिदेनं यत्पश्यति तदाश्चर्यवदिति क्रियाविशेषणं आत्मदर्शनमप्याश्चर्यवदेव यत्स्वरूपतो मिथ्याभूतमपि सत्यस्य व्यंजकं अविद्यकमप्यविद्यायाः निवर्त्तकं अविद्यां निवर्त्तयत्तत्कार्यतया स्वात्मानमपि निवर्त्तयतीति, तथा यः कश्चिदेनं पश्यति स आश्चर्यवदिति कर्तृविशेषणं यतोऽसौ निवृत्ताविद्यातत्कार्योऽपि प्रारब्धकर्मप्राबल्यात्तद्वानिव व्यवहरति सर्वदा समाधिनिष्ठोऽपि व्युत्तिष्ठति व्युत्थितोपि पुनः समाधिमनुभवतीति प्रारब्धकर्मवैचित्र्यात् विचित्रचरित्रः प्राप्तदुःप्रापज्ञानत्वात् सकललोकस्पृहणीयोऽत आश्चर्यवदेव, एवमात्मा तज्ज्ञानं तद्ज्ञाता चेत्येतत्त्रयं अद्भुतवदेव तथाचैषां त्रयाणामाश्चर्यतुल्यत्वेन अत्यंतदुर्लभत्वात् दुर्विज्ञेयोऽयमात्मा नत्वल्पाभ्यासेन लभ्य इति भावः। एवं उपदेष्टुर्दुर्लभत्वादप्यात्मा दुर्विज्ञेयः यो ह्यात्मानं जानाति स एव तं अन्यस्मै ध्रुवं ब्रूयात् अज्ञस्योपदेष्टृत्वासंभवात् जानन्नपि समाहितचित्तः कथं ब्रवीतु व्युत्थितोऽपि परेण ज्ञातुमशक्यः यथाकथंचित् ज्ञातोऽपि लाभपूजाख्यात्यादिप्रयोजनानपेक्षः न ब्रवीत्येव कथंचित् कारुण्यमात्रेण ब्रुवंस्तु परमेश्वरवत् अत्यन्तदुर्लभएवेत्याह, आश्चर्यवदिति । चकारः एनमित्यनुकर्षणार्थः अन्यः सर्वाज्ञजनविलक्षणः नतु यः पश्यति ततोऽन्यः तदन्यत्वे च उपदेष्टृत्वानुपपत्तेः स च यथा जानाति तथैनं आत्मानं आश्चर्यवत् अनुक्तपूर्वमकस्मादुच्यमानमाश्चर्यं

अद्भुतं तद्वदाश्चर्यमिव वदति, एवं क्रियायां कर्त्तरि च आश्चर्यवदिति योज्यं तत्र कर्मणः कर्त्तुश्च प्रागाश्चर्यवत्वं व्याख्यातं क्रियायास्तु व्याख्यायते सर्वशब्दावाच्यस्य शुद्धस्यात्मनो यद्वचनं तदाश्चर्यवत् केनापि शब्देनावाच्यस्य शुद्धस्यात्मनो विशिष्टशक्तेन पदेन भागत्यागलक्षणवृत्त्या कल्पितेन सम्बन्धेन लक्ष्यतावच्छेदकं विनैव प्रतिपादनं तदाश्चर्यवत् निर्विकल्पकसाक्षात्काररूपं इत्याश्चर्यमित्यर्थः। ननु वेदान्तानां स्वार्थतावच्छेदकधर्मान्तरं विना न शुद्धब्रह्मबोधकत्वं शब्दत्वात् यत्र यत्र शब्दत्वं तत्र तत्र न शुद्धवस्तुबोधकत्वं यथा घटादिपदानां तथाहि शब्दस्य हि प्रवृत्तिः शक्त्या लक्षणया गौण्या वा, तत्र शक्तिस्तावत्पदार्थोपस्थित्यनुकूलपदपदार्थयोः साक्षात्सम्बन्धविशेषः सा च सावच्छिन्न एव तस्याअवच्छेदकं च जातिगुणक्रियासम्बन्धसंज्ञासु अन्यतमं भवति यथा मुण्डा गौः शुक्लः पटः पाचको देवदत्तः राज्ञः पुरुषो डित्थोऽयं, न तु शुद्धे ब्रह्मणि पंचस्वन्यतमं संभवति निःसामान्यत्वात् निर्गुणत्वात् निष्क्रियत्वात् असंगत्वात् संज्ञाकर्तृपूर्वाभावात् प्रमाणांतराविषयत्वाच्च तस्मान्न शक्त्या वेदांतानां ब्रह्मबोधकत्वं नापि लक्षणया तद्बोधकत्वं शक्यसंबंधः स्वबोध्यसंबंधो वा लक्षणा तस्या अपि संबन्धघटितत्वादसंगे ब्रह्मण्यसंभवात् लक्ष्यतावच्छेदकधर्मशून्यत्वाच्च ब्रह्मणः लोके हि गंगायां घोषः इत्यादौ तत्पूर्वकमेव तत्प्रवृत्तिदर्शनात्, नापि गौण्या तत् लक्ष्यमाणगुणसंबंधो गौणी तस्या अपि गुणसंबंधनिरूप्यत्वात् निर्गुणेऽसंगे च ब्रह्मणि तयोरसंभवात् तस्मान्न कथमपि वेदान्तानां शुद्धब्रह्मबोधकत्वं इति चेत्, अत्रोच्यते—न तावत् शक्त्या वेदांतानां प्रवृत्त्यनुपपत्तिः गुणनिमित्तेन जातिनिमित्तेन वा तत्वमादिपदानां प्रवृत्त्युपपत्तेः न च निःसामान्ये निर्गुणे ब्रह्मणि सामान्यगुणयोरसंभव इति वाच्यं, वास्तवगुणाद्यसंभवेऽपि कल्पितयोस्तयोस्संभवात्, तदुक्तं वार्त्तिककारैः—

अक्षमा भवतः केयं साधकत्वप्रकल्पने।

किन्न पश्यसि संसारं तत्रैवाज्ञानकल्पितं इति॥

न च विशिष्टस्यैव शाब्दबोधो न शुद्धस्येति वाच्यं तात्पर्यवशात् शुद्धस्यापि शाब्दबोधदर्शनात् यथा गेहे घट इत्युक्ते गेहत्वविशिष्टगेहस्योपस्थितावपि घटाधिकरणतायां योग्यतया केवलगेहस्यैवान्वयः न गेहत्वस्य तथा तत्वंपदाभ्यां सर्वज्ञत्वाकिंचिज्ज्ञत्वादिविशिष्टयोस्तदर्थयोः उपस्थितावपि ऐक्यतायां योग्यतया केवलविशेष्यचिन्मात्रस्यैवान्वयः न तु विशेषणस्येति वेदांतपरिभाषाकृतः। सांप्रदायिकास्तु सर्वज्ञत्वाकिंचिज्ज्ञत्वादयो विशि-

ष्टस्यैव धर्मा न शुद्धस्य तेन तात्पर्यवशाद्विशेषस्य भानेऽपि न शुद्धस्य भानं शुद्धस्य विशेष्यत्वधर्मशून्यत्वात् इतिकृत्वा लक्षणां स्वीचक्रुः यथा सोऽयं देवदत्तइत्यस्मिन्वाक्ये तदिदंपदयोः तत्रेदंताविशिष्टपिंडवाचकत्वेपि तात्पर्याऽनुपपत्या लक्षणया शुद्धस्यैव पिंडस्योपस्थापकत्वं तेन शुद्धपिंडस्यैव शाब्दबोधे भानं न तु विशिष्टस्य तद्वत् तत्त्वमादिपदानां सर्वज्ञत्वाकिंचिज्ज्ञत्वादिविशिष्टवाचकत्वेपि तात्पर्यबलात् लक्षणावृत्त्या शुद्धचिन्मात्रस्यैव बोधकत्वं न च लक्षणायाः संबन्धरूपत्वात् असंगे ब्रह्मण्यसंभवः वाच्यलक्ष्ययोर्वास्तवसंबन्धासंभवेपि कल्पिततादात्म्यसंबंधस्य संभवात् लक्षणायाश्च संबंधमात्ररूपत्वात् कल्पिताकल्पितत्वयोरौदासीन्यत्वात् । सर्वज्ञात्ममुनयस्तु प्रौढ्या गौणीं स्वीचक्रुः तथाहि साभासाज्ञानवाचको भवति यदा तच्छब्दः तदा विभुत्वादिगुणयोगाद्भवतु ब्रह्मणि तच्छब्दस्य गौणी यदा तु साभासाहंकारस्य वाचको भवति त्वंशब्दः तदा प्रत्यक्त्वादिगुणयोगाद्भवतु प्रत्यक्चितित्वं पदगुणवृत्ति तथाच तत्वमादिपदैर्गौण्या वृत्या प्रत्यगभिन्नशुद्धचिन्मात्रब्रह्मण एव बोधो भवति विभुत्वप्रत्यक्त्वयोर्विचार्यमाणयोः स्वरूपानतिरेकात् शुद्धप्रत्यगभिन्नब्रह्मबोधानन्तरं तिरोभूतत्वाद्वा । वार्त्तिककृतस्तु 'आश्चर्यो वक्ता आश्चर्यवद्वदति' इत्यादिश्रुतिस्मृतिवाक्याभिप्रायानुरोधात् विना शक्तिं विना लक्षणां विना संबंधान्तरं च सुप्तोत्थायकवाक्यवत् तत्त्वमस्यादिवाक्यानां शुद्धात्मतत्वबोधकत्वं स्वीचक्रुः । न च विना शक्त्यादिकं शाब्दबोधानुपपत्तिः वृत्त्या पदजन्यपदार्थोपस्थितेस्तद्धेतुत्वात् इति वाच्यं शब्दशक्तेरचिंत्यत्वात्, न च विना संबंधं बोधनेऽपदार्थस्यापि बोधः स्यादिति वाच्यं लक्षणापक्षेऽपि संबंधस्य लक्ष्यालक्ष्यसाधारण्यात् अलक्ष्यस्यापि बोधः स्यादिति तुल्यत्वात्, तर्हि यत्र तात्पर्यमस्ति तस्यैव बोधो नतु अन्यस्येति तात्पर्यविशेषान्नियम इति चेत् तस्यापि सर्वान्प्रत्यविशेषात् सर्वेषामपि बोधप्रसंगः, ननु कश्चिदेव तात्पर्यविशेषमवधारयति न सर्वोऽतो नातिप्रसंग इति चेत् तर्हि पुरुषगत एव कश्चिद्विशेषो निर्दोषस्वरूपो नियामकः स च अस्मिन्पक्षेऽपि न दंडवारितः तथा च यादृशस्य शुद्धांतःकरणस्य तात्पर्यानुसंधानपूर्वकं लक्षणया भवद्भिर्वाक्यार्थबोधोऽङ्गीक्रियते तादृशस्यैव केवलः शब्दविशेषो खंडार्थसाक्षात्कारं विनाऽपि संबंधेन जनयतीति किमनुपपन्नं अस्मिन्पक्षे ब्रह्मणः शब्दवृत्त्यविषयत्वात् यतो वाचो निवर्तन्ते इत्यादिश्रुतिरपि वाचामविषयत्वबोधिका सुतरामुपपन्ना भवति । उक्तार्थज्ञापकानि तद्वाक्यान्यपि संति—

दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः।
शब्दशक्तेरचिंत्यत्वात् विद्मस्तं मोहहानतः॥ १॥

अस्यार्थः वयं तं प्रत्यगभिन्नं ब्रह्म विद्मः इत्यन्वयः। बहुवचनं ब्रह्मसाक्षात्कारवतः पूज्यत्वद्योतनार्थं तत्र हेतुमाह मोहहानतः अज्ञाननिवृत्तिमात्रादित्यर्थः अनेनात्मवेदने मोहनिवृत्तिमात्रमपेक्ष्यते न किमपि प्रकाशमिति सूचितं तदेव विशदयति आत्मत्वाद्बोधरूपिण इति, एतावन्तं कालं अहं घटं पश्यन्नेव आसं इति धारावाहिकानुसंधानान्यथानुपपत्त्या आत्मनो बोधरूपत्वं सिद्धं। नन्वस्त्वात्मबोधने मोहनिवृत्तिमात्रापेक्षा साऽपि कुत इत्यत आह शब्दशक्तेरचिन्त्यत्वात्, तस्या अचिन्त्यत्वमपि शक्तिलक्षणादिकं विनाप्यविद्याद्योतकत्वं। ननु अविद्याया अनादिरूपत्वात्तयैव तस्याः शक्तेर्घातः किन्न स्यादित्यत आह दुर्बलत्वादविद्याया इति, विचारिताविचारितविरोधे विचारित एव बलवानिति न्यायात् अविचारसिद्धत्वात् अविद्याया दुर्बलत्वं अतोऽविद्याया एव घातो न शब्दशक्तेः अन्यथा अविद्यायाः सर्वत्र पूर्वभावित्वेन तद्विरोधिनां उत्तरभाविनां प्रमाणज्ञानानामुत्पत्तिरेव न स्यात् तथा च जगदांध्यप्रसंगः। शब्दशक्तेरचिंत्यत्वं स्वयमेव सदृष्टांतं विवृणोति—

अगृहीत्वैव संबंधमभिधानाभिधेययोः।
हित्वा निद्रां प्रबुध्यन्ते सुषुप्तेर्बोधिताः परैः॥ २॥

परैः अन्यैर्जनैः बोधिताः स्वस्वनामभिराहूताः सन्तः अभिधानाभिधेययोर्नामनामिनोः सम्बन्धमगृहीत्वैव निद्रां हित्वा त्यक्त्वा सुषुप्तेः सकाशात् प्रबुध्यंते प्रबुद्धवच्छुद्धाचित्ताः पुरुषा अपिश्महावाक्यश्रवणानन्तरं सम्बन्धमगृहीत्वैव शब्दमाहात्म्यात्प्रबुध्यन्ते इत्यर्थः। ननु जाग्रत्सुषुप्तावपि नामनामिनोः सम्बन्धग्रहपूर्वकमेव बोधः स्यात् शब्दस्य स्वार्थबोधने सम्बन्धग्रहसापेक्षत्वात् अन्यथा देवत्तनाम्ना मैत्रस्यापि बोधः। स्यादित्याशंक्य 'न हि दृष्टेऽनुपपन्नं नाम' इति न्यायेन परिहरति—

जाग्रद्वन्न यतः शब्दं सुषुप्ते वेत्ति कश्चन।
ध्वस्तेऽतो ज्ञानतोऽज्ञानं ब्रह्मास्मीति भवेत्फलं॥ ३॥

यथा जाग्रति पुरुष इन्द्रियैः शब्दं गृहीत्वा शब्दार्थयोः संबन्धमनुसंधाय अर्थं जानाति न तथा सुषुप्तौ तत्रेन्द्रियाणामुपरतत्वेन शब्देन्द्रिययोः संबन्धाभावात् शब्दाज्जागरणं दृष्ट्वा शब्दनिष्ठं किमपि सामर्थ्यं कल्प्यते येन पुरुषः प्रबुद्धः, तदुक्तं—

"अन्यथानुपपत्तिश्चेत् अस्ति वस्तुप्रसाधिका।
पिनष्टि दृष्टमत्यं सैव सर्वबलाधिका इति॥"

नन्वस्तु शब्दशक्तेरचिन्त्यत्वं ज्ञानादेव अज्ञाननिवृत्तिः इति वाक्यविरोधः त्वया तस्या एव तन्निवर्तकत्वाभ्युपगमात् इति चेन्न ज्ञानद्वारैव शब्दशक्तेरज्ञाननिवर्तकत्वात् इत्यभिप्रेत्याह ध्वस्त इति, वाक्यजन्यज्ञानतो अज्ञाने ध्वस्ते नष्टे सति प्रत्यगभिन्नं ब्रह्म फलं भवेत् अभिव्यक्तं भवेत् ब्रह्मणोऽभिव्यक्त्यतिरिक्तफलत्वानिरूपणात्। ननु अज्ञाननाशिका वृत्तिः स्वयं तिष्ठति नश्यति वा? आद्ये तयैव द्वैतापत्तेः, द्वितीये तु स्वेनैव नश्यति अन्येन वा? नाद्यः आत्माश्रयात्, द्वितीयेपि आत्मना अज्ञानेन तत्कार्येण वा? नाद्यः आत्मनो निर्विकारत्वेन नाशकत्वाभावात्, न द्वितीयः अज्ञानस्य विनष्टत्वात् तृतीयेऽपि यत्किञ्चिदज्ञानकार्येण नश्यति वृत्तिविरोधिना वा? नाद्यः घटादीनां वृत्तिनाशकत्वाभावात् द्वितीये वृत्तेः पश्चाद्भाविन एव विरोधित्वं वक्तव्यं पूर्वभाविनो विरोधित्वे च वृत्तेरुत्पत्तिरेव न स्यात् तच्च पश्चाद्भावि न सम्भवति वृत्तेरेव चरमसाक्षात्कारत्वात् वृत्त्यनन्तरं तन्नाशकस्य कस्यचिदङ्गीकारे तस्यापि नाशकमस्ति न वा? नान्त्यः तेनैव द्वैतापत्तेः, आद्येऽपि स्वयमेव अन्यो वा? स्वयमेव चेत् आत्माश्रयः, द्वितीयेऽपि वृत्तिरेव अन्यो वा? वृत्तिरेव चेत् अन्योन्याश्रयः अन्यश्चेत् तस्यापि नाशकं वक्तव्यमन्यथा तेनैवाद्वैतहानिः, तदपि तृतीयं निवर्त्तते न वा? नान्त्यः तेनैव द्वैतापत्तेः, आद्येऽपि तन्निवर्त्तकं स्वयमेव अन्यो वा? आद्ये आत्माश्रयः, द्वितीयेऽपि तन्निवर्त्त्यो द्वितीयो वा वृत्तिरूपः प्रथमो वा तेभ्योऽन्यो वा? आद्ये अन्योन्याश्रयः, द्वितीये चक्रकं, तृतीये तस्याप्यन्यः तस्याप्यन्यः तस्याप्यन्यः इत्येवमनवस्थाप्राग्लोपाविनिगमनाद्यापत्तेः इति चेन्न, पदार्थानां स्वपरनाशकत्वदर्शनात् इत्यभिप्रेत्याह—

अविद्याघातिनः शब्दात् याऽहं ब्रह्मेतिधीर्भवेत्।
नश्यत्यविद्यया सार्द्धं हत्वा रोगमिवौषधं॥ ४॥

यथौषधं तप्तजलादि अजीर्णादिकं रोगं हत्वा स्वयमपि शाम्यति न किञ्चित् स्वनाशकं अन्यदपेक्षते न च तत्र आत्माश्रयादिदोषः केनचित् स्वीक्रियते स्वभावसिद्धत्वादेव तद्वत् अविद्यानाशिका शब्दजन्या वृत्तिरपि अविद्यां नाशयित्वा स्वयमपि तया सार्धं नश्यतीति न कोऽपि दोषोऽद्वैतवादिनां मते, तस्मात् सर्वेष्वपि पक्षेषु अखण्डब्रह्मबोधकत्वं वेदान्तवाक्यानां सम्भवत्येवेति सिद्धं। तच्च वेदान्तवाक्यं द्विविधं एकं

पदार्थनिष्ठं यथा सत्यं ज्ञानमित्यादि तत्पदार्थपरं योऽयं विज्ञानमयइत्यादि त्वंपदार्थपरं, अपरमभेदरूपवाक्यार्थनिष्ठं यथा तत्वमसीत्यादि, द्विविधस्यापि अस्य अखण्ड एवार्थः अतश्शेषशेषिभावादेव द्वैविध्यं नतु विषयभेदात् इति बोध्यं। ननु किमिदं अखण्डार्थत्वं सत्यादिवाक्यानां किं वा तद्वत्त्वे मानं इति चेत्, अत्रोच्यते—अपर्यायस्वपदोपस्थापितपदार्थसंसर्गागोचरप्रमितिजननयोग्यत्वं अखण्डार्थकत्वं एकप्रातिपदिकार्थमात्रतात्पर्यकत्वं वा। अपर्यायभूतं स्वस्य वाक्यस्य अवयवभूतं च यत्पदं तेनोपस्थापितः स्मारितो योऽर्थः तन्निरूपितो यः संसर्गः तदगोचरा या प्रमा तज्जननयोग्यत्वं इत्यर्थः। गामानायेत्यादिपदानामपि प्रमाजनकत्वमात्रमस्तीति तद्वारणाय संसर्गागोचरेत्युक्तं. घटः कलशः कुम्भः इत्यादिपदेषु अतिव्याप्तिवारणाय पर्यायेति विशेषणं, शुकाद्युदीरितलक्षणवाक्येऽव्याप्तिवारणाय योग्यत्वमित्युक्तं, तच्च सर्वं लक्षणवाक्यं अखण्डार्थकं इत्यभिप्रेत्य द्रष्टव्यं। एकश्चासौ प्रातिपदिकार्थश्च तत्रैव पर्यवसायित्वं तन्मात्रतात्पर्यकत्वं इत्यर्थः। अत्रापि पिकः कोकिलो वायसः काकः इत्यादिपदेषु अतिव्याप्तिवारणाय एकेतिविशेषणं, 'कीदृशं उत्पलं? नीलं उत्पलं' इत्यादिविशिष्टविषयप्रश्नोत्तरवाक्यस्थपदेषु अतिव्याप्तिवारणाय प्रातिपदिकार्थमात्रेत्युक्तं, तथा मानमप्यस्ति सत्यादिवाक्यं स्वपदोपस्थापितार्थसंसर्गागोचरप्रमितिजनकं एकप्रातिपदिकार्थमात्रपरं वा लक्षणवाक्यत्वात् प्रातिपदिकार्थमात्रप्रश्नोत्तरत्वात् प्रकृष्टप्रकाशश्चन्द्रः इत्यादिलौकिकलक्षणवाक्यवत्। ननु सत्यादिवाक्यस्य संसर्गपरत्वे बाधकाभावात् हेतोः अप्रयोजकत्वं इति चेत्, अत्रोच्यते—किं ब्रह्मपदार्थे निर्णीते तत्संर्ग सत्यादिवाक्याद्बोध्यते उत अनिर्णीते? नान्त्यः पदार्थनिर्णयस्य वाक्यार्थनिर्णयहेतुतया अनिर्णीते ब्रह्मपदार्थे तत्संसर्गस्य वाक्येन प्रमापयितुं अशक्यत्वात्, आद्येऽपि किं मानान्तरात् ब्रह्म निर्णीतं उत सत्यादिवाक्यादेव? नाद्यः तस्य तदगोचरत्वात्, द्वितीये तु सत्यादिवाक्यस्य ब्रह्मस्वरूपपरत्वस्यावश्यकत्वात् तत्प्रतिपाद्य पुनर्व्यापारान्तरेण तस्यैव संसर्गप्रतिपादकत्वस्य विरम्य व्यापारप्रसंगेनायोगाच्च ; अतस्तत्स्वरूपमात्रनिष्ठत्वं सत्यादिवाक्यस्य अनिच्छताऽपि अभ्युपेयमेवेति बोध्यं। एवं अस्थूलादिवाक्यस्यापि निषेधमुखेन तत्पदार्थपरत्वं उक्तन्यायेन सिद्धमेव तथा योऽयं विज्ञानमयः इत्यादि त्वंपदार्थशोधकवाक्यमपि अखण्डार्थमेव कतमः आत्मा इति जिज्ञासितप्रत्यगात्ममात्रनिष्ठत्वात् चैतन्या-

तिरिक्ते कल्पितेऽपुरुषार्थे श्रुतितात्पर्यायोगाच्च, एवं सर्वशेषिभूतं तत्वमसीत्यादिमहावाक्यमपि अखण्डार्थं अकार्यकारणद्रव्यविषयसमानाधिकरणवाक्यत्वात् सोऽयं देवदत्तः इति वाक्यवत् परस्परं कार्यकारणभावरहिते ये द्रव्ये तद्विषयसमानाधिकरणवाक्यत्वादित्यर्थः, मृद्घट इत्यत्र वाक्ये व्यभिचारवारणाय अकार्यकारणेत्युक्तं नीलमुत्पलं इत्यत्र तद्वारणाय द्रव्यविषयेति राज्ञः पुरुषः इत्यादिवाक्ये तद्वारणाय समानाधिकरणेति विशेषणं। यद्वा तत्वमस्यादिवाक्यं अखण्डार्थं औपाधिकभेदवत्पदार्थसमानाधिकरणवाक्यत्वात् महत खं कुम्भं खं इतिवाक्यवत् औपाधिकभेदवन्तौ यौ पदार्थौ तद्विषयसमानाधिकरणवाक्यत्वादित्यर्थः अत्र घटाकाशः शरावावच्छिन्नाकाशाद्भिद्यत इति वाक्ये व्यभिचारवारणाय समानाधिकरणेत्युक्तं नीलमुत्पलं इतिवाक्ये तद्वारणाय औपाधिकेत्यादि। नच असिद्धिः जीवपरयोः कार्यकारणभावाभावात् तयोः स्वाभाविकभेदस्य सप्तमाध्यायद्वितीयश्लोकटीकायां निरसिष्यमाणत्वाच्च, नापि विरोधः साध्याभावव्याप्यत्वस्य अभावात् साध्याभावव्याप्तो हेतुर्विरुद्धः इति तल्लक्षणात्, नापि अनैकान्तिकः विपक्षावृत्तेः, नापि तत्त्वमस्यादिवाक्यं विशिष्टार्थं वाक्यत्वात् नीलमुत्पलमितिवत् इति सत्प्रतिपक्षता वाक्यत्वस्य अप्रयोजकत्वात् प्रकृष्टप्रकाशादिवाक्ये व्यभिचाराच्च, नापि बाधः जीवपराभेदस्य अग्रे निरूपयिष्यमाणत्वात्, नापि सोयमित्यत्र दृष्टांते तत्तादिवैशिष्ट्यप्रतीतेः साध्यवैकल्यं इति वाच्यं तदेतत्पदद्वयलक्षितदेवदत्तैक्यस्य तेन प्रतिपादनात्। ननु मुख्यार्थान्वयेऽनुपपत्त्यभावात् न तदेतत्पदयोर्लक्षणा इति चेन्न विकल्पासहत्त्वात्, किं तद्देशकालविशिष्टानुवादेन देवदत्तस्य एतद्देशादिवैशिष्ट्यं प्रतिपाद्यते उत एतद्देशादिविशिष्टस्य तद्देशादिवैशिष्ट्यं किं वा तदेतद्देशकालविशिष्टयोरभेदः अथवा तत्कालाद्युपलक्षितस्य एतत्कालादिविशिष्टाभेदः यद्वा एतत्कालाद्युपलक्षितस्य तत्कालादिविशिष्टाभेदः? नाद्यः एतद्देशकालयोस्तद्देशकालत्वप्रसंगात् अन्यथा तत्कालादिविशिष्टे एतत्कालादिवैशिष्ट्यायोगात्, नापि द्वितीयः तद्देशकालयोरेतद्देशकालत्वप्रसंगात् अन्यथैतद्देशकालविशिष्टे तद्देशकालवैशिष्ट्यायोगात् समानाधिकरणवाक्यस्य पदार्थाभेदप्रमेयत्वात्तदनुपपत्तेः पक्षद्वयेऽपि तुल्यत्त्वाच्च किंचिद्विशिष्टे किंचिद्वैशिष्ट्यमात्रविधाने गामानयेत्यादिवाक्यवत् वैय्यधिकरण्यप्रसंगात् समानाधिकरणवाक्यस्याभेदपरत्वावश्यकत्वाच्च, नापि तृतीयः युगपदेकत्र कालद्वयदेशद्वयप्रसंगात्

अन्यथा तदेतत्कालादिविशिष्टयोरभेदायोगात् विशिष्टयोर्विशेषणविशेष्यतत्संबंधात्मत्वेन अर्थात्तयोर्भेदस्यावश्यकत्वात् एकत्वानुपपत्तेश्च, नापि चतुर्थः तत्कालाद्युपलक्षितस्य तदापि सत्वेनैतत्कालादिविशिष्टस्याभेदायोगात्, नापि पंचमः एतत्कालादौ तत्कालाद्यभेदप्रसंगात् अन्यथैतत्कालाद्युपलक्षितस्य तत्कालादिविशिष्टेऽभेदानुपपत्तेः तस्मादुभयोपलक्षितस्य अभेद एव सोऽयमितिवाक्येन प्रतिपाद्यते इति सिद्धं। ननु सोयमितिपदद्वयं तत्तेदंतयोरेकवृत्तित्वं बोधयति समानाधिकरणत्वात् भिन्नप्रवृत्तिनिमित्तानां शब्दानां एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं इति तल्लक्षणात् कालद्वयवैशिष्ट्यं च क्रमेणैकस्मिन्नप्यविरुद्धमिति नाखंडार्थत्वं दृष्टांतवाक्यस्य। न च विशेष्यस्य तत्तेदंतान्वयपरमिदं वाक्यं न विशिष्टस्य विशिष्टान्वयपरं इति कृत्वाऽखंडार्थकमिति वाच्यं नीलमुत्पलमित्यादिवाक्यस्याप्यखंडार्थतापातादितिचेत्, अत्रोच्यते-सोयमितिपदद्वयन्तत्त्वेदंते एकवृत्ती इति बोधयति, उत सोयमित्येवप्रतीत्याकारः तत्तेदंतयोरेकवृत्तित्वं वाक्यतात्पर्यमिति बोधयति? नाद्यः तदिदंशब्दयोस्तत्तादिविशिष्टे सामर्थ्यग्रहात् तत्तेदंतयोस्तु पदार्थोपसर्जनतया ताभ्यामर्थतोपि प्राधान्येनोपस्थित्यसंभवेन तद्विशेष्यान्वयबोधायोगात्। ननु तत्तेदंतयोः प्राधान्येनोपस्थित्यर्थत्वापायिपदद्वयलक्षणाऽस्तु तथापि तत्तादेरेकवृत्तित्वबोधान्नाखंडार्थत्वं इति चेन्न एकत्वरूपाभेदस्य वाक्यादन्येनानुपस्थितेस्तत्ताद्याश्रयाभेदबोधाभावात् तत्तेदंते एकाश्रिते इति बोधानुपपत्तेः, तर्हि वाक्यमेव तदाश्रयाभेदं प्रतिपाद्य पुनस्तयोस्तन्निष्ठतामपि बोधयतीति चेन्न शब्दस्य विरम्य व्यापारायोगात् तत्तेदंताश्रयत्वस्य अभिन्नयोरेव सिद्धत्वाच्च तदैक्य एव वाक्यस्य पर्यवसानेन तद्विशिष्टपरत्वायोगात्। नचाभेदवाचकपदाभावेपि देवदत्तपदश्रवणात् तत्तेदंते देवदत्तवृत्ती इत्येवं तत्तादेस्तद्वृत्तित्वं बोध्यतामिति वाच्यं देवदत्तद्वयाश्रितत्वेऽपि तदुपपत्तेर्वाक्याद्भेदभ्रमानिवृत्तिप्रसंगात्। द्वितीये तत्तेदंतयोरेकवृत्तित्वे तात्पर्यं इत्यत्रैकपदेनाभिन्नविशिष्टाकारो विवक्षितः उत अभिन्नविशेष्यमात्रं विवक्षितं? नाद्यः स्वविशिष्टे स्ववृत्तेर्बाधितत्वेन तत्र तात्पर्यायोगात्, द्वितीये तु पदद्वयलक्षणां विना विशेष्यमात्रभेदप्रतीत्ययोगात्साऽऽवश्यकी ततश्च लाघवादज्ञातविशेष्याभेद एव तात्पर्यं प्रत्याय्यं न तु तत्तादेस्तद्वृत्तित्वेऽपि गौरवात् तस्यार्थिकत्वाच्चेति द्रष्टव्यं, तस्माल्लक्षणयाऽभेदमात्रमेव वाक्यार्थो न तु परोक्तविशिष्टाभेदः तन्मते तदिदंशब्दयोस्तत्तादिविशिष्टाभिधायकत्वेन तयो-

भेदस्यावश्यकत्वात् अतो विशिष्टयोरभेदस्यापि संभवात् नाखंडार्थत्वं इति निरस्तं तस्माल्लक्षणया वाक्यमखंडार्थमिति न साध्यवैकल्यं दृष्टांतस्येति सिद्धं। नाप्यप्रयोजकत्वं एकमेवाद्वितीयमित्याद्यखंडार्थतात्पर्यग्राहकश्रुतिविरोधस्य विपक्षे बाधकतर्कस्य सत्वात् चैतन्यातिरिक्तस्य मिथ्यात्वेन शास्त्रप्रतिपाद्यत्वायोगाच्च तस्मात्सर्वथाऽपि वेदांतवाक्यानां अखंडार्थबोधकत्वसंभवात् न कोऽपि दोषोऽद्वैतमते इति सिद्धं। तदेवं वचनविषयस्य वक्तुः वचनक्रियायाश्चात्याश्चर्यरूपत्वात् आत्मनो दुर्विज्ञानत्वमुक्त्वा श्रोतुर्दुर्लभत्वादपि तदाह, आश्चर्यवदिति। अन्यो द्रष्टुर्वक्तुश्च मुक्ताद्विलक्षणो मुमुक्षुः वक्तारं ब्रह्मविदं विधिवदुपसृत्य एनं आत्मानमाश्चर्यवत् अश्रुतपूर्वं अकस्माच्छ्रूयमाणमाश्चर्यमद्भुतं तद्वत् शृणोति श्रवणाख्यविचारविषयीकरोति वेदांतवाक्यतात्पर्यनिश्चयेन अवधारयतीत्यर्थः, श्रुत्वा च एनं मननिदिध्यासनपरिपाकाद्वेदादपि साक्षात्करोतीत्यप्याश्चर्यवत् तथाच व्याख्यातं प्रथमपादे; अत्रापि कर्तुराश्चर्यरूपत्वं अनेकजन्मानुष्ठितसुकृतप्रमार्जितमनोमलतयाऽतिदुर्लभत्वात् एवं श्रवणश्रोतव्ययोः आश्चर्यवत्त्वं पूर्ववद्व्याख्येयं। ननु यः श्रवणमननादिकं करोति स आत्मानं वेद इति किमाश्चर्यमतआह नचैव कश्चिदिति। चकारः क्रियाकर्मपदयोरनुषंगार्थः कश्चिदेनं नैव वेद श्रवणादिकं कुर्वन्नपि तदकुर्वंस्तु न वेदेति किमु वाच्यं, ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात् इति न्यायात् सर्वथाऽपि दुर्विज्ञेयोऽयं आत्मेति ज्ञेयं। अत्रार्थे अथर्वशाखीया श्रुतिरपि--

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोऽपि बहवो यं न विद्युः आश्चर्यो भवत्यकुशलोऽनुलब्धावाश्चचर्यो ज्ञाताऽकुशलानुशिष्ट इति। यः परमात्मा सदाचार्यादपि श्रवणाय श्रवणार्थं बहुभिर्न लभ्यः बहूनां सुलभो न भवति किं तु दैववशात् कस्यापीत्यर्थः तथा यं परमात्मानं शृण्वंतोऽपि बहवो न विद्युर्नाविदन् किंतु कश्चिदेव तथाऽस्यात्मनो लब्धौ अकुशलः आचार्य आश्चर्यो भवति मुह्यति तथाऽकुशलेन अनुशिष्ट उपदिष्टो ज्ञाता शिष्योप्याश्चर्यो भवतीति श्रुत्यर्थः।

केचित्तु वज्रपंजरतुल्यस्य सर्वप्रमाणसिद्धस्य प्रपंचस्य कथं रज्जूरगादिवत् अज्ञानप्रभवत्वेनात्यंततुच्छत्वमुच्यते कथं वा कर्मकांडापेक्षितं आत्मनो यज्ञादिकर्तृत्वं चापहृयते इत्याशंक्याह, आश्चर्यवदिति। कश्चित् ज्ञातात्मतत्वः एनं अतीतानंतरश्लोकोक्तभूतग्रामं आश्चर्यमद्भुतं स्वप्नमायेन्द्रजालादिकं तेन तुल्यमाश्चर्यवत् तथाभूतं पश्यति तथा कश्चिदेनं आश्च-

यवद्वदति सत्वेनासत्वेन वा निर्वक्तुमशक्यमप्यनिर्वचनीयेनैव लोकाप्रसिद्धेन रूपेणोपपादयति तथा एनं प्रपंचं अन्य आश्चर्यवच्छृणोति इमे लोका इमे देवा इमे वेदाः इदं सर्वं यदयमात्मेति प्रत्यक्षेण अनात्मतयोपलभ्यमानस्यापि प्रपंचस्य यत्प्रत्यगभिन्नत्वेन श्रवणं तदत्यंतमाश्चर्यं तथा कश्चिदेनं प्रपंचं प्रत्यगनन्यत्वेन श्रुत्वापि शब्दादुक्त्वा दृष्ट्वापि तत्वतो न वेदेत्याहुः, तन्नु अन्यैः एनमित्यनेन बहूवभ्यस्तस्यात्मनः त्यागे सति प्रकरणविरोधात् उपलभ्यमानमूलभूतश्रुतिविरोधाच्च इदं व्याख्यानमुपेक्ष्यं इत्येवं दूषितं अन्यैरपि विद्वद्भिर्विचारणीयम् ।

अन्ये तु ननु वहुभिः पंडितैरात्मतत्त्वं, श्राव्यते श्रूयते मन्यते च तथाप्येतादृशं ज्ञानं न कुत्रचिद्दृश्यते इत्याशंकायां परमेश्वरश्रुत्याचार्यात्मनां प्रसादेन विना लब्धु अशक्यं इति सूचयितुं जिज्ञासुश्रोतृवक्तॄणामतिदुर्लभत्वं वदन्नात्मनो दुर्बोधत्वं प्रतिपादयति भगवान्,आश्चर्यवदिति। शतकोटिसंख्याकेषु मनुष्येषु यः कश्चिन्मत्प्रसादपात्रीभूत एनं कूटस्थासंगसच्चिदानंदरूपं अद्वयमखंडैकरसं पश्यति साक्षात्कर्त्तुमिच्छति स आश्चर्यवदेव भवति लोकैः कर्त्तुमशक्यस्य कर्मणः करणमाश्चर्यं यथा हनुमतः समुद्रलंघनं तद्वत् अत्र सर्वविषयाऽऽशापाशं निर्दह्य मोक्षेच्छाकरणमाश्चर्यं मोक्षेच्छाया बहुजन्मलभ्यत्वेन बहुपुण्यपरिपाकसाध्यत्वेन चित्तप्रसादैकमूलत्वेन चातिदुर्लभत्वान्मोक्षककामा मुमुक्षुरपि संतीर्णाशेषविषयाशासिंधुः शुद्धात्माऽतिदुर्लभ इत्यर्थः, किंचैनं उक्तलक्षणं आत्मानमन्यः पूर्वोक्ताद्दिदृक्षोर्भिन्नः यः कश्चिच्छृणोति सोऽप्याश्चर्यवदेव भवति आकाशगामी पुरुषो यथा तद्वत्प्राणात्ययेऽपि दुस्त्यजेषु भोगेषु वैराग्यमतिदुर्लभं सत्येतस्मिन् ससाधनस्य कर्मणः सन्यासो दुष्कृतः कृतेऽपि च तस्मिन्नमानित्वाद्यक्रोधत्वादिब्रह्मचर्यादिदैवीसाधनसंपत् दुर्लभा तस्यामपि लब्धायां 'अनन्यप्रोक्ते गतिरत्र नास्ति, आचार्यवान्पुरुषो वेद' इति श्रवणात् ब्रह्मविदाचार्यो दुर्लभः लब्धेऽप्युक्तसाधने गुरौ च मत्प्रसादैकलभ्या श्रवणादिनिष्ठा त्वतिदुर्लभा मदनुगृहीतकर्तृश्रवणादेरेव सम्यग्ज्ञानजनकत्वेन मोक्षफलकत्वात् निरुक्तसाधनसंपन्न आत्मनि विषये श्रोता दुर्लभ इत्यर्थः ।तथैव निरुक्तसर्वसाधनसंपन्नो द्रष्टृत्वादिस्वधर्मयुक्तो मत्प्रसादपात्रीभूतो यः कश्चिदुक्तादन्यः श्रवणादिनिष्ठया विज्ञातात्मतत्वो ब्रह्मनिष्ठ एव एनमुक्तलक्षणमात्मानं वदन् उपसन्नाय सच्छिष्याय आत्मतत्वमुपदिशति सोऽप्याश्चर्यवदेव भवति, 'ब्राह्मणः पांडित्यं निर्विद्य बाल्ये न तिष्ठसेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण' इति श्रुत्यु-

क्तब्राह्मणत्वसिद्धिहेतोरतिदुःसाध्यत्वात् उक्तलक्षणो ब्रह्मवित्तत्वोपदेष्टाऽतिदुर्लभ इत्यर्थः। एवं परमार्थच्छोः श्रोतुस्तत्वोपदेष्टुश्च अतिदुर्लभत्वं प्रतिपाद्येदानीमुक्तसाधनसंपद्विधुरस्य माहिमुखस्य आत्मा बोद्धुं न शक्य इत्याह श्रुत्वाप्येनमिति । श्रुत्याचार्यमतप्रसादरहितो मानित्वादिदैवसंपद्विधुरो यः कश्चिदात्मतत्वावगत्यै श्रवणादि करोति स उक्तसाधनवैधुर्यात् शतधा सहस्रधा वा श्रुत्वा श्रवणं कृत्वा अपिशब्दान्मननं च कृत्वापि एनं प्रकृतमात्मानं नैव वेद नैव जानाति ज्ञातुं ज्ञानफलं च प्राप्तुं न शक्नोतीत्यर्थः, एतेन सर्वमिदमहं च ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वविज्ञानं दुर्लभतरमिति सूचितं भवतीत्याहुः ॥ २९ ॥

पूर्वं अव्यक्तादीनीति भीष्यादिशब्दवाच्यार्थस्य अशोच्यत्वमुपसंहृत्य इदानीमात्मनो लक्ष्यार्थस्याशोच्यत्वं उपसंहरति—

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥

देहीति। 'हे भारत आत्मज्ञानसंपन्न देहाः सर्वे उपलब्धिस्थानत्वेनास्य संतीति देही सर्वदेहोपाधिमानयमात्मा सर्वस्य ब्रह्मादिस्तंबांतस्य प्राणिजातस्य देहे वध्यमानेऽपि नित्यं स्वयं अवध्य एव अविक्रियत्वादात्मा घटेषु नष्टेषु तस्थाकाशवत् स्वयं तु न नश्यति यस्मात् तस्मादात्मनोऽनश्यत्वाविज्ञानात् त इमेऽवास्थिता युद्धे प्राणांस्त्यक्त्वा धनानि चेत्युक्तरीत्या भीष्मादिसर्वभूतानि शरीण्येते मदीया म्रियंत इति न त्वं शोचितुमर्हसि एतेषु हन्यमानेष्वपि आत्मा न नश्यतीत्यात्मनो नित्यत्वविज्ञानात् त्वं आत्मानं उद्दिश्य शोकं मोहं च कर्त्तुं न योग्योऽसीत्यर्थः। अत्र देहो नश्यतीति ममायमिति च यस्य देहविषयौ शोकमोहौ न स्तः तस्याप्रतिबद्धापरोक्षज्ञानवतो विदुषः "दैवाधीने शरीरेऽस्मिन्गुणभाव्येन कर्मणा" इतिन्यायेन शरीरस्य प्रारब्धाधीनत्वात् शरीरयात्रार्थमपि न किंचित्कर्म कर्त्तव्यं किमुतापरं इति सिद्धस्य ब्रह्मविदः सर्वकर्मसंन्यास एवाधिकार इति भूतानि न त्वं शोचितुमर्हसीति पदेन सूचितं, वेदाविनाशिनमित्यत्र अयमर्थः स्फुटं निरूपितः।

अन्ये तु अथ प्रकृतमुपसंहरति, देहीति। शरीरचालक आत्मा नित्यं निरंतरं अवध्यो वधार्हो न भवतीति नित्यत्वं प्रोक्तं एक एव सर्वस्य प्राणिजातस्य देहे वर्त्तत इति व्यापकत्वं प्रोक्तं तस्मात्कारणात् सर्वाणि भूतानि भ्रातृसुहृदादीनि शोचितुं नार्हसि तन्निमितं शोको व्यर्थः सर्वभूतेषु वर्त्त-

मानस्यात्मनो नित्यत्वात्, अथ देहनिमित्तं चेत् तर्हि तस्मादधिष्ठानभूतात्सत्यादात्मनः सकाशात् सर्वाणि भूतान्याविर्भवंतीति देहानां अध्यासरूपत्वनिरूपणात्तन्निमितमपि शोको व्यर्थः। एतदेव बृहदारण्यकेऽप्याम्नातं—

स यथोर्णनाभिस्तंतुनोच्चेरद्यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एते आत्मानो व्युच्चरंति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति। तदुक्तं--

इंद्रद्राणी रतांते प्रविशति मनसा रेनसा साकमेतत्।
बुद्ध्यंतर्विश्वजातं ससकलकरणं तेन गर्भं दधाना॥
साव्यक्तं लीयमाना पुनरुदयमिता जागरादौ प्रसूते।
कीटे चोर्णामिवासावुतवहतो निःसरंति स्फुलिंगाः॥ इति

एवमुभयथापि शोको व्यर्थ इत्यर्थ इत्याहुः।

अपरे तु एवमात्मनो दुर्विज्ञानत्वं प्रदर्श्य शोकमोहाकर्त्तव्यत्वरूपं प्रकरणार्थमुपसंहरति, देहीति। हे भारत सर्वस्य प्राणिजातस्य देहे वध्यमानेऽप्ययं देही आत्मा वध्यो न भवतीति नित्यं नियतं यस्मात्तस्माद्देहे वध्यमानेऽप्यात्मनोऽवध्यत्वादेव हेतोः सर्वाणि भूतानि स्थूलसूक्ष्मरूपाणि भीष्मादिशरीराण्युद्दिश्य त्वं न शोचितुमर्हसि स्थूलदेहस्याशोच्यत्वं अपरिहार्यत्वात् लिंगदेहस्य तु आत्मवदवध्यत्वादेवेति स्थूलस्य सूक्ष्मस्य वा देहस्यात्मनो वा शोच्यत्वमयुक्तमिति भावः। भारतादिदेहवद् भीष्मादिदेहा अप्यनित्या एवेति न तान्युद्दिश्य शोचितुमर्हसीति द्योतनार्थं संबोधनमित्याहुः॥ ३०॥

सर्वमिदमहं च ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वविज्ञानमात्मप्रसादनं यस्य जातं तस्य न किंचित् कर्त्तव्यमस्ति तदन्यस्य अहं ममेत्याद्यभिमानवतो मुमुक्षोः ब्राह्मणाः विविदिषंति यज्ञेन दानेनेत्यादिश्रुतिबलाच्चित्तशुद्ध्यर्थं विधिदृष्टः स्वधर्मः कर्त्तव्य एव तद्विना पूर्वोक्तविज्ञानानुत्पत्तेरिति बोधयितुं इदं प्रकरणमारभ्यते, तत्रादौ अर्जुनस्य आत्मज्ञानाभावमालक्ष्य तं स्वभक्तं मुमुक्षुं कर्त्तव्ये स्वधर्मे प्रवर्त्तयति भगवान्--

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते॥३१॥

स्वधर्ममपीत्यादिना। यदा कर्त्ता करणं कार्यं च सर्वं ब्रह्मैवेति विज्ञानं

तदा न किंचित्कर्त्तव्यमेव यद्येते मदीया मया हन्यंत इति भेदज्ञानं तदाऽपि "युद्धं स्वधर्मो नृपतेः प्रजानां परिपालनं" इत्यादिशास्त्रेण क्षात्रियस्य कर्त्तव्यत्वेन विहितं स्वधर्मं युद्धरूपं अवेक्ष्य स्वबुद्ध्या सम्यग्विचार्य त्वं विकंपितुं स्वधर्माच्चलितुं हिंसादिदोषेण भयं प्राप्तुं वा नार्हसि स्वधर्मं त्यक्तुं अयोग्योऽसीत्यर्थः । एतेन युद्धस्य स्वधर्मतया कर्त्तव्यत्वेन विहितत्वात् तत्र याग इव हिंसादिदोषविचारो न कर्त्तव्यो विदुषेति सूचितम् । अथ त्वमेव धर्मं कथय इतिं चेत्तत्राह, धर्म्यादिति । क्षत्रियस्य धर्म्यात् धर्मशास्त्रादागतात् युद्धादन्यदपरं अहिंसाद्यनुष्ठानं श्रेयः श्रेयोजनकं न विद्यते नास्ति जयलब्धधनैकसाध्यैर्यागैर्दानैर्व्रतादिभिः चित्तशुद्धिस्तया विज्ञानं तेन मोक्ष इति युद्धस्य श्रेयःसाधनता युक्ता ततो युद्धं कर्त्तव्यमेवेति सिद्धं । हिशब्दो—

ये युध्यंते प्रधनेषु शूरास्ते ये तनुत्यज इति तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षात्रियस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान् बलीयांसं समाशंसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदंतमाहुर्धर्मं वदतीति धर्मं वा वदंतं सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति-इत्यादिश्रुतिप्रसिद्धिद्योतनार्थः । भाष्यं—तत्तस्मादनंतरं श्रेयोरूपं धर्ममत्यसृजतातिसृष्टं स्थानीयमसृजत तदेतद्वक्ष्यमाणं,तत्किं? क्षत्रियस्य क्षत्रियजातेः क्षात्रलक्षणो धर्मस्तस्माद्धर्मात्परमुत्कृष्टं नास्ति यतः धर्मेण कृत्वा अबलीयान्दुर्बलोपि बलीयांसं समर्थमपि समाशंसते सम्यक्प्रकारेणाक्षिपति यथा राज्ञा स्ववशेन कृत्वा दुर्बलोपि समर्थमाक्षिपति तथेत्यर्थः, एवं वै इति निश्चयेन पूर्वोक्तो यो धर्मः स सत्यं सत्यस्य प्रापकः तत्तस्मात्कारणात्सत्यं वदंतं पुरुषं धर्मं वदतीत्याहुः वा इत्यथवा धर्मं वदंतं पुरुषं सत्यं वदतीत्याहुः एवं सत्यधर्मयोरेकार्थवाचकत्वं अस्तीत्युक्तं हीति निश्चयेन एतद्धर्मसत्याभिधानमुभयं तद्भवति ब्रह्मरूपं भवति "तत्त्वमसि तत्सद्ब्रह्मेतिश्रुतेः" ॥ ३१ ॥

अथ श्रुत्यर्थमेव दृढीकुर्वन् ननु जयश्चेत्स्यात् युद्धस्य श्रेयःसाधनता स्यान्मरणं चेत्स्यात् तदा न किमप्यस्तीत्याशंकां निराकरोति—

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं ।
सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं ॥ ३२ ॥

यदृच्छयेति । हे पार्थ पृथापुत्र यदृच्छयैवोपपन्नं आयासं विनैव प्राप्तं अपा-

वृतं चोद्घाटितकपाटं स्वर्गद्वारं स्वर्गप्राप्तिद्वारभूतमीदृशं जयाद्यभिनिवेश-रहितं दुर्लभं च युद्धं सुखिनः स्वर्गसुखार्थिनः सुकृतिनो वा क्षत्रियाः पुण्येन लभन्ते भाग्यवतामेवेदृशं युद्धमभ्यागच्छतीत्यर्थः, युद्धे मृतस्याप्य-स्ति स्वर्गसुखमित्यत उभयथापि फलहेतुत्वादवश्यं युद्धं कर्त्तव्यमिति भावः।

अन्ये तु इदं श्लोकद्वयं इत्थं योजयन्ति—तद्यथा एवं स्थूलसूक्ष्मकारणा-ख्योपाधित्रयादात्मानं विविच्य तत्स्वरूपप्रदर्शनेन तदविवेककृतमात्मतत्त्ववि-षयं भ्रमं निराकृत्यार्जुनस्य अथ युद्धाख्ये स्वधर्मे हिंसादिदोषबाहुल्येना-धर्मत्वभ्रमं निराकर्त्तुं हिंसादिमत्त्वेपि युद्धस्य स्वधर्मत्वेन शास्त्रविहितत्वा-दधर्मत्वाभावं बोधयति भगवान्, स्वधर्ममपीति। न केवलं परमार्थतत्त्वमे-वावेक्ष्य शोकमोहौ त्यक्त्वा युद्धचलनं परिहर्त्तव्यं किंतु स्वधर्ममपि स्वकी-यं क्षात्रधर्ममपि युद्धापराङ्मुखत्वरूपं अवेक्ष्य शास्त्रतः पर्यालोच्य विकं-पितुं धर्माद्विचलितुमधर्मत्वभ्रान्त्या निवर्तितुं नार्हसि कस्मात् हि यस्मा-द्धर्म्यात् अपराङ्मुखत्वधर्मादनपेतात् युद्धादन्यत् क्षत्रियस्य श्रेयः साधनं न विद्यते युद्धमेव हि पृथिवीजयद्वारेण प्रजारक्षणब्राह्मणसेवादिक्षात्रधर्म-निर्वाहकं अतस्तदेव क्षत्रियस्य प्रशस्ततरमिति भावः। तदुक्तं पराशरेण—

> क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डवान्।
> निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत्॥

मनुनाप्युक्तं—

> समोत्तमाधमै राजा वाऽऽहूतः पालयन्प्रजाः।
> न निवर्त्तेत संग्रामात् क्षात्रधर्ममनुस्मरन्॥
> संग्रामेष्वनिवार्त्तित्वं प्रजानां चैव पालनं।
> शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परं॥

इत्यादि तस्मात्क्षत्रियस्य युद्धं प्रशस्तो धर्म इति साधु भगवत्संमतं, किंच स्वधर्मत्वाद्युद्धं प्रयत्नेनापि क्षत्रियैः संपाद्यते तव तु भाग्यवशाद्यत्नं विनैवोपपन्नं अतो महति श्रेयसि स्वयमेवागते सति ततो निवृत्तिरयुक्तेवेत्याह, यदृच्छयेति। हे पार्थ यदृच्छया च अप्रार्थनयैवोपपन्नं प्राप्तं ईदृशं भीष्मद्रो-णादिमहावीरपुरुषप्रतियोगिकं स्वकीर्तिराज्यलाभदृष्टफलसाधनं युद्धं ये क्षत्रियाः लभन्ते ते सुखिनः सुखभाज एव जये सति यशसो राज्यस्य च लाभात् पराजये चातिशीघ्रमेव स्वर्गस्य लाभादित्याह, स्वर्गद्वारमपावृतं। अप्रतिबद्धं स्वर्गसाधनं युद्धं अव्यवधानेनैव स्वर्गजनकं ज्योतिष्टोमादिकं

तानुभवसिद्धिः । एवम् "अहमस्वाप्सम्" इति सौषुप्तिकाऽऽत्मपरामर्शादपि नित्यानुभवसिद्धिः । परामर्शहेत्वनुभवस्य सुषुप्तावन्यस्यासंभवात् । परामर्शत्वं चास्य परिशेषादिति वक्ष्यते ।

अन्धादिज्ञाने प्रामाण्यारोपादर्शनात् तत्तुल्यत्वे तदारोपोऽपि न स्यादित्याह—विषयेति । भ्रान्तिज्ञानमात्रे प्रामाण्यारोपस्य जाग्रत्यदर्शनात्स्वप्नेऽपि स न स्यादित्याह—तस्येति । ज्ञानलक्षणप्रत्यासत्तेश्च निरधिष्ठानत्वाच्चास्य मानसत्वायोगाच्च तदपरोक्षतायै नित्यस्फुरणमेषितव्यमित्यभिप्रेत्याऽऽह—तथा चेति । स्मृतेर्मनःप्रत्यासत्तित्वेऽपि तदपरोक्षता न स्यादित्याह—स्मर्यमाणेति । इष्टापत्तिमाशङ्क्याऽऽह—तथा चेति । वस्तुतो व्यवहितेऽप्यव्यवहितत्वं भ्रांत्या प्रतीयत इति शङ्कते—स्मर्यमाण इति । तथाप्यपरोक्षो गजादिरित्येतादृशानुभवानुपपत्तिः । न चापरोक्षत्वमपि तत्राऽऽरोपितमिति वाच्यम् । स्वप्नज्ञानस्वरूप इव तदा परोक्षेऽपि बाधाभावात् । तथा च जाग्रतीव संविदभेदेनैवापरोक्ष्यं स्वप्नगजादेरावश्यकम् । अनित्यसंविदोऽसंभवात्तन्नित्यत्वसिद्धिरित्यभिप्रेत्याऽऽह—सन्निहितत्वारोपे हीति । स्वप्नवदेव सुषुप्तावप्यनुभवस्याऽऽवश्यकत्वात्तदा जन्यस्यासंभवान्नित्यानुभवसिद्धिरित्याह—एवमहमिति ।

ननु सुखमहमस्वाप्समिति स्वापकालीनदुःखाभावानुमितिरियं, न सुषुप्तिकालीनसुखादिपरामर्शः, येन सुषुप्तावप्यनुभवो भवेदित्यत आह—परामर्शत्वं चेति । वक्ष्यत इति । आनंदवादे इत्यर्थः ।

अवस्थात्रयसाक्षिनित्यानुभवचिन्तायाः फलचिन्तामारभते । स चायमिति ।

आत्मनो नैरूप्यप्रतिपादनम् ।

स चायमवस्थात्रयतद्भावसाक्षी नित्यः स्वतन्त्रः सर्वगतोऽनुभव—आत्मा । तद्भेदे प्रमाणाभावात्, तदभेदे च प्रकृतस्य दृश्यत्वहेतोरेव मानत्वात् । "आत्मैवास्य ज्योतिः प्रज्ञानं ब्रह्म" इति श्रुतेश्च । अत्राऽऽह नवीनः—

आत्मनो ज्ञानमात्रत्वनिरासशङ्का ।

आत्मरूपं ज्ञानं सविषयं निर्विषयं वा ?। आद्येऽपि स्वविषयं परविषयं वा ? नाद्यः ! स्ववृत्तिविरोधात् । न द्वितीयः । मोक्षे पराभावात् । अतीतपरोल्लेखे च सुषुप्तिमोक्षयोरतीतविषययोस्तुल्यत्वापातात् । नापि निर्विषयम् । ज्ञानत्वविरोधात् । अर्थप्रकाशस्यैव ज्ञानत्वात् । अन्यथा घटादेरपि तत्त्वापत्तेः । अर्थाप्रकाशात्मकजडव्यावृत्तिरप्यर्थप्रकाशात्मकत्वं विना न युक्ता ।

एवं ज्ञात्रभावादपि न ज्ञानम् । न हि भोक्तृभोग्यरहिता मुक्तिरस्ति । न च ज्ञानस्यानादित्वात्तदनपेक्षा । अनादेः प्रागभावस्य प्रतियोगिनि, जीवब्रह्मविभागस्य धर्मिप्रतियोगिनोः, भावरूपाज्ञानस्याऽऽश्रयविषययोः अनपेक्षाप्रसङ्गात् । ज्ञानस्य ज्ञातृज्ञेयनिरूप्यस्वभावत्वाच्च, इदमहं जानामीत्यनुभवात् ।

उक्तानुभवस्यात्माभेदेऽपि प्रमाणं नास्तीत्यत आह–तदभेदे चेति। अहमनुभवगोचरो, अहमनुभवे प्रकाशमानस्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वादित्यनुमितद्रष्टुर्जडत्वे दृश्यत्वापत्त्या द्रष्ट्रन्तरापेक्षायामनवस्थापातात् दृग्रूपत्वसिद्धेरित्यर्थः । श्रुतिरपि ज्ञानात्माऽभेदे प्रमाणमित्याह--आत्मैवेति । अस्य व्यवहर्त्तुर्व्यवहारसाधनप्रकाश आत्मैवेत्यर्थः । आत्मनश्चिद्रूपत्वमनादृत्य जडत्वमेव बहुमन्यमानस्याभाग्यस्य नवीनस्य प्रलापमनुवदति–अत्राऽऽहेति । भेदसापेक्षविषयविषयिभावस्यैकस्मिन्नसंभव इत्याह – नाद्य इति । परविषयत्वपक्षं दूषयति । न द्वितीय इति । न च मोक्षे द्वैताभावोऽस्तीति वाच्यम् । तदानीमाध्यासिकसंबंधाभावेन चैतन्यस्य तद्विषयत्वायोगात्, तस्याप्यात्ममात्रत्वाच्चेति भावः । ननु तदाऽप्यतीतविषयेण सविषयमिति चेत् तर्ह्यतीतसंसारेण संसार्यपि स्यादित्याह – अतीतेति । सविषयत्वाभावेऽप्यात्मत्ववत् ज्ञानत्वं किं न स्यादित्यत आह – अर्थप्रकाशस्यैवेति । जडव्यावृत्तस्य रूपस्यैव ज्ञानत्वान्न जडत्वप्रसक्तिरित्याशङ्क्याऽऽह – अर्थप्रकाशेति ।

आत्मरूपज्ञानस्याऽऽश्रयानिरूपणादपि न तस्य ज्ञानत्वमित्याह – एवमिति । अहमिदं जानामीति ज्ञातृज्ञेयसम्बन्धिन एव ज्ञानत्वानुभवात्तद्रहितस्य ज्ञानत्वमेवायुक्तमित्याह – न हि भोक्तृभोग्येति । उक्तज्ञानमाश्रयनिरपेक्षमनादित्वादात्मवदित्याशङ्क्य व्यभिचारेण दूषयति । न च ज्ञानस्येति ।

अनादित्वे सत्यनन्तत्वस्य हेतुत्वान्न व्यभिचार इत्याशङ्क्य तथात्वे ज्ञानत्वमेव न स्यादित्यभिप्रेत्याऽऽह – ज्ञानस्येति ।

नवीनमतेनैव आत्मनोऽज्ञानप्रमेयत्वनिरसनम्

किञ्च न तावदात्मरूपं ज्ञानं प्रमा तद्धद्याविद्यादेस्तात्त्विकत्वप्रसङ्गात् । नापि भ्रमः दोषाजन्यत्वात् । तद्विलक्षणस्य ज्ञानस्याप्रसिद्धेः । यदीदं ज्ञानमज्ञानविरोधि तदा तन्नित्यनिवृत्तं स्यात् । न चेत्--पटादिवत् ज्ञानमपि न स्यात् । स्मृतिपरोक्षज्ञाने विहायापरोक्षज्ञानस्यैवाऽऽत्मत्वे हेत्वभावाच्च ।

किञ्च यस्य ममाज्ञानं सोऽहं दुःखमनुभवामीत्यादिप्रत्यक्षेण "यो वेद इदं जिघ्राणीति स एष हि द्रष्टा श्रोता घ्राता"इत्यादिश्रुतेश्च दुःखादिभोगरूपस्यानर्थस्य मोक्षसामानाधिकरण्यं, संसारस्य च समानाधिकरणज्ञाननिवर्त्यत्वमित्यादियुक्तेश्च जीवस्य ज्ञातृत्वात्कथं ज्ञानमात्रत्वमिति ?—

नवीनकृतशङ्कायाः समर्थनम्

उच्यते । सत्यमर्थप्रकाशो ज्ञानम् । आत्मस्वरूपज्ञानं चार्थप्रकाशः । प्रकाशस्य तद्रूपत्वात् । मुक्तौ तु प्रपञ्चाभावान्न तत्प्रकाशः । न वा तदाऽतीतार्थप्रकाशः । स्वरूपज्ञानस्य स्वसंसृष्टार्थमात्रप्रकाशत्वात् । अत एव मुक्तौ नोपप्लवोऽपि ।

किमात्मरूपं ज्ञानं प्रमा, उत भ्रमः, किं वोभयबहिर्भूतम्? नाद्य इत्याह – न तावदिति । न द्वितीय इत्याह – नापीति । भ्रमस्य दोषजन्यत्वनियमादित्यर्थः । तृतीयं दूषयति । तद्विलक्षणस्येति । प्रमाऽप्रमाविलक्षणस्येत्यर्थः । किमात्मरूपं ज्ञानमज्ञानविरोधि उत न? उभयथाऽप्यनुपपत्तिरित्याह – यदीदं ज्ञानमिति । किं च तव मते किंचित् ज्ञानमात्मा किञ्चिज्ज्ञानात्मेति व्यवस्थायां हेतुं न पश्यामीत्याह – स्मृतिपरोक्षेति ।

यच्चोक्तं 'तद्भेदे प्रमाणाभावात्'इति । तदयुक्तम् । प्रत्यक्षश्रुतियुक्तीनां सत्त्वादित्याह-किञ्च यस्य ममेति । तव मते केवलात्मन एवाज्ञानाश्रयत्वात् दुःखतदनुभवादीनामज्ञानसामानाधिकरण्यप्रतीतेरनुभवस्याऽऽत्मधर्मत्वसिद्धिरित्यर्थः । श्रुतिमाह – यो वेदेति । ननु इदं जिघ्राणीत्येवंरूपेण प्रमेयप्रमाणप्रमातृसमुदायं यो वेत्ति तत्त्रितयसाक्षी स आत्मेति साक्षिण एव ज्ञानमात्मत्वं श्रुत्यर्थ, इति चेन्न । यो वेदेति वेदनाश्रयस्यैवाऽऽत्मत्वाभिधानादिति भावः । ज्ञानात्मभेदसाधकयुक्तिमप्याह – दुःखादीति । स्वतः शुक्लस्यापि पटस्य रक्तद्रव्योपरागे रक्तवत् स्वतो निर्विषयप्रकाशस्वभावस्याऽऽत्मनो घटपटाद्युपरागे सविषयत्वं, तदपाये – रक्तद्रव्यापाये पटशौक्ल्यवत्, स्वाभाविकनिर्विषयप्रकाशात्मत्वमेव । तथा च न सविषयत्वानुभवविरोध इत्यभिप्रेत्य सिद्धांतयति । उच्यत इति । मुक्तावतीतार्थविषयोऽनङ्गीकारपराहतःअयुक्तश्चेत्याह – न वा तदेति । मुक्तौ निर्विषयत्वादेव न संसारप्रसङ्ग इत्याह – अत एवेति ।

मुक्तौ ज्ञेयाभावे ज्ञानाभावप्रसङ्गात् शून्यतापत्तिरित्याशङ्क्याऽऽह – न चैवं तस्येति ।

मुक्तौज्ञानाभावनिरासः

न चैवं तस्य मुक्तौ निःस्वरूपत्वं स्यादर्थप्रकाशत्वाभावादिति वाच्यम् । अर्थप्रकाशत्वं हि ज्ञानस्योपलक्षणं–व्यावृत्तौ लिङ्गं, न तु स्वरूपं, न वा विशेषणम् । सर्वदाऽर्थप्रकाशत्वस्यैव ज्ञानस्वरूपत्वे तटस्थेश्वरज्ञाने नित्ये सर्वार्थप्रकाशो न स्यात् । तस्य कार्यविरहकाले तदप्रकाशत्वात् । न च घटादिविरहकालेऽपि तस्य तद्गोचरत्वात्तत्प्रकाशत्वमस्तीति वाच्यम् । ज्ञानं हि स्वसंबद्धमेव विषयीकरोति नासंबद्धम् । ननु स्वरूपसम्बन्धोऽस्तीति चेन्न । तत्काले सतोरेव हि स्वरूपसंबन्धः, न सदसतोः निःस्वरूपत्वात् । अतीतादिश्च तव मते निःस्वरूप एव । अन्यथा प्रागभावप्रध्वंसाभ्यां प्रतियोगिन एककालत्वप्रसंगात् । प्रागभावादिकाले तत्सत्तानङ्गीकारे चासत्त्वं नाम निःस्वरूपत्वमेव स्यात् । नन्वभावकाले प्रतियोगी नासन् किन्तु कालांतरे सन्निति चेन्न कालान्तरसत्त्वेऽप्यभावकाले तदसत्त्वात् ॥

ज्ञानस्वरूपस्यार्थघटितत्वाभावात्, तदभावेऽपि ज्ञानस्य न निःस्वरूपत्वमित्यभिप्रेत्याऽऽह – अर्थप्रकाशत्वं हीति । उपलक्षणमित्येतद्विवृणोति । व्यावृत्ताविति । यावद्द्रव्यभाविनोऽपि गन्धत्वादेर्जला-

दिभ्यः स्वाश्रयव्यावर्तकत्वाद्गंधवती पृथिवीत्युच्यते यथा, एवमर्थप्रकाशो ज्ञानमित्युच्यते । तथा च प्रलयादौ गंधाभावेऽपि पृथिवीपरमाणुसत्त्ववत्, अर्थाभावेऽपि मुक्तौ ज्ञानसत्त्वोपपत्तिरित्यर्थः । किंचार्थप्रकाशत्वस्य ज्ञानस्वरूपत्वे तद्विशेषणत्वे वा पराभिमतेश्वरज्ञानस्यास्मदादिज्ञानवैलक्षण्याय सर्वदा सर्वार्थप्रकाशत्वं वक्तव्यम्, तदनुपपन्नम् । इदानीमतीतादिपदार्थाभावेन तद्विषयत्वासंभवादित्याह – सर्वदेति । अतीतादिकमपि तद्विषय एवेत्याशङ्क्य संबंधाभावेन दूषयति—न च घटादीति । संबन्धाभावोऽसिद्ध इति शङ्कते। नन्विति । स्वरूपस्य संबंधिद्वयात्मत्वात्संबधिनोऽभावकाले संबंधोऽपि नास्तीत्याह – न तत्काल इति । प्रागभावादिकाले प्रतियोगिनः सत्त्वेऽसत्कार्यवादहानिः स्यादित्यभिप्रेत्याऽऽह—अन्यथेति । तत्परिपालनाय तदा सत्त्वाङ्गीकारे स्वरूपसंबंधहानिरित्याह – प्रागभावादीति । अभावकालेऽसत्त्वनिषेधेन कालांतरे सत्त्वस्य विवक्षितत्वान्नासत्कार्यवादभंग इति शङ्कते – नन्वभावकाल इति । विवक्षाया अन्यथात्वेऽपि तदा तदसत्त्वमावश्यकमित्याह – न कालान्तरेति ॥

काशकुशावलम्बन्यायेन शङ्कते । तदापीति ।

अभावकालेप्रतियोगिनोऽसत्त्वप्रतिपादनम् ।

तदाप्यभाव एव न तु प्रतियोगिनोऽसत्त्वमिति चेन्न । असत्त्वनिषेधे सत्त्वापत्तेः । तस्य चाभावकालेऽयोगात् । एतेन कालविशेषे प्रतियोगिनो ऽभावप्रतियोगित्वमेव न

त्वसत्त्वमिति निरस्तम् । न चाभावसत्ता न प्रतियोगिनस्तदातनसत्त्वविरोधिनीति वाच्यम् । अभावस्य स्वसमानाधिकरणप्रतियोगिसत्त्वविरोधित्वात् । अन्यथा भावाभावयोर्विरोधो दत्तोदक एव स्यात् । किं चाभावकाले 'प्रतियोगी सन्'इतिवदन् प्रष्टव्यः 'कस्तस्य घटादेर्गुणः, को वा तदाश्रयः, किमिति तदा स न चक्षुरादिना गृह्यते, कथं तदर्थं कारणगवेषणं, कथं वाऽसत्कार्यवादनिर्वाह' इति ? नन्वभावकाले प्रतियोगिनः सत्त्वं वर्त्तते, न स्वरूपमिति नोक्तदोष इति । न, तव मतेऽतिरिक्तपदार्थस्वरूपातिरिक्तसत्तायाः सामान्यादावभावात् स्वरूपस्यैव सत्त्वात् । कार्यस्वरूपाभावे तदुपरक्तसत्ताजातेरप्यभावेन घटादिसत्ताया वर्त्तमानताविरोधात् ॥

त्वया सदसद्भिलक्षणानङ्गीकारादसत्त्वनिषेधे सत्त्वमेव स्यादित्याह – न असत्त्वेति । असत्त्वनिषेधे सत्त्वस्याऽऽवश्यकत्वादेवान्योऽपि प्रलापो निरस्त इत्याह – एतेनेति । किञ्चाभावप्रतियोगित्वं हि तद्विरहात्मप्रतियोगिस्वरूपमेव, तस्य चाभावकालीनत्वं विरुद्धमिति द्रष्टव्यम् । ननु विद्यमानप्रतियोगिको ऽभावः स्वकाले प्रतियोगिसत्त्वाविरोधी दृष्टः । एवमविद्यमानप्रतियोगिकाभावोऽपीति चेन्न । तस्यापि स्वाधिकरणे प्रतियोगिसत्त्वविरोधित्वात् । प्रागभावादेरपि तथात्वे प्रतियो-

गिनोऽन्यत्र सत्त्वासम्भवादसत्त्वमेव परिशिष्यत इत्यभिप्रेत्याऽऽह – न चाभावसत्तेति । किञ्चाभावकाले सत्त्वे घटस्य रूपादिरहितत्वे घटत्वाद्यनुपपत्तिः। तत्सत्त्वे वाऽनुपलब्धिविरोधः कार्यकारणभावाद्यनुपपत्तिश्चेत्याह– किञ्चाभावकालेति । नन्वभावस्य प्रतियोगिनैव सह विरोधो न प्रतियोगिसत्तया तस्यास्ततोऽन्यत्वादिति शङ्कते । नन्वभावेति । सदाकारानुगतबुद्धेः परमते सामान्यादिसाधारणैकविषयाभावात्तत्स्वरूपमेव सद्बुद्धिविषयत्वात्सत्त्वं, तथा च घटादिस्वरूपातिरिक्तसत्ताऽभावात्तदभावेऽसत्त्वमेवेति दूषयति – न तव मत इति । किञ्च जातिरूपसत्तायाः सत्त्वेऽपि न घटसत्त्वमस्ति । घटाभावे तत्समवायवत्तत्सत्ताया अप्यभावादित्याह – कार्यस्वरूपेति । किं च तत्सत्तायाः सत्त्वेऽपि तत्स्वरूपस्याभावात् स्वरूपसम्बन्धानुपपत्तिरिति द्रष्टव्यम् ।

ननु सद्बुद्धेः क्वचित्सत्तासमवायो विषयः । क्वचिच्च सत्तासामानाधिकरण्यं सत्तायां स्वरूपमिति परमतेऽपि सद्बुद्धेरनुगतैकविषयत्वसिद्धिरिति चेन्न । एकाकारबुद्धेः क्वचित् सत्तासमवायइत्यादिविषयवैलक्षण्यायोगात्सद्रूपोपादानात्मतादात्म्यादेव 'मृद्घट' इतिवत् 'सन्घट' इति प्रतीत्युपपत्तेरतिरिक्तसत्ताकल्पने गौरवाच्चेत्यभिप्रेत्याऽऽह – अधिष्ठानेति ।

अधिष्ठानसत्ताऽन्यसत्तानिरासः ।

अधिष्ठानात्मस्वरूपसत्ताऽतिरिक्तसत्ताजातेरभावाच्च । एवमप्यभावकार्यस्योत्पत्तेः पूर्वं सत्त्वायोगाच्च कार्यस्वरूपमभावकाले न सत् ।

यच्च ज्ञानस्यानादित्वेनाश्रयाद्यनपेक्षायां प्रागभावादिविरोधिदृष्टान्तोदाहरणम्। तदयुक्तम्। प्रागभावादेर्हि धर्मिग्राहकमानसिद्धं तथात्वम्। न च नित्यसाक्षिणस्तथात्वे किंचिन्मानमस्ति। प्रत्युत तस्याश्रयानिरूपणादगुणत्वाच्चेत्यप्युक्तम्।

ज्ञानस्यप्रमाऽप्रमात्वमेवेतिनिश्चयनिरासः यत्तु प्रमाऽप्रमाबहिर्भूतज्ञानं नास्तीति। तन्न। पराभिमतनिर्विकल्पकस्य तदुभयविलक्षस्य सत्त्वात्। न हि निर्विकल्पकं तद्वति तत्प्रकारकं तदभाववति तत्प्रकारकं च। तस्य निष्प्रकारकत्वात्। तस्यापि यथार्थत्वमितीतिचेत् तर्हि, यत्र यत्प्रतीयते तत्र तस्य विद्यमानत्वम्। अविद्यमानत्वञ्चायथार्थत्वम्। किंवा तत्र तस्याबाध्यत्वं यथार्थत्वम्। बाध्यत्वं चायथार्थत्वम्।

उक्तप्रकाशविशेषस्याकाशस्य शब्दाश्रयत्ववदर्थप्रकाशकत्वं कादाचित्कमित्याह। तस्य चेति। किञ्चेच्छादिव्यावृत्तये प्रकाशकत्वस्यावश्यकत्वात्तदेव तत्तद्रूपसाधारणं लक्षणमस्तु। तच्चास्मन्मतेऽनन्तवृत्तिज्ञानेऽप्यधिष्ठानतयानुगतं प्रकाशबुध्यालम्बनं चैतन्यमेव। तव मते च ज्ञानत्वमित्यर्थपदं व्यर्थमित्याह। अर्थप्रकाशत्वमिति। ज्ञानस्य निर्विषयत्वादिकं धर्मिग्राहकमानविरुद्धमित्युक्तमनूद्य दूषयति। यच्चेत्यादिना। अनादिज्ञानस्य साश्रयत्वे परोक्तं प्रागभावाद्युदाहरणं वैषम्येण दूषयति। यत्त्वित्यादिना। न केवलमाश्रितत्वे मानाभावः। अनाश्रयत्वेऽपि मानमस्तीत्याह। प्रत्युतेति।

चोद्यान्तरमनुवदति । यत्त्विति । किं तद्वति तत्प्रकारकं ज्ञानं प्रमा? तदभाववति तत्प्रकारकंज्ञानमप्रमा? । उत यथार्थज्ञानंप्रमा ? । अयथार्थज्ञनमप्रमा ? । आद्यं दूषयति । भन्नेति । द्वितीयं शङ्कते । तस्येति । अस्मिन्पक्षे साक्षिज्ञानस्य प्रमाऽप्रमाबहिर्भाव एव नास्तीत्यभिप्रेत्य विकल्पयति । तर्हि किमिति ॥

प्रथमकल्पे प्रमैवेत्याह । आद्य इति ।

आद्य आत्मस्वरूपमपि ज्ञानं यथार्थम् । प्रतीतिकाले तद्गोचरप्रत्ययस्य विद्यमानत्वात् । न चैवं तत्प्रतिभास्यस्याविद्यादेर्वास्तवत्वापत्तिः । स्वाधिकरणसम्बन्धाश्रयलक्षणविद्यमानत्वस्य सत्त्वात् । त्रैकालिकबाधाभावोपलक्षितस्वरूपाख्य सत्वस्यान्यत्वात् । शुक्तिरूप्यादेर्वस्तुनोऽपि साक्षिवेद्यत्वात् । अत एव यथार्थत्वे गुणजन्यत्वं स्यादिति निरस्तम् । त्वदभिमतेश्वरज्ञाने तदभावाच द्वितीये आत्मरूपज्ञानप्रत्ययार्थं तद्गोचरप्रपञ्चस्य बाध्यत्वाच्च दोषाजन्यज्ञानस्य बाधितार्थविषयज्ञानत्वमनुपपन्नमिति वाच्यम् । दोषो हि जन्ममिथ्याज्ञानोत्पत्तौ हेतुः । न च तस्य मिथ्याविषयत्वे मिथ्याज्ञाने सति दोषेण विना तदविषयत्वाभावात् । स्वरूपज्ञानं च न जन्यमिति न दोषमपेक्षते । अन्यथा गुणजन्यस्य दोषाप्रतिबद्धसामग्रीजन्यस्य वा ज्ञान

स्य यथार्थत्वमिति नत्वदभिमतेश्वरज्ञानं यथार्थं स्यात् । अपि च त्वदभिमतेश्वरो जीवनां भ्रान्तिं जानाति न वा? । अन्त्ये तस्यासर्वज्ञत्वं जीवभ्रान्त्युच्छेदायोपदेशोऽपि न स्यात् । आद्ये ईश्वरज्ञानमप्यसदर्थविषयं वक्तव्यम् । ज्ञाने विषयनिरूप्यत्वनियमस्य त्वयैवोक्तत्वात् । अन्यथा तस्य भ्रान्तित्वानवगमाच्च ।

तर्हि विद्यमानस्यैव सत्त्वरूपत्वात्प्रपञ्चसत्यतापत्तिरितिचेन्न । विद्यमानत्वापेक्षया सत्त्वस्यान्यत्वादित्याह । न चैवमिति । ननु सत्त्वाभावे साक्षिवेद्यत्वमेवानुपपन्नमित्यत आह । शुक्तिरूप्येति । देशान्तरादौ सतो वाऽसतो वा रूप्यस्य सन्निकर्षाभावेन चाक्षुषत्वायोगादनिर्वचनीयस्य साक्षिवेद्यत्वमेवेति ख्यातिवादे वक्ष्यमाणत्वादिति भावः । शुक्तिरूप्यज्ञानस्य विद्यमानार्थस्य गुणजन्यत्वाभावादेव चोद्यान्तरं निरस्तमित्याह । अत एवेति । तव मतेऽपि नायं नियम इत्याह । त्वदभिमतेति । द्वितीये कल्पे साक्षिरूपज्ञानस्याप्रमारूपत्वेन न तद्बहिर्भाव इत्याह । द्वितीय इति । साक्षिज्ञानस्यायथार्थत्वे दोषजन्यत्वं स्यात् तस्यैव तत्प्रयोजकत्वादित्याशङ्क्याह । न च दोषाजन्येति । सिद्धान्तदोषो न भ्रान्तिज्ञानकारणम् । तस्य नित्यत्वात् । किन्तु तद्विषयोत्पत्तावेवेति नोक्तानुपपत्तिः । परमतेऽपि प्रागभ.वप्रतियोगिभ्रमोत्पत्तावेव प्रयोजको दोषः, नतु तस्य मिथ्यार्थविषयकत्वेऽपि केवलव्यतिरेकाभावादिति हेतुमाह । दोषो हीति । दोषजन्यस्यैव बाधितार्थवि-

षयत्वेऽतिप्रसङ्ग इत्याह । अन्यथेति । स्वतः प्रामाण्य-मते न दोषाप्रतिबद्धमित्युक्तं दोषाजन्यस्याप्ययथार्थत्वं परमतेऽप्यभ्युपेयमित्यभिप्रेत्य विकल्पयति । अपिचेति । द्वितीये परमतेनेकविरोध इत्याह । अन्त्य इति । आद्ये अयथार्थत्वविशिष्टभ्रान्तिविषयेश्वरज्ञानस्य विशेषणांशे अयथार्थत्वं तवापि संमतम् । भ्रान्तिविषयानवगमे भ्रान्तित्वस्यैव दुर्ज्ञेयत्वादित्याह आद्य इति ।

ननु भ्रान्तिज्ञाने ऽबाधिते भ्रान्तित्वादेरपि प्रकारस्याबाधितत्वात्तद्विषयमीश्वरज्ञानं यथार्थमेवेति चोदयति । ननु तदभावेति ।

भ्रान्तिलक्षणानुपपत्तिप्रतिपादनम् ।

ननु तदभाववति तत्प्रकारकत्वं भ्रान्तित्वं तच्च ज्ञानेऽबाधितमिति चेन्न । तदभाववति तद्वैशिष्ट्यस्यानवगमे ज्ञाने तत्प्रकारकत्वस्यैवाधिगन्तुमशक्यत्वात् । एतेनानात्मस्वरूपं ज्ञानं यदि बाधितार्थविषयं स्यात्तर्हि तद्रूप ईश्वरोऽपि भ्रान्त एव स्यादित्यापादनं प्रत्युक्तम् । बाधितमर्थं बाधितत्वेन जानतस्तदभावात् । अत एव पारमेश्वरज्ञानस्यायथार्थत्वे तन्मूलवैदिकव्यवहारः सर्वोऽपि विप्लवेतेति परास्तम् । तस्याविद्याकाले विद्यमानार्थत्वेन तन्मूलव्यवहारस्य विद्यमानार्थत्वात् ।

यदप्युक्तम्, ज्ञानाविरोधिनो न ज्ञानत्वं तद्विरोधेऽज्ञानं नित्यनिवृत्तं स्यादिति तन्न । वृत्तिसहकृतसाक्षिणोऽज्ञानविरोधित्वमुक्तं न प्रस्म-

र्त्तव्यम् । यच्चान्यदपरोक्षज्ञानस्यैवात्मत्वे न हेतुरिति । तदसत् । वृत्तिमात्रस्यानात्मत्वात् प्रकाशमात्रस्यात्मत्वाच्च ।

यत्त्वज्ञानाश्रयस्यैवात्मनः सुखादिज्ञानाश्रयत्वानुभवादित्यादि । तदस्माकं न प्रतिकूलम् । अज्ञानाश्रयस्यैव साक्षिणोऽन्तःकरणाधिष्ठानस्य सुखादिरूपवृत्त्यधिष्ठानत्वात् । वृत्तौ च चैतन्यप्रतिफलनात्तदाश्रयत्वानुभवः । अत एव संसारस्य स्वसमानाधिकरणज्ञाननिवर्त्यत्वं दुःखादिरूपानर्थस्य मोक्षसामानाधिकरण्यं च सङ्गच्छते । अज्ञाननिवर्तकवृत्तेर्दुःखादेश्चान्तःकरणाधिष्ठानसाक्षिण्यध्यासात् ॥

भ्रान्तित्वस्यायथार्थघटितत्वात्तद्विषयज्ञानस्यायथार्थविषयत्वं दुर्वारमित्याह । नतदभाववतीति । तटस्थेश्वरज्ञानप्रतिबन्ध्येव परिपूर्णेश्वरे दोषारोपणं निरस्तमित्याह । एतेनेति । ननु सर्गाद्यकाले परमेश्वरस्यैव वेदतदर्थोपदेष्टृत्वात्तज्ज्ञानस्यायथार्थत्वे तन्मूलव्यवहारस्यान्धपरत्वादित्याशङ्क्याह । अत एवेति । अतःशब्दार्थमाह । तस्येति । तदुपदर्शितसाध्यसाधनभावादिव्यवहारस्यामोक्षं बाधाभावाद्भोजनादिव्यवहारवत्प्रामाणिकतोपपत्तेरिति भावः । किं साक्षिज्ञानमज्ञानविरोधि उत न । उभयथाप्यनुपपत्तिरित्युक्तं चोद्यमनूद्य दूषयति । यदप्युक्तमित्यादिना । न प्रस्मर्त्तव्यं न विस्मरणीयमित्यर्थः । ज्ञानविशेषस्यैवात्मत्वे

नियामकं नास्तीत्युक्तं चोद्यमनुवदति। यच्चान्यदिति। दृश्यजन्यपरतन्त्रज्ञानमात्रस्यानात्मत्वं स्वप्रकाशनित्यस्वतन्त्रज्ञानस्यात्मत्वमिति नियामकमस्तीत्याह। तद सदिति। ज्ञानस्यात्मत्वेऽनुभवविरोधमुक्तमनुवदति। यत्त्वज्ञानेति। अयसो वह्नितादात्म्याद्दग्धत्वादिवदभोक्तुरपि भोक्तृतादात्म्याद्भोगवत्त्वानुभव इत्याह। तद स्माकमिति। अशनायाद्यतीतेऽप्यात्मन्यौपाधिकसंसाराङ्गीकारान्न बन्धमोक्षयोर्वैयधिकरण्यं, न वा बन्धतन्निवर्तकज्ञानयोरित्याह। अत एवेति। अतःशब्दार्थमाह अज्ञानेति। अथ "यो वेद इति जिघ्राणि"इत्यादिश्रुतिरप्यौपाधिकप्रमातृत्वविषयेत्याह। एवं मन्तृत्वादीति।

संविदात्मनोरभेदं प्रतिपादयति

एवं मन्तृत्वादिविषया श्रुतिरपि द्रष्टव्या। तस्माद्देवदत्तोहमनुभवगोचरो देवदत्तोहमनुभवे प्रकाशमानस्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वादित्यनुमानाल्लाघवानुभवाभ्यां सहकृतात्संविदात्मनोरभेद इति। किञ्च योऽयमहमाकारादिसाक्ष्यनुभवः स आत्मनो न भिद्यते। संवेदनत्वात्। व्यतिरेकेण घटवत्। नचाप्रयोजकता। आत्मधर्मनित्यज्ञानाभावेनोत्पादविनाशशीलस्य ज्ञानस्यात्मगुणत्वे आत्मनः कूटस्थताहानेः। स्यादेतत् आत्मन उत्पत्तिविनाशानङ्गीकारान्न कूटस्थताहानिः। नह्यन्योत्पत्तिविनाशाभ्यामन्यस्य कौटस्थ्यं हीयते। अविद्यानिवृत्त्या त्वदभिमतात्मनोऽपि तत्प्रसङ्गादि-

ति । भवेदेवं यदि कार्यसत्वं कारणाद्भिद्येत । जायमानं हि कार्य्य प्रागपि सदिति वक्तव्यम् । असत उत्पत्त्यनुपपत्तेः । शशशृङ्गवत् । ननु न नरशृङ्गतुल्यं कार्यं, अपि तु कारणे कार्यस्य प्रागभाव इति चेत् अस्तु प्रागभावः । तत्काले कार्यं किं सत् तथा सति किं कारणे वर्त्तते, किं वान्यत्र । न सर्वथापि । प्रागभावप्रतियोगिनोरेकदाऽवृत्तेः ।

वस्तुतस्तु अत्र प्रमेयादित्रितयसाक्षी यः स आत्मेति श्रुत्यर्थः । प्रकाशरूपेऽपि तस्मिन् वृत्तिकृतभेदेन प्रकाशवत्वसम्भवाद्वेदेति न विरुध्यते । परमते एव वेद्यस्य ज्ञानातुर्वैतृत्वमनुपपन्नम् । कर्त्तुः कर्मत्वविरोधादिति भावः । तर्कितेऽर्थेऽनुमानमाह । तस्मादिति । यज्ञदत्तात्मघटयोः सिद्धसाधनतानिवृत्तये देवदत्ताहमिति विशेषणद्वयम् । यज्ञदत्ताहमनुभवे देवदत्तपरोक्षानुभवयोः प्रकाशमानयज्ञदत्तात्मद्रष्ट्रकत्वेनार्थान्तरतानिवृत्तये साध्येऽपि तद्विशेषणद्वयम् । लाघवानुभवाभ्यामिति । संविदात्मनोरभेदे लाघवान्समात्मेति प्रमातृभिन्नात्मनोऽनुभवात्तस्यापि दर्शनाश्रयत्वे स्वव्यतिरिक्तद्रष्ट्रकत्वापातेनानवस्थाप्रसङ्गाच्चेत्यर्थः । नित्यानुभवस्य साक्षादेवात्मत्वं साधयति । किं चेति । तस्यात्मभेदे ज्ञानगुणकस्यैवात्मत्वं वक्तव्यम् । तथा चात्मन उत्पत्त्यादिप्रसङ्ग इति चोदयति । स्यादेतदिति । कार्यकारणयोर्भेदस्य दुर्निरूपत्वात्प्रपञ्चसत्यत्ववादिना तयोरभेद एव वाच्यः । तथा च कार्यविकारेण कारणमेव विकारवत् स्यादित्यभिप्रेत्याह । भवेदेवमिति । कार्यस्य कारणभेदं निषेद्धुं तस्योत्पत्तेः । प्राग-

सत्त्वं निषेधयति । जायमानं हीति । उत्पत्तेः प्राक्सत्त्वाभावेऽप्यत्यन्तासत्त्वमपि नास्तीति शङ्कते । ननु न नरशृङ्गेति प्रागभाव एवाप्रामाणिक इति वक्ष्यते तमङ्गीकृत्यापि तत्काले कार्यं सदित्यङ्गीकारे दूषणमाह । अस्त्विति । प्रतियोगिनः प्रागभावनिवृत्तिरूपत्वात्तयोः समानकालत्वं विरुद्धमित्याह । प्रागभावेति ।
द्वितीयं दूषयति । कारणादिति ।

ज्ञानात्मनोरभेदविषयिण्यप्रयोजनकशङ्कानिरासः।

कारणादन्यत्र कार्यस्यासमवायात् । अन्यसमवायिनोऽन्याऽनुपादेयत्वात् । प्रागभावकाले च प्रतियोगिनः सत्तानभ्युपगमे कथं न नरशृङ्गतुल्यता । न हि प्रागभावसत्तैव प्रतियोगिनः सत्ता । अन्यसत्तयाऽन्यस्य सत्त्वेऽतिप्रसङ्गात् । ननु, नरविषाणं कालत्रयेऽप्यसत्, कार्यं तूत्पत्तेः पूर्वमिति वैषम्यमिति चेन्न । किञ्चित्कालमसतः कालभेदेऽपि सत्त्वानुपपत्तेः । किं सत्त्वासत्त्वे पदार्थधर्मौ स्वरूपं वा ? । नाद्यः । असत्त्वकालेऽपि पदार्थसद्भावप्रसङ्गात् । अनित्यधर्मस्याश्रयादृतेऽनवस्थानात् । धर्मत्वेऽसत्त्वव्याघाताच्च । न द्वितीयः । एकस्य सदसदात्मत्वविरोधात् । ननु कालभेदेनाविरुद्धमिति चेन्न । धर्मस्य हि कालभेदेन स्वहेतुसमाजाद्व्यत्ययो न तु स्वरूपस्य । तथासति स्वरूपभेदापत्तेः । न ह्यभावः कालभेदेन भावो भवति । इतःपूर्वमसदित्यसतो बुध्यनुपपत्तेश्च । तस्य निः-

स्वभावस्यावच्छेदककालासम्बन्धात् । तस्माद्यत्किञ्चित्कालमसत् तत्सर्वदाऽसदेव, यत्सत्तत्सर्वदा सदेव, न तूभयात्मकं किञ्चिदस्ति । तदाह भगवान् । नासतो विद्यते भावो नाभावो विद्यते सत इति ।

अन्यथासमवायिनः पटस्य तन्तूपादानकत्वमपि न स्यादिति । उक्तदोषपरिहाराय प्रागभावकाले कार्यसत्त्वानभ्युपगमेऽनिर्वचनीयानङ्गीकारादसत्त्वमेव परिशिष्यत इत्याह । प्रागभावेति । ननु तत्प्रागभावस्य सत्त्वान्न तस्यासत्त्वमिति चेन्न । तत्सत्त्वेऽपि प्रतियोगिनोऽसत्त्वात् । न हि वन्ध्यासत्तया तत्पुत्रोऽपि सद्भवतीत्यभिप्रेत्याह । न हीति । उत्पत्तेः पूर्वमसत्त्वाविशेषेऽपि नरविषाणाद्विशेषोऽप्यस्ति, तत उत्पत्तिरुपपन्नेति चोदयति । नन्विति । उत्पत्तौ सत्यां नरविषाणवैषम्यम्, वैषम्ये च सति परस्पराश्रयः स्यादित्यभिप्रेत्याह । न किञ्चित्कालमिति । कदाचिदसतः कालान्तरेऽप्यसत्त्वमुपपादयितुं विकल्पयति । किमिति । आद्ये असत्त्वमेव धर्मिसत्तां विनानुपपन्नमित्याह । नाद्य इति । ननु प्रलये घटत्वादेरिव विनापि धर्मिणं धर्मोऽस्त्वित्याशङ्क्य कादाचित्कधर्मस्य साश्रयत्वनियमादित्याह । अनित्येति । किञ्च, धर्मिणः सत्त्वाभावे धर्मस्यैवानुपपत्तेस्तत्सत्त्वमावश्यकं, तथाचोपजीव्यसत्त्वविरोधादसत्त्वमेव न स्यादित्याह । धर्मत्वे इति । द्वितीये वस्तुनो द्वैरूप्यं विरुद्धमित्याह । न द्वितीय इति । ननु यथा एक एव घटः श्यामो रक्तश्च कालभेदेन एवं स एव सद सदात्मापीत्याशङ्कते । नन्विति । घटस्तु कालभेदेन पूर्व-

विपरीतरूपाश्रयः न तस्य स्वरूपे द्वैविध्यमस्तीति परिहरति । न धर्मस्येति । व्यत्ययो व्यत्यासः । एकस्य नाश इतरस्योत्पत्तिरिति यावत् । सत्त्वासत्त्वयोर्भेदात्तावन्मात्रस्वरूपोऽपि धर्मो भिद्येतेत्याह । तथा सतीति । असतःकालविशेषसम्बन्धाभिधानमप्ययुक्तमित्याह । इतः । पूर्वमिति । आत्मत्ववत्सत्त्वासत्त्वे व्यवस्थिते एवेति सर्ववादिनः प्रत्याह । तस्मादिति । उक्तेऽर्थे गीतावचनं प्रमाणयति । तदाहेति ॥

असतोऽसत्त्वमेवेतिनियमे ब्रह्मणोऽप्यसत्त्वमेव स्यादिति चोद्यमनुवदति । यत्त्विति ।

असतोअसत्वमेवेति नियमे ब्रह्मणेऽप्यसत्वापत्तिरित्याशङ्का तन्निरसनम् ।

यत्तु तथासति दृश्यात्मनाऽसद्रूपस्य ब्रह्मणः स्वरूपेणाप्यसत्त्वं स्यादिति । तन्न । अस्थूलादिवाक्यैर्निष्प्रपञ्चतया प्रमितस्य ब्रह्मणः सत्यादिवाक्यैः सदादिरूपेणाप्रमितत्वेनात्मनोऽसत्त्वे सर्वशून्यताप्रसङ्गेनास्मीत्यनुभवस्यानन्यथासिद्धत्वेन च रूपान्तरेणासत आत्मनः स्वरूपेणासत्त्वायोगात् । पटरूपेणासतो घटस्य स्वरूपेण सत्त्वेन व्यभिचाराच्च । न च घटादेः सत्त्वेन प्रमितत्वात् किञ्चित्कालमसतो न सर्वकालासत्त्वनियम इति वाच्यम् । घटादिसद्बुद्धेरधिष्ठानविषयतयाऽन्यथासिद्धत्वात् । सत्तान्तरकल्पने गौरवात् । किञ्च कारणे समवायः किमसत उत्पत्तिः, स्वस्मिन् सत्ता-

समवायो वा । आद्येऽपि स्वोपलक्षितसमवायः स्वविशिष्टसमवायो वा ? । नाद्यः । तस्य नित्यसमवायवादिनः सर्वदा सत्त्वेन ज्ञानादौ मनसादेरकारणत्वप्रसङ्गात् । बुद्ध्याद्यनित्यत्ववादिनोऽनित्यसमवाये च न मानमस्ति । नापि द्वितीयः । असतो विशेषणत्वायोगात् ।

यद्येन रूपेण किञ्चित्कालमसत् तत् तेन रूपेण सर्वदाऽप्यसदितिनियमाद् ब्रह्मणः सर्वदा दृश्यरूपेणासत्त्वस्येष्टत्वात् सत्यादिरूपेण कदाचित्तदसत्त्वे प्रमाणाभावात् । प्रत्युत तेन रूपेण सत्त्वस्यैव श्रुतियुक्त्यनुभवसिद्धत्वादित्यभिप्रेत्याह । तन्न । अस्थूलादीति । घटादिषु सदनुभवस्याधिष्ठानसत्तादात्म्यविषयत्ववदात्मनि सदनुभवस्य न तदधिष्ठानसद्विषयत्वम् । तदधिष्ठानाभावात्, भावे वा तस्यैवास्मदात्मत्वादित्यभिप्रेत्यानन्यथासिद्धत्वेनेत्युक्तम् । त्वदुक्तनियमस्य तव मत एव व्यभिचार इत्याह । पटरूपेणेति । घटादेरपि सर्वदाऽसत्त्वापादनं प्रमाणविरुद्धमित्याशङ्क्याह । न च घटादेरिति। ननु प्रतीत्यनुसारेण घट एव स्वाभाविकसत्ता किं न स्यादित्याशङ्क्याह । सत्त्वान्तरेति । न हि "सन्घट" इत्यत्र सत्त्वस्य घटकधर्मत्वं प्रतीयते किं तु "मृद्घट" इतिवत् सत्तादात्म्यमात्रं तच्च तद्रूपेणोभयवादिसम्मतात्मतादात्म्यमेवेति सत्तान्तरकल्पने गौरवं स्यादिति भावः। उत्पत्तिशब्दार्थपर्यालोचनयाप्यसदुत्पत्तिरयुक्तेत्यभिप्रेत्य विकल्पयति । किञ्चेति। किं समवायो नित्य एकः, उतानित्योऽनेकः ? । आद्ये कार्योपलक्षितसमवायस्य तत्प्रा-

गभावकालेऽपि सत्त्वात् त्वदभिमतकार्यकारणभावो न स्यादित्यभिप्रेत्याह । तस्य नित्येति । द्वितीये समवायसाधकानुमानस्य स्वरूपसम्बन्धेनार्थान्तरत्वान्नानन्तसमवायः प्रामाणिक इत्याह । बुद्ध्यादीति । कारणे कार्यविशिष्टः समवाय उत्पत्तिरिति पक्षं दूषयति । नापीति । असतो विशेष्यसम्बन्धाभावेन विशेषणत्वायोगादित्यर्थः ।

आद्यं द्वितीयं दूषयति । नापीति ।

नापि स्वस्मिन् सत्तासमवाय उत्पत्तिः । असति स्वस्मिन् तदनुपपत्तेः । कार्यसत्त्वस्योत्पत्तिप्रयोज्यत्वात् । न च कार्यस्याद्यसमयसम्बन्ध उत्पत्तिः।सम्बन्धस्य संयोगत्वे तस्योत्पत्त्यनन्तरभावित्वात् । समवायत्वे घटादेः काले तदभावात् । नापि स्वरूपसम्बन्धः । तस्य स्वरूपद्वयात्मत्वे समयस्यापि घटोत्पत्तित्वप्रसङ्गः । घटस्यापि स्वोत्पत्तित्वेनोत्पन्नो घट इति प्रतीत्यनुपपत्तेः, समयस्याद्यत्वाभावाच्च । न च स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयाधारत्वं कार्यस्याद्यसमयसम्बन्ध इति वाच्यम् । स्वपदेनोत्पद्यमानपदार्थाभिधान आत्माश्रयात्, उत्पत्तेरेव निरूप्यमाणत्वात् । वस्तुमात्राभिधाने च द्वितीयक्षणावच्छिन्नघटस्याप्युत्पत्तिप्रसङ्गः । तस्यापि द्वितीयक्षणावच्छिन्नस्वसमानकालीनप-

दार्थप्रतियोगिकध्वंसानाधारद्वितीयक्षणे सत्त्वात् । ननु प्रथमक्षणोऽपि तत्क्षण इति तत्कालस्थितिकशब्दादिध्वंसस्य द्वितीयक्षणे सत्त्वात्, न तत्प्रसङ्ग इति चेत् ॥

किमसति स्वस्मिन् सत्तासमवायः उत, सति ? । आद्यं दूषयति । असतीति । द्वितीये परस्पराश्रयः स्यादित्यभिप्रेत्याह । कार्यसत्त्वस्येति । पराभिमतलक्षणान्तरं दूषयति । नचेति । किं कार्यस्याद्यसमये न सम्बन्धः संयोगः समवायो वा स्वरूपसम्बन्धो वा । आद्ये दोषमाह । सम्बन्धस्येति । गुणादौ संयोगाभावाच्चेति द्रष्टव्यम् । द्वितीये कारणे समवाय इत्यत्रोक्तदूषणे सत्येव दोषान्तरमाह । समवायत्व इति । असतो निःस्वरूपत्वात्स्वरूपद्वयात्मकसम्बन्धो न सम्भवतीत्याह । नापीति । दूषणान्तरमाह । तस्येति । घटो घटवानितिवदुत्पत्तिमानित्याद्यनुभवोऽपि न स्यादित्याह । घटस्यापीति । समयस्यैकत्वेनाद्यस्य समयोऽपि नास्तीत्याह । समयस्येति । एकस्यापि समयस्य परैर्विवक्षितमाद्यत्वं निराकरोति । न च स्वसमानेति । स्वं कार्यत्वेनाभिमतं घटादि तत्कालीना ये पदार्थाः शब्दबुद्ध्यादयस्तत्प्रतियोगिको यो ध्वंसः तदनाधारत्वं समयस्याद्यत्वम् । कार्यस्योत्पत्तिरित्यर्थः । किमत्र स्वपदेनोत्पद्यमानं विवक्षितं उत, वस्तुमात्रम् ? । आद्ये आह । स्वपदेनेति । द्वितीयेऽतिव्याप्तिरित्याह । वस्तुमात्रेति । ननु स्वशब्दस्य क्षणविशेषाऽनवच्छिन्नकार्यस्वरूपपरत्वान्नोक्तातिव्याप्तिरिति चोदयति । ननु प्रथमेति ।

तत्र किं स्वसमानकालीनयत्किञ्चित्पदार्थप्रतियोगिकध्वंसानाधारत्वं विवक्षितं उत, तत्कालीनयावत्पदार्थप्रतियोगिकध्वंसानाधारत्वं, किं वा तत्कालीनपदार्थप्रतियोगिकयावत्ध्वंसानाधारत्वम् । आद्ये द्वितीयक्षणेऽतिव्याप्तिस्तदवस्थैव । घटकालीनमृदादिप्रतियोगिकध्वंसानाधारत्वस्य तदापि सत्त्वादित्याह । न यत्किञ्चिदिति ।

न यत्किञ्चित्तत्कालीनपदार्थप्रतियोगिकध्वंसानाधारत्वस्य द्वितीयक्षणेऽपि सत्त्वात् चरमध्वंसकालीनकार्यपदार्थाभावेन तद्ध्वंसाभावात् । तदनाधारकालस्याप्रसिद्ध्या चरमध्वंसे तादृशकालाधारत्वस्यासंभवात् । न च चरमध्वंसासिद्धिः । सर्वमुक्तावदृष्टाभावेन कार्यमात्रस्याभावात् । तस्मान्नासत्कार्यवादो युज्यते । सत्कार्यवादेऽपि यदि कार्यसत्त्वं कारणाद्भिन्नं तर्हि कारणान्वेषणं व्यर्थम् । तेन विनापि तत्सत्त्वात् । अनुपलब्धेश्च । अवस्थाविशेषः कार्यमिति पक्षोऽपि विशेषस्य प्राग् सत्त्वासत्त्वाभ्यां प्रतिवक्तव्यः । तस्मात्कारणमेव कार्यस्य स्वरूपम् । तेन कारणेन तत्तद्तत्कार्यकार्यरूपमापद्यते । तच्च रूपान्तरं नानिर्वचनीयं किंतु वास्तवमिति मते आत्मैव बुद्ध्यादिरूपेण जायते विनश्यति चेति कथं न कौटस्थ्याहानिः ।

द्वितीये 'घटकालीननित्यपदार्थप्रतियोगिकध्वं-साभावादसंभवः । तृतीये घटकालीनत्रिचतुरपदार्थ-प्रतियोगिकयावत्ध्वंसानाधारत्वं द्वितीयक्षणे नास्ती-त्यतिव्याप्तिरेव । ननु, स्वसमानकालीनयावदनि-त्यपदार्थप्रतियोगिकध्वंसानाधारत्वं विवक्षितमिति चेत् तत्र किं यावत्ध्वंसानाधारत्वं यावत्ध्वंसाधारभि-न्नत्वमुत, यावत्ध्वंसात्यन्ताभाववत्त्वम् । आद्ये द्वितीय-क्षणेऽतिव्याप्तिः । द्वितीये यावत्ध्वंसप्रतियोगिकसामा-न्याभाववत्त्वं उत, तत्प्रतियोगिकयावद्विशेषाभावव-त्त्वम् । नाद्यः । ध्वंसेषु सामान्याभावेन तदवच्छिन्नप्रति-योगिकसामान्याभावायोगात् । न द्वितीयः । भावस्य स्वा-त्यन्ताभावसमानकालीनत्ववदभावानामपि तथात्वात् । अन्यथा तदत्यन्ताभावस्य त्रैकालिकत्वानुपपत्तेः । तथा च द्वितीयक्षणोत्पन्नध्वंसदेशे तदत्यन्ताभावाभावेऽपि तत्क्षणे तदत्यन्ताभावस्यापि तथात्वादतिव्याप्तिर्दुर्नि-वारेति भावः । चरमध्वंसोत्पत्तौ अव्याप्तिमप्याह । चरमेति । ननु कार्यप्रवाहस्यानादित्ववदनन्तत्वात्कुत-श्चरमध्वंसः, कुतस्तरामव्याप्तिरित्यत आह । न चेति । सर्वमुक्त्यभावे स्वस्य नित्यसंसारित्वशङ्कया कस्यापि निःशङ्कप्रवृत्त्यनुपपत्तेर्मोक्षशास्त्रमनर्थकमेव स्या-दिति भावः । असदुत्पत्तिनिराकरणमुपसंहरति । तस्मा-दिति । सत्कार्यवादेऽपि कार्यकरणयोः सत्त्वभेदे दोष-माह । सत्कार्यवादेऽपीति । उत्पत्तेः पूर्वं कार्यसत्त्वे प्रमा-णमपि नास्तीत्याह । अनुपलब्धेश्चेति । आरम्भवा-दोक्तदोषं परिणामवादेऽप्यतिदिशति । अवस्थाविशेष इति । किं तर्हि कार्यतत्त्वमित्याशङ्क्य कारणमेव वास्तवं

रूपं कार्याकारस्त्वनिर्वचनीय इत्याह । तस्मात्कारणमेवेति । तेन तेनेति । तत्तन्निमित्तकारणेनेत्यर्थः । अनिर्वचनीयवादे कार्यविकारेणास्याविकारित्वेऽपि कारणाभिन्नकार्यसत्यत्वे तद्विकारेणापि विकारि स्यादेवेत्याह । तच्च रूपान्तरमिति ।

यदुक्तमविद्यानिवृत्त्याप्यात्मनोऽपि निवृत्तिप्रसङ्गादिति तत्राह ।

ज्ञानिनोऽविद्यानिवृत्तिवदात्मनिवृत्तेर्निरसनम् ।

न चाविद्यानाशेऽप्ययं दोषः समानः । अविद्याया आत्मव्यतिरेकेणानिर्वचनीयसत्त्वाभ्युपगमात् । अविद्यानिवृत्तेः कूटस्थात्ममात्रत्वाच्च । किञ्च बुद्ध्यादिरात्मनि व्याप्य वर्तते उत, तत्प्रदेशे ? । नाद्यः । शरीरबाह्यप्रदेशेऽपि तदुपलम्भप्रसङ्गात् । न द्वितीयः । निरवयवस्य प्रदेशाभावात् । नन्वौपाधिकः प्रदेशोऽस्तीति चेन्न । उपाधिज्ञाप्यस्तज्जन्यस्तदधीनः प्रदेशो निष्प्रदेशे नास्तीत्युक्तत्वात् । एवमात्मनस्तद्धेतुसम्बन्धानुपपत्तिश्च बाधकस्तर्कः । किं च ज्ञानात्मनोस्तादात्म्यं सम्बन्धः, किञ्चासमवायः, उत स्वरूपं, न वा किमपि ? । आद्ये किं तादात्म्यमत्यन्ताभेद एव, उत भेदसमानाधिकरणोऽभेदः । आद्ये धर्मधर्मिभावानुपपत्तिः । नहि स्वयमेव स्वस्मिन् वर्त्तते । ननु प्रमेयत्वादेरेकत्वेऽपि धर्मधर्मिभावो दृष्ट इति चेत् अस्तु । प्रमेयत्वे प्रमेय-

त्वदर्शनात् । न च तदेकत्वे किञ्चिन्निदानमस्ति । न च प्रसाधितनियानुभवस्या मधर्मत्वमनुभूयते । जानामीति प्रयक्षस्यानियवृत्तिज्ञानविषयस्योक्तत्वात् । एतेन दृश्यत्वे दृश्यत्ववदभेदेऽपि धर्मधर्म्मिभाव इति प्रयुक्तम् । प्रमेयत्वद्दृश्यत्वेऽप्येकत्वासिद्धः ।

न चाविद्येति । अविद्यातदधिष्ठानयोरनिर्वचनीयभेदाङ्गीकारात्तत एव तद्विकारेऽपि व्यवस्थित इत्यर्थः । अधिष्ठानात्मव्यतिरेकेणाविद्यानिवृत्त्यभावान्न ततस्तस्य विकारप्रसङ्ग इत्यत आह । अविद्यानिवृत्तेरिति । बुद्ध्यादेरात्मनि वृत्त्यनिरूपणादपि न तद्गुणत्वमित्याह । किंच बुद्ध्यादिरिति । द्वितीयं पक्षमादाय शङ्कते । नन्वौपाधिक इति । निरवयवसंयोगनिरासेनैवेदं निरस्तमित्याह । न उपाधीति । पराभिमतासमवायिकारणासंभवादपि नात्मनि ज्ञानगुणारम्भ इत्याह । एवमात्मन इति । ज्ञानात्मनोः सम्बन्धानिरूपणादपि न गुणगुणिभाव इत्याह । किंचेति । अत्यन्ताभेदे गुणगुणिभावप्रयोजकधर्मधर्मिभावाभावानुपपत्तिरित्याह । आद्य इति । एकत्वेऽपि धर्मधर्मिभावदर्शनात् प्रकृतेऽपि न तस्य विरोध इति शङ्कते । ननु प्रमेयत्वादेरिति । प्रमेयत्वस्य प्रमातद्विषयरूपत्वेन प्रमाभेदेन तस्यापि भिन्नत्वान्नैकस्य तस्य धर्मिभाव इत्याह । अस्त्विति । वस्तुतस्तदेकत्वेऽपि भेदो भिन्न इतिवत् प्रमेयत्वं प्रमेयमिति बुद्धेरपि धर्मिस्वरूपमात्रविषयत्वोपपत्तेन धर्मधर्मिभाव इति द्रष्टव्यम् । प्रमेयत्वात् प्रकृ-

ते वैषम्यमाह । न च प्रसाधितेति । ननु दृश्यत्वे दृश्यत्वभावे तस्मिन् मिथ्यात्वासिद्धेस्तस्य स्ववृत्तित्वमावश्यकमित्यत आह । एतेनेति । एतच्छब्दार्थमाह । प्रमेयत्ववदिति ।

ननु यथा शास्त्रार्थभेदस्य ब्रह्मस्वरूपत्वेऽपि तयोर्विशेषणविशेष्यभावः, यथा वा शोधिततत्त्वंपदार्थयोरभेदं प्रति धर्मिप्रतियोगिभावः, एवमभेदेऽपि गुणगुणिभावोपपत्तिरिति तत्राह । एतेनेति ।

अभेदस्य ब्रह्मस्वरूपत्वेऽपि तयोर्गुणगुणिभावोपपत्तिरित्युक्तिमुद्भिद्य निर्णीते ।

एतेन ब्रह्माभेदयोरभेदेऽपि ब्रह्मजीवाभिन्नमित्यबाधितविशेषणविशेष्यभाववदभेदं प्रति एकस्य धर्मिप्रतियोगिभाववच्च गुणगुणिभावोपपत्तेरित्यपि प्रत्युक्तम् । अभेदो न धर्मः किन्तु स्वरूपमिति निश्चयदशायां ब्रह्माभिन्नमिति व्यवहारासिद्धेः, ब्रह्म जीवस्वरूपमित्येवव्यवहारात् । तदनिश्चयदशायां त्वभेदस्य ब्रह्मणो भेदारोपेण तद्व्यवहारोपपत्तेः । एवं धर्मधर्मिभावानुपपत्तेरेव बाधकत्वात् । एकत्वे धर्मिप्रतियोगिभावव्यवहारोऽपि । द्वितीयेप्यभेदसमानसत्ताकोऽभेदः, किं वाऽनिर्वचनीयः ? । नाद्यः । विरोधात् । न द्वितीयः । त्वयानभ्युपगमात् । अभ्युपगमे वा ज्ञानात्मनोरभेद एव वास्तव इति सिद्धं नः समीहितम् । नापि तृतीयः । घटादेरपि बुद्धिगुणत्वप्रसङ्गात् । ननु

ज्ञानसमवायो घटादौ नास्तीति चेत् किं स्वरूपेण नास्ति, किंवा ज्ञानाभावात् । नाद्यः । घटादावपि रूपादिसमवायसत्त्वात् तस्य च ज्ञानसमवायाभेदात् । नापि द्वितीयः । ज्ञानस्याप्यात्मनि सत्त्वात् । तथापि घटे नास्तीति चेन्न । विद्यमान ज्ञाने तत्समवाये घटे च सति ज्ञानं नास्तीति वचनस्य व्याहतत्वात् । न हि घटसंयोगाश्रये भूतले घटाभावो भवति । यत्र यस्य कार्यस्य समवायसम्बन्धो वर्तते तत्तस्य समवायिकारणमिति घटादेरपि बुद्धिसमवायिकारणत्वात् ।

किमभेदादेर्ब्रह्मस्वरूपत्वनिश्चयदशायां विशेषणविशेष्यभावादिरुतानिश्चयदशायाम् । नाद्य इत्याह । अभेद इति । द्वितीयेऽनिर्वचनीयभेदसंभवाद्विशेषणविशेष्यभावादिरित्याह । तदनिश्चयदशायामिति । विशेषणत्वादेरारोपितत्वे हेतुमाह । एकत्वे इति । आरोपितभेदादेव धर्मिप्रतियोगिभावोऽपीत्याह । एवमिति । भेदसमानाधिकरणाभेदस्तादात्म्यमिति पक्षे भेदः किं पराभिमत उतास्मदभिमत इति विकल्प्य दूषयति । द्वितीय इति । गुणगुणिनोः समवाय इति पक्षं दूषयति । नापि द्वितीय इति । ज्ञानविशिष्टसमवायस्य घटादावसत्त्वान्नोक्तदोष इति शङ्कते । नन्विति । किं विशेष्याभावाद्विशिष्टाभावः उत विशेषणाभावादिति विकल्प्य क्रमेण दूषयति । किं स्वरूपेणेति । आत्मनि सतोऽपि ज्ञानस्यात्मत्ववद्घटेऽभाव इति शङ्कते । तथापीति । तद्वृत्तिप्रयोजकसंबन्धे सति तदभावाभिधानं

व्याहतमित्याह । विद्यमान इति । तत्संबन्धवति तेनापि भवितव्यमत्रोदाहरणमाह । न हि घटेति । ननु समवायिकारणस्यैव कार्याश्रयत्वान्न घटे ज्ञानमित्याशङ्क्य तव मते घटोऽपि तथा किं न स्यादित्याह । यत्रेति । यत्र कारणे इत्यर्थः । अतो न गुणादौ प्रसङ्गः ॥

ननु यत्र यदवच्छिन्नसमवाय इति विवक्षितत्वान्न घटादेर्बुद्धिसमवायित्वमिति चोदयति ।

घटादेर्बुद्धिसमवायित्वानिरासः ।

अथ बुद्ध्यवच्छिन्नसमवायाभावात् घटो न बुद्धिसमवायीति चेन्न । बुद्ध्यवच्छिन्नसमवायत्वेन तस्य तत्सम्बन्धत्वे समवायानन्तप्रसङ्गेन तस्यैवासिद्धेः । स्वरूपसम्बन्धेनैव तदनुमानेऽर्थान्तरत्वात् । बुद्ध्यवच्छिन्नसमवायस्य तव मते केवलसमवायादनन्यत्वाच्च । यदत्र केनचिदुक्तम्, समवायस्यैकत्वेऽपि भवन्मते मोक्षे सुखस्फुरणसत्त्वेऽपि दुःखस्फुरणाभाववत् घटेऽन्यसमवायसत्त्वेऽपि संवित्समवायो नास्तीति । तन्न । आत्मन एव निःसुखस्फुरणरूपत्वेऽपि मोक्षे दुःखतादात्म्याभावेन तदस्फुरणात् । न तु स्फुरणविरहात् । यस्मिंस्तु संसारिणि दुःखमस्ति तदपि तन्निष्ठत्वेन ब्रह्मीभूतो मुक्तोऽवगच्छतीति । न तृतीयः । बुद्धेरिदानीं ज्ञानं ज्ञातो घट इत्याद्यनुभवेन कालादिनाऽपि स्वरूपसम्बन्धसत्त्वात् । नापि सम्बन्धं विनैव बुद्धिरात्मगुण इति पक्षः

शोभते । अतिप्रसङ्गात् । यत्तु नवीनोक्तं रूप्यादेर्दृश्यत्वादिना यः सम्बन्धः, अभावद्वैतमते अभावात्मनो यः सम्बन्धः स एव बुद्ध्यात्मनोरिति । तन्न । मिथ्याधर्मिकधर्मकस्यापि मिथ्यात्वेन तदुभयसम्बन्धस्यापि मिथ्यातादात्म्यादिरूपत्वात् । मतान्तरे प्रपञ्चात्यन्ताभावस्यासम्बन्धेऽपि न काचित् क्षतिः । नह्यभावसम्बन्धः शास्त्रेण प्रतिपाद्यते ।

अथेति । समवायस्यावछिन्नत्वाकारेण विशिष्टव्यवहारनियामकत्वे सोऽप्रामाणिक एव स्यादित्याह । न बुद्ध्यवच्छिन्नेति । किंच बुद्ध्यवच्छिन्नसमवायोऽपि घटेऽस्तीत्याह । बुद्ध्यवच्छिन्नेति । समवायस्य बुद्धिसंबन्धाभावान्न तदवछेदकत्वं स्वरूपसंबन्धेन । तदवछेदे समवायमात्रस्यैवाछिन्नत्वाद्घटेऽपि तत्प्रसङ्ग इति भावः । अत्र नवीनोक्तां प्रतिबदीं दूषयितुमनुवदति । यदत्रेति । एकजीववादे मुक्तौ दुःखाभावादेव तद्विशि[illegible]स्फुरणाभावोपपत्तिरित्याह । तन्न आत्मन एवेति । अनेकजीववादे ईश्वरस्येव मुक्तस्यापि दुःखस्फुरणमस्तीत्याह । यस्मिंस्त्विति । गुणगुणिनोः स्वरूपसंबन्ध इति पक्षं प्रतिक्षिपति । न तृतीय इति । बुद्धेः स्वरूपसंबन्धत्वादित्यन्वयः । नवा किमपीति । पक्षे दोषमाह । नापि संबन्धमिति । बुद्ध्यात्मनोः संयोगादिसंबन्धाभावेऽप्यन्यः संबन्धो भविष्यतीति नवीनोक्तं चोद्यमनुवदति । यत्त्विति । प्रपंचाभावेन सद्वितीयं ब्रह्मेति मते तयोराविद्यकसंबन्धातिरिक्तः स वक्तव्य इत्यभिप्रेत्योक्तमभावद्वैत-

मत इति । दृश्यत्वादिना शुक्तिरूप्यादेर्यः संबन्धः स बुद्ध्यात्मनोर्मतद्वयेऽपि न सम्भवतीत्याह । तन्नेति । अभावद्वैतमते चाभावात्मनोः संबन्ध एव नास्ति । शास्त्रस्याखण्डार्थपरत्वान्मानान्तरस्य च तत्राभावा-च्चेत्याह । मतान्तर इति ॥

नन्वनुभवत्वेनाश्रितमनुभूते इति चेन्न । भावत्ववदप्रयोजकत्वात् । वस्तुतः शास्त्राप्रतिपाद्यस्वरूपसम्बन्धसत्त्वेऽपि न दोष इत्यपि शब्दप्रयोगः । ज्ञाने सम्बन्धनिराकरणादेः रूपादावपि तुल्यत्वात्तस्यापि गुणत्वादिकं न सिद्ध्यतीत्याशङ्क्याह । न चाभिहितेति ।

रूपादिगुणनाम-वास्तविकत्वम् ।

नचाभिहितप्रकारेण रूपादेरपि न घटादिगुणत्वं स्यादिति वाच्यम् । वस्तुतस्तदभावस्येष्टत्वात् । प्रतीतेस्त्वनिर्वचनीयगुणगुणिभावविषयत्वात् । एतावांस्तु विशेषः । बुद्ध्यारोपोऽन्तःकरणावच्छिन्न आत्मनि सोपाधिकः । "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव"इति श्रुत्या परिशेषोपोद्बलितया बुद्धेरन्तःकरणधर्मत्वे सिद्धत्वात् । केवलात्मनि च "नान्तःप्रज्ञानं बहिःप्रज्ञ"इत्यादिश्रुत्या दर्शितोपपत्त्या च विज्ञानाभावस्य सिद्धत्वात् । ननु "मनसा ह्येव पश्यति" इति विज्ञानं प्रति मनसः करणत्वश्रुतेस्तस्य मनो-

धर्मत्वश्रुतिरौपचारिकीति चेन्न । विज्ञानधर्मिणो मनस आत्मनि विज्ञानारोपनिमित्ततया करणत्वात् । कुसुमस्य स्फटिकारुणिमारोपे करणत्ववत् । एवं चोभयश्रुतिर्मुख्यार्था । घटादौ तु रूपादिर्न सोपाधिकः । तत्रोपाधेरदर्शनात् । किं तु रज्जुसर्पवन्निरुपाधिक एव । न च रज्जुसर्पवन्न मिथ्यात्वबुद्धिस्तत्रेति वाच्यम् । अविद्यातिरिक्तदोषाजन्यत्वेन घटादिज्ञानानिवर्त्यत्वेन चाविचारदशायां तदभावेऽपि विचारदशायां तत्सत्त्वात् । देहात्मतादात्म्यवत् ॥

अस्तु तर्हि घटादिवदात्मनोऽपि अनिर्वचनीयं बुध्यादिगुणकत्वमेव स्वाभाविकं न निर्गुणत्वमित्याशङ्क्यात्मनि बुद्ध्यादिसंबन्धस्यौपाधिकत्वात् तत्समानसंज्ञावत्वाभावात्तदज्ञानजन्यत्वात्तज्ज्ञाननिवर्त्यत्वाच्च न स्वाभाविकमित्याह । एतावांस्त्विति । बुद्ध्यादिकं क्वचिदाश्रितम् । गुणत्वात् । रूपवत् । न चात्मा तदाश्रयः । तस्य निरवयवकूटस्थस्याव्याप्यवृत्तिर्जन्यबुद्ध्याद्याश्रयत्वानुपपत्तेः । पृथिव्यादेस्तदाश्रयत्वं दूरतो निरस्तमिति परिशेषादन्तः करणमेव तदाश्रय इति । परिशेषेति । स्वप्नोपलब्धिर्बहिःप्रज्ञा तदुभयरहितमिति श्रुत्यर्थः । "कामः सङ्कल्प" इत्यादिश्रुतेरुपक्रमविरोधादन्यपरत्वं शङ्कते । ननु मनसेति । कामादेर्मनोविकारत्वेऽपि करणत्वश्रुतिरविरुद्धेत्याह । न विज्ञानेति । रूपादेर्घटादा-

वारोपितत्वेऽप्यात्मन्यारोपितबुद्ध्यादिवैलक्षण्यमाह । घटादाविति । रज्जुसर्पवद्रूपादेर्निरुपाधिकाध्यासत्वेऽपि व्यवहारदशायां बाधः स्यादित्याशङ्क्याह । न च रज्जुसर्पवदिति । किं मिथ्यात्वनिश्चयो बाधः, उत सविलासाऽविद्यानिवृत्तिः। आद्यस्त्विष्ट एव । द्वितीयस्तु रूपाद्युपादानमूलाज्ञाननिवर्तकज्ञानाभावादेव नास्तीत्यभिप्रेत्याह । अविद्येति ।

घटरूपादेरज्जुसर्पवैलक्षण्याभिधानादेव नवीनप्रलापोऽपि निरस्त इत्याह । एतेनेति

घटरूपादेर्वैलक्षण्येन नवीनमतं निरस्यति । एतेन घटतद्रूपादेस्त्वदुक्तकुतर्कबाधितं चेत् गुणगुणित्वं तर्हि गगनस्येव तत् प्रातिभासिकं स्यात्। व्यावहारिकत्वे तद्ग्राहकयुक्त्यैव तत्पारमार्थिकमित्यस्मन्मतमिति नवीनोक्तं परास्तम् । उक्तयुक्तीनां वास्तवधर्मत्वप्रतिकूलत्वात् । मिथ्यात्वेऽपि व्यवहारकाले तेषामधिष्ठानज्ञानाभावेन वर्तमानतयाऽविद्यातिरिक्तदोषाजन्यतया चार्थक्रियासामर्थ्यात् सत्यत्वायोगात् दुर्निरूपस्याप्येतावता पारमार्थिकत्वोक्तौ काममभिधीयताम् । संज्ञामात्रविवादपर्यवसानात् । कुतर्कत्वं चास्मत्तर्कस्य स्वव्याघातकत्वात् प्रतितर्कपराहतत्वाद्वा, नोभयमपि । प्रत्यक्ष प्रतीतिमात्रेणाविवेकिबाधरहितेन गुणगुणिभावं व्यव-

स्थापयतस्तवैव तर्कः कुतर्कः । मायिकरजतदेहात्मभावव्यापकत्वात् । यत्तु ज्ञानतादात्म्यं ज्ञानसंबद्धस्य चेत् संबद्धस्य भेदगर्भत्वाद्व्याघातः, असंबद्धस्य चेदतिप्रसङ्ग इति तन्न । धर्मज्ञानवादे ज्ञानस्य स्वेनेव ज्ञानात्मवादेऽपि स्वेन संबन्धान्तरमन्तरेणाभेदसंभवात् । भिन्नयोरेव संबन्धापेक्षणात् । अन्यथा त्वदुक्तयुक्त्या त्वमपि त्वदभिन्नो न भवेदिति तव निरात्मतापत्तिः । ननु भिन्नयोरैक्यं संबन्धं विना न भवतीति चेन्न । भिन्नत्वैकत्वयोरेकासमवायात् । कल्पितभेदयोरिति चेत्तर्हि स एव स इति किं संबन्धेन ॥

एतेनेति । गगनस्येवेति । तद्गतरूपादिवदित्यर्थः । यदुक्तं, व्यावहारिकत्वसाधकयुक्त्या पारमार्थिकत्वसिद्धिरिति तत्राह । उक्तयुक्तीनामिति । ननु रूपादेरारोपितत्वे यावदाश्रयभावित्वमर्थक्रियायोग्यत्वं च न स्यादित्याशङ्क्यान्यथोपपत्त्या दूषयति । मिथ्यात्वेऽपीति । व्यवहारकालेऽधिष्ठानज्ञानाभावाद्यावदाश्रयभावित्वमविद्यातिरिक्तदोषाजन्यत्वादर्थक्रियासामर्थ्यं च मिथ्यात्वेप्युपपद्यत इत्यर्थः । ननु व्यावहारिकत्वप्रयोजकमेव सत्त्वप्रयोजकमित्यत आह । दुर्निरूपस्यापीति । असद्विलक्षणमात्रेणोक्तरूपसंभवान्न युक्तिविरुद्धसत्त्वसिद्धिरित्यर्थः । गुणगुण्यादिभावे बाधकतर्कस्य कुतर्कत्वमुक्तमसहमानः पृच्छति । कुतर्कत्वं चेति । लौकिकवैदिक-

व्यवहाराविरुद्धत्वाददद्वैतानुकूलत्वाच्च न स्वव्याघात-कत्वं, प्रतितर्कस्य दूषितत्वान्न तत्पराहतिश्चेत्यभिप्रे-त्याह । नोभयमपीति । न्यायानुग्रहीतश्रुतिबाधितत्वा-त्प्रपञ्चसत्त्वसाधकतर्कः कुतर्क इत्याह । प्रत्युतेति । भवत्तर्कस्य संप्रतिपन्नमिथ्यापदार्थेऽपि प्रसरात्कुतर्कत्व-मित्याह । मायिकेति । ज्ञानात्मनोरभेदेऽपि प्रतित-र्कपराहतिं चोद्यमनुवदति । यत्त्विति । विनाऽपि सम्बन्धं स्वरूपविशेषादेवाभेद इति मानान्तरेऽपि संमत मित्याह । तन्नेति । अतर्कत्वद्योतनाह । अन्यथेति । अद्यापि ज्ञानात्मनोर्भेदं सिद्धवत्कृत्य शङ्कते । भिन्नयो-रिति । किं वस्तुतो भिन्नयोरित्यभिप्रेतमुत कल्पितभेद-योरिति । आद्ये तदेकमेव नास्तीत्याह । न भिन्नेति । द्वितीयमनूद्य दूषयति । कल्पितेति ॥

सिद्धान्ताभिमततर्कस्याप्यतिप्रसङ्गमभिमन्यमान-स्य तस्य नवीनस्य चोद्यमनूद्य निराकरोति । एतेनेति ।

सिद्धान्तभिमततर्कस्या-तिप्रसङ्गं निराकरोति। एतेन सम्बन्धाभावेन ज्ञानस्या-त्मधर्मत्वनिराकरणे ज्ञानत्वमपि ज्ञानधर्मो न भवेत् । ज्ञानत्वानधिकरणमपि ज्ञानं चेत् ज्ञाना-नधिकरणमपि ज्ञानात्मकमस्त्विति केन चिदुक्तं परास्तम् । ज्ञानत्ववन्निर्द्धर्मकज्ञानाभ्युपगमे बाध-काभावात् । ज्ञातत्वं तु सखण्डमेवेति न ज्ञानं विना तत्सिद्धिरिति विशेषः । न च सुषुप्तौ ज्ञाना-

भावात्कथं स आत्मेति वाच्यम् । तत्रापि तत्सं-भवस्योक्तत्वात् । किञ्च श्रुतौ हि तत्र तत्र ब्रह्मविज्ञानात्सर्वविज्ञानं श्रूयते । जीवश्चानादिः । उत्पत्तिमत्वे विनाशप्रसङ्गात् । कृतहान्यादेरप्यापत्तेः । न चाग्निविस्फुलिङ्गादिदृष्टान्तेन जीवस्योत्पत्तिः श्रूयते इति वाच्यम् । अवयविनः पृथग्भावमात्रमेव हि विस्फुलिङ्गादेर्नतु तस्मिन् प्रागसतउत्पत्तिः । अनभिव्यक्तस्याभिव्यक्तिर्वा । अग्न्यवयवविस्फुलिङ्गानां प्रागपि तथैवानुभवात् ॥

ज्ञानस्यैकत्वात्तत्र ज्ञानत्वाभाव इष्ट इत्याशङ्क्याह । ज्ञानत्वेति । ज्ञाने ज्ञानत्वानभ्युपगमे किमनुगतव्यवहारानुपपत्तिः, किं वा तस्येतरभेदानुपपत्तिः, किं वा तदसाधारणधर्माभावे तस्य वस्तुत्वानुपपत्तिः । नच सर्वथाऽपि पराभिमतज्ञानत्वे तद्गतासाधारणधर्माभावेऽप्युक्तस्य सर्वस्योपपत्तिवदेकज्ञानस्वरूपादेव तत्सर्वोपपत्तिरित्यभिप्रेत्याह । ज्ञानत्ववदिति । ननु ज्ञानत्वेऽपि ज्ञानत्वतैवासाधारणो धर्मस्तद्व्यावर्तकोऽस्तीति चेन्न । एकव्यक्तौ जातेरयोगात् । ननु ज्ञानेतरावृत्तित्वे सति सकलज्ञानवृत्तित्वलक्षणोपाधिरेव ज्ञानत्वतेति चेन्न । ज्ञानेतराद्यनेकपदार्थात्मकस्य सखण्डोपाधेर्ज्ञानत्वासाधारणधर्मतायोगात् । किञ्च ज्ञानत्वस्य घटत्वादिना भेदग्रहे सत्येव ज्ञानेतरावृत्तित्वलक्षणव्यावर्त्तकधर्मग्रहः । तद्ग्रहे च ज्ञानत्वस्य घटत्वादिनाभेदग्रह

इति परस्पराश्रयापत्तेः । एवं तत्ताद्धर्मेषु तथाविधाप्रामाणिकानन्तधर्मकल्पनागौरवात्प्रमेयत्वादावेतादृग्धर्मासंभवाच्च । ज्ञानत्वं स्वरूपविशेषादेवेतरव्यावृत्तमनुगतज्ञानालम्बनं चेत्यवश्यमभ्युपेयम्, एवमस्मन्मते ज्ञानमपीति भावः । तर्हि ज्ञानाश्रयं विना ज्ञातृत्वमित्युक्तं दूषयति । ज्ञातृत्वमिति । ननु ज्ञानात्मनोरभेदे सुषुप्तावपि ज्ञानं स्यात् तथा च सुषुप्तित्वभङ्ग इत्याशङ्क्यानित्यज्ञानोपरमस्यैव सुषुप्तित्वान्नित्यज्ञानं तदाप्यस्तीत्याह । न च सुषुप्ताविति । चिद्रूपब्रह्माभेदादपि प्रत्यगात्मा चिद्रूप इति वक्तुमभेदे तावच्छ्रुतार्थापत्तिं सूद्भावयति । किञ्चेत्यादिना । जीवस्य घटादिवद्ब्रह्मकार्यत्वेऽपि तद्विज्ञानात्सर्वविज्ञानसिद्धिरित्याशङ्क्य तस्याकार्यत्वमाह । जीवश्चेति । "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" इत्यादि श्रुत्यर्थे भ्रान्तस्य तान्त्रिकस्य चोद्यमपवदति । न चाग्नीति । दृष्टान्तश्रुतेः प्रत्यक्षसिद्धार्थानुवादित्वात्प्रत्यक्षेण चाग्न्यवयवानामेव सतां विवक्तानां विस्फुलिङ्गतयोपलम्भान्न तेषां स इति सत्कार्यवादाभिमतोत्पत्तिरित्याह । अवयविन इति ॥

एवमेव "अस्मादात्मन" इति दार्ष्टान्तिकश्रुत्यर्थमाह । एवं जीवस्यापीति ।

अस्मादात्मन इति दार्ष्टान्तिकश्रुत्यर्थनिरूपणम् ।

एवं जीवस्यापि ब्रह्मसमानस्वभावत्वं विभक्तमात्रं च ततोऽवगम्यते न तु

द्विविधाऽप्युत्पत्तिः । ततो जीवोऽपि ज्ञानात्मकब्रह्माभिन्नः । अन्यथैकविज्ञानात्सर्वविज्ञानप्रतिज्ञा पीडेयत । अग्निविस्फुलिङ्गादिदृष्टान्तश्रुतिश्च बाध्येत । तथा च परामर्शसूत्रं ज्ञातमेवेति । "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतिरपि ज्ञानस्यात्मत्वे प्रमाणं व्यधिकरणषष्ठीतः समानाधिकरणषष्ठ्या अभ्यर्हितत्वात् । अन्यथा द्रष्टुर्या दृष्टिः तस्याः दृष्टेः, यो द्रष्टा तस्य वा, विपरिलोपो निषिध्यते ? । नाद्यः । जीवाश्रितज्ञानस्य प्रत्यक्षविनाशानुभवात् । न द्वितीयः । "तद्वैतन्न पश्यति पश्यन्वै तन्न पश्यति"इति "न हि द्रष्टुर्दृष्टेर्विपरिलोप"इति ज्ञानस्यैव विनाशनिषेधात् । न चेश्वरदृष्टेर्विनाशमियं निषेधतीति वाच्यम् । "पश्यन्वै तन्न पश्यति"इति विशेषविज्ञाननिषेधस्य तस्मिन्नयोगात् । "तीर्णो हि तदा सर्वाञ्छोकान् कान् हृदयस्य भवति"इति पूर्ववाक्यप्रमितस्य सुप्तौ शोकसंतरणस्य सर्वदा शोके परमेश्वरेऽयोगात् । न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यत इत्युत्तरवाक्यात्प्रतिपन्नघ्राणाभिव्यक्तगन्धज्ञानस्य परस्मिन्नयोगाच्च । न हि गन्धज्ञानमात्रं घ्रातेरर्थः । प्रकारान्तरेण गन्धमवगच्छति गन्धं जिघ्रज्जिघ्रतीत्यप्रयोगात् ।

ब्रह्मसमानस्वभावत्वं सत्यज्ञानादिरूपत्वं अनादेर्जीवस्य ब्रह्मणो भेदे ऽन्यज्ञानादन्यज्ञानानुपपत्तेरेकविज्ञानात्सर्वविज्ञानप्रतिज्ञा पीड्येत ततस्तदभेदो वक्तव्य इत्याह । ततो जीवस्य ब्रह्मस्वभावत्वाभावेऽग्निविस्फुलिङ्गदृष्टान्तानुपपत्तिरित्याह । अग्निविस्फुलिङ्गेति । आत्मनश्चिद्रूपत्वे बादरायणसूत्रमपि प्रमाणयति । तथाचेति । यो नित्यश्चिद्रूप आत्मैव चिद्रूपब्रह्मण एवानाद्यविद्ययाऽनादिजीवभावेन स्थितत्वादिति सूत्रार्थः । द्रष्टरि दृष्टिशब्दश्रवणादप्यात्मा चिद्रूपइत्याह । न हि द्रष्टुरिति । ननु द्रष्टुः संबन्धिन्या दृष्टेरिति । तयोर्भेद एवास्या अर्थ इत्याशङ्क्याह । व्यधिकरणेति । व्यधिकरणे षष्ठीपरिग्रहोऽपि सिद्धान्ते समञ्जस इति वक्तुं परमते तदसामञ्जस्यमाह । अन्यथेति । सुषुप्तौ करणव्यापारोपरमात्सर्वज्ञानाभावशङ्कायां रूपादिविषयकवृत्तिज्ञानोपरमेऽपि साक्षिरूपज्ञानस्योपरमो नास्तीत्येवमर्थे स्पष्टमवगम्यमानेऽप्रसक्तद्रष्टृनाशनिषेधपरत्वायोगादित्यभिप्रेत्याह । न द्वितीय इति । अस्तु तर्हि दृष्टिविनाशनिषेध एव श्रुत्यर्थः । स च परमतेऽपीश्वरज्ञाने संभवतीति चेन्न । तथात्वे पूर्ववाक्यासामञ्जस्यप्रसङ्गादित्याह । न चेश्वरेति । संदंशन्यायेनेयं जीवविषयेत्यभिप्रेत्य पूर्वोत्तरवाक्ये जीवविषये प्रदर्शयति । तीर्णो हीति । तदा सुषुप्तौ हृदयस्यान्तःकरणस्य सम्बन्धिनः शोकाननतिक्रान्तो भवति । आत्मनि तदारोपनिमितस्यान्तःकरणस्य लीनत्वादितिश्रुत्यर्थः । ननु गन्धज्ञानमवघ्रातिशब्दार्थो न तु घ्राणाभिव्यक्तत्वविशेषितम् । गौरवात् । ईश्वरज्ञानमपि गन्धविषयकमित्यत आह । न हीति ।

प्रकारान्तरेणेति । अनुमानादिना गन्धज्ञातरीत्यर्थः ।

नन्‌ सिद्धान्तेऽपि समानाधिकरणषष्ठ्यनुपपत्तिः। दृष्टेर्दर्शनाश्रयत्वं रूपद्रष्टृत्वासंभवादिति चेन्न। रूपादिविषयवृत्त्यधिष्ठानतया कल्पितभेदेन फलरूपदृष्टिसम्बन्धित्वेन वा दृग्रूपस्याप्यात्मनो द्रष्टृत्वोपपत्तेरित्याह । न चैवमिति ।

आत्मनि द्रष्टृत्वाद्यनुपपत्तिशङ्कां निराकरोति ।

न चैवं दृष्टेः कथं द्रष्टृत्वमिति वाच्यम् । दृग्रूपस्यात्मनो दृष्टयभिव्यञ्जकदर्शनाश्रयतया तत्तद्विषयावच्छिन्नतया तदवभासकतया वा द्रष्टृत्वाविरोधात् । द्रष्टुर्वृत्त्याश्रयस्यान्तःकरणस्य या दृष्टिः साक्षिभूता ज्ञप्तिस्तस्या वा, दृष्टेर्वृत्तेर्योऽनुभवो द्रष्टा साक्षी तस्येति वाऽर्थः । ननु मुक्तावपि "विज्ञातारमरे केन विजानीयात्"इति श्रुतेर्विज्ञातृत्वमस्ति नतु तदान्तःकरणमस्तीति चेन्न । आत्मनो भूतपूर्वगत्या तदा ज्ञातृत्वनिर्देशात् । अन्यथा "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्"इति मुक्तौ दर्शनकर्तृत्वनिषेधविरोधात् । अत एव "पश्यंश्चक्षुः शृण्वच्छ्रोत्रम्"इत्यादिश्रुतिर्जीवस्यागन्तुकज्ञानवादिनी शबलात्मविषया । अन्यथा "नान्तप्रज्ञम्"इत्यादिश्रुतिविरोधात् । तस्मादवस्थात्रयसाक्ष्यनुभव एवात्मेति । सचायमात्मोदासीनो न कर्त्ता भोक्ता वा । असङ्गो ह्ययं पुरुषः । "असङ्गो

न हि सज्जते द्रष्टृवैव पुण्यं च पापं चेत्यादिश्रुतेः । स्यादेतत् । अहमनुभवे प्रकाशमान आत्मा ततोऽन्यो घटवदनात्मा स च ज्ञानरूपोऽपि कर्त्ता भोक्ताऽभ्युपगन्तव्यः । अहं करोमि भुञ्ज इति तयोरहमनुभवप्रकाशाश्रयत्वानुभवात् ।

सिद्धान्ते व्यधिकरणषष्ठ्याऽर्थमप्युपपादयति । द्रष्टुर्वृत्त्याश्रयस्येति । नन्वात्मनोऽन्तःकरणवृत्त्यधिष्ठानतया द्रष्टृत्वमुक्तमनुपपन्नम् । तदभावदशायामपि द्रष्टृत्वश्रवणादिति चोदयति । ननु मुक्ताविति । परमतेऽपि तदा तदनुपपत्तेस्तुल्यत्वाद्विधुरे गृहस्थशब्दवत्तत्प्रयोग इत्याह । नात्मन इति । मुक्तावपि शरीरेन्द्रियादेः सत्त्वात् दर्शनकर्तृत्वमस्तीति वदन्तमर्वाचीनं प्रत्याह । अन्यथेति । द्रष्टृत्वादेः श्रुतिबाधितत्वादेव क्वचित्तदनुवादश्रुतिरारोपितविषयेत्याह । अत एवेति । द्रष्टृत्वादेः स्वाभाविकत्वे श्रुत्यन्तरविरोधमाह । अन्यथेति। "नान्तःप्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञम्"इत्यादिना प्रपञ्चोपशमं शिवमद्वैतम्"इत्यन्तेन निर्विशेषस्वरूपमभिधाय स आत्मेति । तस्यैवात्मत्वनिर्देशादात्मनः स्वाभाविकद्रष्टृत्वादिकं तद्विरुद्धमित्यर्थः । आत्मनः संविदभेदमुपसंहरति । तस्मादिति । पूर्वमात्मनः प्रमातृत्वस्यारोपितत्वोपपादनेन तदधीनकर्तृत्वादेरप्यारोपितत्वमर्थसिद्धमपि प्रतिवाद्यभिनिवेशोपशमनाय मुखतः साधयितुमुपक्रमते । स चायमिति । उदासीनपदार्थमाह । न कर्तेति । तत्र वक्ष्यमाणतर्कानुग्राह्यां श्रुतिं प्रमाणयतीत्यर्थः । श्रुतेरन्यपरत्वमभिप्रेत्य

यथाश्रुतेऽनुपपत्तिमुद्भावयति स्यादेतदिति । आत्मनः कर्तृत्वादौ तावत्प्रत्यक्षं प्रमाणमाह । अहङ्करोमीति । अहमनुभवे प्रकाशो यस्य स तथा । तदाश्रयत्वानुभवादित्यर्थः ।

स्थूलोहमित्याद्यनुभववदेतस्य भ्रमत्वान्न श्रुतिविरोधित्वमित्याह । न चेति ।

अनुभवे भ्रमत्वनिरासः । न चायमनुभवो भ्रमः । न तावदात्मनि बाधकानुभवादस्य भ्रमत्वम् । तदभावात् । नहि नाहं करोमि न भुञ्जे किं तु मदन्य एवास्मिंच्छरीरे तद्विध इति कश्चिदनुभवति । ननु मिथ्यात्मधर्मत्वात्, कर्तृत्वादिरपि मिथ्या । अहमनुवेऽनात्मतादात्म्यविशिष्टानुभवस्यैवानुभवादिति चेत् तर्हि केवलानुभवरूप आत्मा न स्यात् । अहमनुभवे तस्याप्रकाशमानत्वात् । अहमनुभवगोचरस्य द्वैरूप्ये प्रमाणाभावाच्च । न च परमप्रेमगोचरत्वदुःखित्वादेरहमनुभवगोचरदर्शनात्तस्य द्वैरूप्यमिति वाच्यम् । नह्यनेकधर्मानुभवो धर्मिणं भिनत्ति । अतिप्रसङ्गात् । न चैतयोर्विरोधोऽस्ति । आत्मा ह्यात्मत्वात् परमप्रेमास्पदं दुःखी च । दुःखसमवायिकारणत्वात् । यस्याहमर्थस्य प्रेमा भूयासमिति तस्यैव सोऽहं दुःखीत्यनुभवात् । ननु प्रेमगोचरत्वं नात्म-

त्वप्रयुक्तम्, अनात्मन्यपि पुत्रादौ तद्दर्शनात् । न च तत्राप्यात्मसम्बन्धित्वकृतं तदित्यात्मत्वमेव प्रयोजकमिति वाच्यम् । शत्रावपि प्रसङ्गात् । अनिष्टत्वेन तस्य द्वेषगोचरत्वेऽप्यात्मीयत्वेन प्रेमापि स्यात्। आत्मीयेऽप्युपेक्षणीये तदभावाच्च।

किमेतस्य प्रत्यक्षबाधाद् भ्रमत्वमुत युक्तिबाधात् । नाद्यइत्याह । न तावदिति । तद्विध इति । कर्ता भोक्ता चेत्यर्थः । द्वितीयं शङ्कते । नन्विति । मिथ्येति । मिथ्याभूतो यः शबलात्मा तद्धर्मत्वादित्यर्थः । शबलस्यैवाहमनुभवगोचरत्वे केवलस्यात्मत्वं न स्यात् । अहमनुभवगोचरस्यैवात्मत्वादित्याह । तर्हीति । अनात्मतादात्म्यस्याप्यहमनुभवगोचरत्वमप्यसिद्धमित्याह । अहमनुभवेति। नन्वहमनुभवगोचरे प्रतीयमानदुःखित्वादिभेदानुपपत्तिरेव धर्मिभेदे मानमित्याशङ्क्याऽऽह । न च परमेति । किं धर्मिभेदमन्तरेण धर्ममात्रभेदो ऽनुपपन्नः, उत विरुद्धधर्मभेदः । नाद्यः । रूपरसाद्यनेकधर्मवत्त्वेऽपि धर्मिणो भेदादर्शनादित्याह । न ह्यनेकेति । द्वितीयस्त्वसिद्ध इत्याह । न च तयोरिति । परस्मिन्नात्मन्युभयोरपि प्रयोजकप्रदर्शनेनाविरोधमुपपादयति । आत्मा हीति। धर्म्यभेदस्यानुभूयमानत्वादपि न विरोध इत्याह । यस्येति । यदुक्तमात्मत्वात्परमप्रेमास्पदमिति तदाक्षिपति । ननु प्रेमेति । पुत्रादावपि परम्परासंबन्धेनात्मत्वमेव तत्प्रयोजकमित्याशङ्क्यातिप्रसङ्गेन दूषयति । न च तत्रेति । शत्रौ द्वेषप्रयोजके सति कथं प्रेमेत्याशङ्क्य दुःखित्वप्रेमास्पदत्ववदुभयप्रयोजकवशादुभयमपि स्या-

दित्याह। अनिष्टत्वेनेति। अनिष्टत्वं प्रेमप्रतिबन्धकमित्याशङ्क्योपेक्षणीये प्रतिबन्धकाभावात् प्रेमा स्यादित्याह। आत्मीयेऽपीति॥

आत्मत्वस्याप्रयोजकत्वेऽप्यन्यदेव प्रयोजकमिति शङ्कते। अस्तु तर्हीति।

सुखित्वाद्यनुभवे आत्मत्वस्य प्रयोजकत्वं निषेधति।

अस्तु तर्हि सुखविशिष्टत्वमेव तत्प्रयोजकमिति चेत् तर्हि सुखदुःखयोर्विरोधात्तद्धर्मिभेदः स्यात्। न चैकस्मिन्नपि तयोः कालभेदेनाविरोध इति वाच्यम्। दुःखकाले आत्मनि प्रेमाभावप्रसङ्गात्। अस्ति च तदापि स इति चेन्न। सुखसमवायित्वं ह्यात्मनः प्रेमगोचरत्वे प्रयोजकम्। तद्धीने तददर्शनात्। तदाश्रये च दर्शनात्। तच्च दुःखाश्रयेऽपि न हीयते। तस्यैव सुखसमवायिकारणत्वात्। पुत्रादावप्यात्मोपाधिप्रेमगोचरे स्वसमवेतसुखजनकत्वं प्रयोजकम्। सुखजनकत्वं तूभयत्रानुगतप्रयोजकम्। सामान्ये सामान्यस्य विशेषे विशेषस्य च प्रयोजकताया न्याय्यत्वात्। न च लाघवादात्मनः सुखत्वमेव परमप्रेमगोचरत्वे प्रयोजकं सुखशेषत्वं च पुत्रादेरौपाधिकप्रेमगोचरत्वे इति वाच्यम्। अहं सुखीत्यबाधितानुभवेनात्मनोऽसुखत्वात्। तथापि दुःखाश्रयत्वाविरोधाच्च। जन्य-

योरेव सुखदुःखयोर्विरोधाऽनुभवात् । अन्यथौपाधिकेऽप्यात्मनि सुखरूपत्वानपायात् । दुखानुपपत्तेः ।

तथा सति विरुद्धधर्माध्यासाद्धर्मिभेदः स्यादित्याह । तर्हीति । रागद्वेषवदेककालीनत्वविरोधेऽप्येकाधिकरणत्वमविरुद्धमित्याशङ्क्याह । न चैकस्मिन्निति । स प्रेमा । एवं सिद्धान्तिना प्रेमगोचरत्वप्रयोजक आक्षिप्ते पूर्ववादी स्वाभिमतं निरुपाधिप्रेमप्रयोजकं दर्शयति । न सुखसमवायित्वं हीति । तर्हि संजन्यमानदुःखदशायामात्मनि प्रेमा न स्यादित्याशङ्क्य तदापि सुखसमयित्वयोग्यतास्तीत्याह । तच्चेति । एवं निरुपाधिकप्रेमगोचरत्वे प्रयोजकमुक्त्वा सोपाधिकप्रेमगोचरत्वे प्रयोजकमाह । पुत्रादाविति । जनकत्वं निमित्तत्वं तर्हि प्रेमगोचरत्वमात्रे किं प्रयोजकमित्यत आह । सुखजनकत्वमिति । उक्तप्रयोजकस्य यत्सामान्यन्यायोपेततामाह । सामान्य इति । ननु विशेषप्रयोजकयोर्लघुशरीरयोः सतोर्गुरुशरीरे तेन ग्राह्य इत्यत आह । न च लाघवादिति । प्रमाणबाधितेऽर्थे लाघवानवतारादिति हेतुमाह । अहमिति । अहमर्थस्य सुखत्वेनैव परमप्रेमगोचरत्वमङ्गीकृत्यापि तस्य द्वैरूप्यं न सिद्ध्यतीत्याह । तथापीति । ननु सुखदुःखयोराधाराधेयभावो विरुद्ध इत्त्याशङ्क्याह । जन्ययोरिति । नित्यसुखस्य दुःखविरोधे शबलितेऽपि तस्मिन् दुःखं न स्यादित्याह । अन्यथेति ॥

केवलबुद्धेरेव दुःखादिधर्मित्वमिति सांख्यमतं निराकरोति । न च दुःखादिकमिति ।

केवलबुद्धेरेवदुःखादिधर्मित्वमितिमिनिरस्यति ।

न च दुःखादिकं केवलान्तःकरणधर्म एवप्रतीयते इति वाच्यम् । चैतन्यसामानाधिकरण्यानुभवात् । दुःखादेरन्तःकरणमात्रधर्मत्वे च भौतिकाश्रयतया रूपादिवत् साधारण्यप्रसङ्गाच्च । न च द्वित्वादिवदसाधारण्यमविरुद्धम् । तस्यापि साधारणत्वात् । नियतचेतनधर्मोपग्रहेण तस्यासाधारणत्वाच्च । नन्वहमनुभवगोचरः परिच्छिन्नोऽनुभूयते । इहैवास्मीत्यनुभवात् । न च देहपरिच्छिन्नत्वं केवलात्मनिष्ठम् । तस्य विभुत्वात् । न च देहपरिच्छिन्नोऽनुभूयते नत्वात्मेति वाच्यम् । अहमिहैवास्मि जानान इति परिच्छिन्नत्वस्य ज्ञानसामानाधिकरण्यानुभवात् । तस्मादन्तःकरणतादात्म्यविशिष्ट आत्माहमनुभवगोचर इति चेन्न । देहपरिमाणस्यात्मन्यारोपितस्य स्फटिकलौहितस्यानुभवात् । आत्मप्रादेशिकत्वानुभवस्य सिद्धान्तेऽपि भ्रमत्वात् । अन्यथान्तःकरणस्य नियतपरिमाणत्वेन तदवच्छिन्न आत्माऽपि तथैवेति व्यासङ्गः, सर्वाङ्गीणसुखानुभवश्च न स्याताम् । अनियतपरिमाणत्वे वा तदाश्रयभेद-